Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

SIVARAHASYAM

Amsa 11

Thanjavur Maharaja Serfoji's
SARASVATI MAHAL LIBRARY
Thanjavur.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

தஞ்சாவூர் சரசுவதி மகால் வெளியீட்டு எண். : 522

ஶ்ரீ:

।। शिवरहस्यम् ।।

சிவரஹஸ்யம்

(பதினொன்றாவது அம்சம்)

பதிப்பாசிரியர்

தேதியூர். எஸ். கிருஷ்ணமூர்த்தி சாஸ்திரிகள்,
முன்னாள் மேநிலை ஸம்ஸ்கிருத பண்டிட்,
சரசுவதி மகால் நூலகம், தஞ்சாவூர்.

தஞ்சாவூர் மகாராஜா சரபோஜியின்
சரசுவதி மகால் நூலகம்,
தஞ்சாவூர்

2008 விலை : ரூ. 300-00

சிவரஹஸ்யம் அம்சம்-11
0522
T.M.S.S.M-2016

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

நூற்பதிப்பு விளக்கக் குறிப்பு

நூற்பெயர்	:	சிவரஹஸ்யம் (பதினொன்றாவது அம்சம்)
பதிப்பாசிரியர்	:	எஸ். கிருஷ்ணமூர்த்தி சாஸ்திரிகள்
வெளியிடுபவர்	:	இயக்குநர், சரசுவதி மகால் நூலகம்
வெளியீட்டு எண்	:	522
மொழி	:	ஸம்ஸ்கிருதம்
பதிப்பு	:	முதற்பதிப்பு
வெளியீட்டு நாள்	:	2008
தாள்	:	TNPL 18.6 kgs.
நூல் அளவு	:	21 x 14 c. m.
பக்கங்கள்	:	452
படிகள்	:	250
எழுத்து	:	16 & 12
அச்சிட்டோர்	:	சரசுவதி மகால் நூலகம்
புத்தகக்கட்டு	:	மெலிந்த அட்டை
பொருள்	:	சிவ தத்துவம்
விலை	:	ரூ. 300-00

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

வெளியீட்டாளர் முகவுரை

தஞ்சையில் அமைந்து தரணி முழுமைக்கும் அறிவுச் செல்வமாகப் பயன்பட்டுக் கொண்டிருக்கும் அரும்பெரும் நிறுவனம் நம் சரசுவதி மகால் நூலகமாகும். சுவடிக் கருவூலமாகவும், பன்மொழி நூற்களஞ்சியமாகவும், பன்மொழி ஆய்வு மையமாகவும் திகழும் சரசுவதி மகால் நூலகம் ஆற்றிவரும் தொண்டு அளப்பரியது.

இந்நூலகம் தமிழகத்தினர் மட்டுமின்றிப் பிற மாநிலத்தவரும், பிற நாட்டினரும் பயன்படுத்தி வருகின்ற ஓர் அரிய ஞான ஆலயமாகும். பாரதநாடு பழம்பெரும் நாடு. உலகின் மிகச்சிறந்த நாகரிகத்திற்கும், பண்பாட்டிற்கும், மொழி வளத்திற்கும், இலக்கிய, இலக்கண மேம்பாட்டிற்கும், இயல், இசை, நாடகம், ஓவியம், சிற்பம், கட்டிடம் போன்ற நுண் கலைகளுக்கும் மெச்சும் அறிவிற்கும் மேதினியினில் உயர்நாடு நம்நாடு. இமய முதல் குமரிவரை சைவநெறி தழைத்து பரவியது எனினும் தமிழகத்தில் சைவ ஒளி பரவி நாயன்மார்கள், தோன்றி சைவநெறி வளர்த்தனர். சைவநெறி அன்பு, அறம், விருந்தோம்பல், பணிவு போன்ற வாழ்வியல் நெறிகளைக் கூறுவது.

சமஸ்கிருத மொழியில் அமைந்த சிவரகசியம் எனும் நூல் சிவ தத்துவம் பற்றிக் கூறுகிறது.. இதன் ஆசிரியர் பெயர் அறியக் கிடைத்திலது. ஒரு இலச்சத்து இருபதினாயிரம் சுலோகங்கள் கொண்ட இந்நூல் நம் சரசுவதி மகால் நூலகத்தில் மட்டுமே முழுமையாகக் கிடைத்துள்ளது. சிவபெருமானின் பன்னிரண்டு பெயர்களைக் கொண்டு பன்னிரண்டு அம்சங்களாக (பகுதிகளாக) பகுக்கப்பட்டுள்ளது இந்நூல். இந்நூலின் ஒவ்வொரு பகுதியிலும் இலக்கியச் செறிவோடு சிவ தத்துவங்கள் கூறப்படுகின்றன.

1971ஆம் ஆண்டில் நமது நூலகம் திரு. சுவாமிநாத ஆத்ரேயர் எனும் சமஸ்கிருத அறிஞரைப் பதிப்பாசிரியராகக் கொண்டு 3, 4, 5, 6 அம்சங்களைப் பதிப்பித்து வெளியிட்டது. இந்நூலக முன்னாள் சமஸ்கிருதப் பண்டிதர் திரு. எஸ். கிருஷ்ணமூர்த்தி சாஸ்திரிகள் அவர்களைப் பதிப்பாசிரியராகக் கொண்டு 1992ல் முதல் அம்சமும், 1996ல் 7வது

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

அம்சத்தில் முதல் தொகுதியும், 2006ல் 2வது அம்சமும், பின்னர் 7வது அம்சத்தில் எஞ்சிய மூன்று தொகுதிகளும், எட்டாவது அம்சமும் வெளியிடப்பட்டுள்ளன. பின் இதே பண்டிதரைப் பதிப்பாசிரியராகக் கொண்டு ஒன்பதாவது அம்சம் இரு பகுதிகளாகவும் பத்தாவது அம்சமும் வெளியிடப்பட்டன. .

தற்போது வெளியிடப்படும் பதினோறாவது அம்சத்தில் (சுவடி எண். B. 1767, D. 9555) எந்த மாதத்தில், எந்த திதியில், எந்த நக்ஷத்திரத்தில் சிவவழிபாடு எவ்வாறு செய்யப்படவேண்டும், சிவாபிஷேகத்திற்கு உரிய பொருள்கள் யாவை, சமர்ப்பிக்கப்படும் பொருள்களின், மலர்களின் மற்றும் நிவேதனங்களின் மாறுபாட்டினால் ஏற்படும் பலாபலன்கள் யாவை என பார்வதியின் கேள்விகளுக்குச் சிவபெருமான் அருளிய கருத்துக்களை முருகப்பெருமான் ஜைகீஷவ்யர் முதலான முனிவர்களுக்குக் கூறியதாக சூதமுனிவர் கூறுவதாக அமைந்தது. சிவபெருமானை ஒருமையுடனும், பக்தியுடனும், வழிபாடு செய்வதால் ஏற்படும் நலன்கள் குறித்தும் சிவவழிபாட்டிற்கு உரிய மலர்கள் பற்றியும், சிவபெருமானுக்கு உரிய ஆடைகள், அணிகலன்கள் பற்றியும், இப்பாரத நாட்டில் உள்ள சிவதலப்பெருமைகள், சிவபக்திச் சிறப்பு மற்றும் இன்னபிற செய்திகளும் விரிவாக விளக்கப்பட்டுள்ளது. இந்நூல் சிவவழிபாடு செய்வோர் அனைவருக்கும் பயனுள்ளதாய் விளங்கும் என்பதில் சிறிதும் ஐயமில்லை.

இந்நூல் வெளிவர நிதி உதவி நல்கிய நடுவண் அரசுக்கும், நிருவாக அலுவலர் மற்றும் வெளியீட்டு மேலாளர் (பொறுப்பு) திரு. சாமி. சிவஞானம் அவர்களுக்கும், இந்நூல் கணினி அச்சில் வெளிவர, கணினி பிரிவில் பணிபுரிந்த ஏனையோருக்கும் என் பாராட்டுதல்களைத் தெரிவித்துக்கொள்கிறேன்.

எம். எஸ் சண்முகம், இ. ஆ. ப.,
மாவட்ட ஆட்சித்தலைவர்
மற்றும் இயக்குநர்,
சரசுவதிமகால் நூலகம்.

தஞ்சாவூர்,
21-10-08

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

உ
சிவமயம்

முன்னுரை

உலகின் பிற நாடுகளில் நாகரிகமும், நெறிமுறைகளும் மலராமல் அறியாமை இருள்சூழ்ந்திருந்த காலத்திலும் கர்மபூமி எனப்படும் பாரதநாடு - முதிர்ந்த நாகரிகச் சிறப்புடனும், பண்பாடு, நெறிமுறை, மொழியறிவு, இலக்கிய அறிவு, இயல், இசை, நாடகம், சித்திரம், சிற்பம், கட்டிட வடிவமைப்புத்திறன் போன்ற கலையறிவு - இறையுணர்வு இன்னபிறச் சிறப்புக்களுடனும் சிறப்புற்றிருந்தது என்பது யாவரும் அறிந்ததே.

வேத நெறிகளிலும், இறை வழிபாட்டிலும், உலகின் பிற நாடுகளுக்கு காலங்காலமாகவே நம்நாடு வழிகாட்டியாக இருந்துவந்திருக்கிறது. நம் நாட்டில் உள்ளதுபோன்ற - விரிவான - நுட்பமான சமயச் சுதந்திரம் உலகில் வேறு எந்த சமயத்திலும் இல்லை. பாரதத்தில் இமயம் முதல் குமரிவரை சைவநெறி பரந்துள்ளதெனினும் தென்னாட்டில் அதுவும் தமிழகத்தில் சைவநெறி தழைத்ததுபோல் வேறெங்கிலும் சிறப்புடன் விளங்கவில்லை எனலாம். 'தென்னாடுடை சிவனே போற்றி' என்ற வழக்கும் இதனை உறுதிசெய்கின்றது. சைவம் வளர்த்த அறுபத்துமூன்று சமயக்குரவர்கள் தோன்றிய தமிழகத்தில்தான் சைவ ஆகமங்களும் - அவ்வழிவந்த பூசை முறைகளும் இன்றளவும் தழைத்து விளங்குவதாகும். சைவ சமயச் சிறப்புப்பற்றி சிவாகமங்களும், சிவபுராணம், கந்தபுராணம், திருமுறைகள் முதலானவை எழுதாக்கிளவி எனப்படும் வேதங்கள்போல் உலகுள்ளளவும் நிலைத்திருப்பவையாகும்.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

சைவ சமயச் சிறப்புப்பற்றி பதினெட்டுப் புராணங்களில் ஒன்றான ஸ்கந்த புராணத்தில் சிவரஹஸ்யம் என்ற பகுதி விரிவாகக் கூறுவதாகும். இதேபோன்று ஸம்ஸ்க்ருத மொழியில் அமையப்பெற்ற சிவரஹஸ்யம் எனும் மாபெரும் தனி நூலும் சிவ தத்துவம்பற்றி விரிவாகக் கூறுவதாகும். இதன் ஆசிரியர் யார் என்று நூலில் எவ்விடத்திலும் கூறப்படவில்லை.

ஒரு லக்ஷம் ஸம்ஸ்க்ருத ச்லோகங்கள் கொண்ட மாபெரும் இதிஹாஸமான மஹாபாரதம் பற்றிய ஒரு பழமொழி உண்டு. இந்த நூலில் கூறப்படும் தர்ம தத்துவங்கள், ரஹஸ்யங்கள் பலவும் பிறநூல்களில் காணப்படலாம். ஆனால் இதில் (மஹாபாரதத்தில்) காணப்படாத (கூறப்படாத) தர்ம ரஹஸ்யம் எதுவும் பிற நூல்களில் இருப்பதற்கில்லை என்ற கருத்துள்ள,

"यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्"

எனும் வாக்கின்படி இந்த நூல் முழுவதிலும் சைவநெறி சம்பந்தமான உயர்ந்த கருத்துக்கள் பலவும் சிறப்பாகக் கூறப்பட்டுள்ளன. ஒரு லக்ஷத்தி இருபதினாயிரம் ஸம்ஸ்க்ருத ச்லோகங்கள் கொண்ட இந்நூல் நமது சரசுவதி மகால் நூலகத்தில் மட்டுமே முழுமையாகக் கிடைக்கக்கூடியதாகும்.

சிவபெருமானின் பன்னிரண்டு பெயர்களைக்கொண்டு பன்னிரண்டு அம்சங்களாக (பகுதிகளாக) இந்நூல் பிரிக்கப்பட்டுள்ளது. 1. மாஹேச்வர, 2. பவ, 3. ஹர, 4. சிவ, 5. பர்க, 6. சங்கர, 7. உக்ர, 8. பீம, 9. சதாசிவ, 10. ஈச்வர, 11. மஹாதேவ, 12. ஈச என்ற பெயர்களுடன் 12 பகுதிகளாக உள்ள இந்த நூலின் ஒவ்வொரு பகுதியிலும் சிவதத்துவங்கள் மிக அழகிய பலவித சந்தங்களுடன் - இலக்கிய நயம், சொல் நயமுடனும் விளங்கும் ஸம்ஸ்க்ருத ச்லோகங்களால் விளக்கப் படுகின்றன.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

இந்த நூல் முதல் இரண்டு பாகங்கள் (மாஹேச்வர பவ எனும் அம்சங்கள்) மட்டும் 1913-ம் ஆண்டில் சென்னையைச் சேர்ந்த செல்வந்தரும், சிவநெறிச் செம்மலுமாக விளங்கிய சதாசிவ செட்டியார் என்ற அன்பரால் வெளியிடப்பட்டுள்ளன. அவைகளும் இந்நாட்களில் கிடைப்பதற்கு அரிதாகவுள்ளன.

கடந்த 1971-ம் ஆண்டில் நமது நூலகத்தில் அச்சிட்டு வெளியிடப்பட்ட 3, 4, 5, 6 அம்சங்கள் தஞ்சை ஸ்ரீஸ்வாமிநாத ஆத்ரேயர் எனும் ஸம்ஸ்க்ருத பேராசிரியர் அவர்களால் சிறந்த முறையில் பதிப்பிக்கப்பட்டுள்ளன.

மீதமுள்ள பகுதிகளைப் (1, 2 மற்றும் 7 முதல் 12 முடியவுள்ளவை) பதிப்பிக்கும் பணி 1991-ல் முன்னாள் மாவட்ட ஆட்சியரும், நூலக இயக்குநருமான திரு. சண்முகராஜேச்வரன், இ. ஆ. ப., அவர்களால் எனக்களிக்கப்பட்டது. பிழைகளைத் திருத்தம் செய்து பதிப்பிக்கும் பணி அதுமுதல் இரண்டு ஆண்டுகளில் முடிக்கப்பட்டது.

முதல் அம்சத்தில் - சிவபெருமானைக் குறித்துக் கடும் தவம்செய்த ஜைகீஷவ்ய முனிவர் சிவனருள்பெற்று கந்தப் பெருமானை சேவித்தல், சிவநெறிகள்பற்றி பார்வதிதேவியிடம் சிவபெருமான் அருளிச்செய்ததை உடனிருந்து செவியுற்ற கந்தப்பெருமானிடம் சிவதத்துவம்பற்றி விரிவாகக் கூறும்படி ஜைகீஷவ்யர் வேண்டுதல் - நந்திகேச்வரர், ப்ருங்கி முதலான சிவகணத்தைச் சேர்ந்தோரும் திருமால் முதலான தேவர்களும் முனிவர்களும் அடங்கிய அவையில் கந்தப்பெருமான் சிவரஹஸ்யக் கருத்துக்களைக் கூறுதல், ஸத்யோஜாதம் - வாமதேவம், அகோரம் - தத்புருஷன், ஈசானன் எனும் பஞ்சப்ரம்மங்கள் செய்த சிவஸ்துதி - கைலாய வருணனை முதலான கருத்துக்களும்,

இரண்டாம் அம்சத்தில் - பார்வதிதேவி தவமியற்றுதல், சிவபெருமான் அருள்புரிதல், சிவகைலாயம் போன்று

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

பராசக்திக்கென ***சிந்தாமணி த்வீபம்*** அமைத்தல், பராசக்தியின் தனி வாசஸ்தலமாக அமைக்கப்பட்ட சிந்தாமணி த்வீப வருணனை, துர்வாஸ முனிவரின் தவம், சக்தி தத்துவ விளக்கம் ஆகியவையும்,

மூன்றாவது அம்சத்தில் - காயத்ரீயின் தவம், சிவ வழிபாட்டின் சிறப்பு, மேரு மலையின் சிறப்பு, வில்வமரத்தின் பெருமை, சிவபூஜை மகிமை பற்றியும்,

நான்காவது அம்சத்தில் - நந்திகேச்வரர், சண்டேசப் பெருமான், ப்ருங்கி, மார்க்கண்டேயர், அகஸ்தியர் முதலானோருக்கு சிவபெருமான் அருள்புரிதல்.

ஐந்தாவது அம்சத்தில் - கேதாரேச்வர, ஓங்காரேச்வர, வைத்தியநாதம், குஸ்ருணேச்வர, நாகநாத, மஹாகால, பீம, த்ரியம்பகேச்வர, விச்வநாத, ஸ்ரீசைல, கோகர்ண, ராமேச்வர எனும் தலங்களில் உள்ள பன்னிரண்டு ஜோதிர்லிங்க வருணனைகளும்,

ஆறாவது அம்சத்தில் - மஹாபாரதத்தில் பகவத்கீதை போன்று வேதாந்த உபநிடதக் கருத்துக்களடங்கிய ருபு கீதையும் கூறப்பட்டுள்ளன.

ஏழாவது அம்சத்தில் - சிவஸஹஸ்ர நாமத்தின் சிறப்பு காசித்தலச்சிறப்பு, புஷ்பதந்தன் எனும் கந்தர்வன் சிவெபருமானைக் குறித்துக் கடுந்தவம் செய்தது, அவர் இயற்றிய **"சிவமஹிம்ன ஸ்தோத்ரம்"** எனும் துதிச்சிறப்பு, சிவபூஜை செய்யும்முறை, காளஹஸ்தித் தலச்சிறப்பு, வேடன் (கண்ணப்பன்) செய்த விநோதமான சிவபூஜையால் அவன் சிறப்புற்றது, சிவாலயத்தில் பிரதக்ஷிணம் செய்யும்முறை, குளிர் காலத்தில் சிவலிங்கத்திற்கு உறைந்த நெய் கொண்டு போர்வைபோல் மூடிவைத்து வழிபடும் 'க்ருதகம்பள' வழிபாடுபற்றி, கும்பகோணம், திருவிடைமருதூர் தலச்சிறப்பு, காசி தலத்தில் கடினமான பஞ்சக்ரோச யாத்திரையின் சிறப்பு கூறப்பட்டுள்ளது.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

எட்டாவது அம்சத்தில் - கந்தப் பெருமான் ஜைகீஷவ்ய முனிவருக்கும் பிற முனிவர்களுக்கும் சிவதத்துவக் கருத்துக்களைக் கூறும் முகமாக,

கச்யப முனிவருக்கு இரு மனைவியர். ஒருவர் விநதா, மற்றவர் கத்ரு. விநதா அருணனுக்கும் கருடனுக்கும் தாய். கத்ரு நாகங்களின் தாய். கத்ரு பொறாமையால் தமது பிள்ளைகளின் துணை கொண்டு வஞ்சகமாக விநதாவைத் தனக்கு அடிமையாக்கிக் கொள்கிறாள். கருடன் தன் தாயின் அடிமைத்தனத்தை விலக்கிக்கொள்ள - தேவருலகிலிருந்து அமுத கலசத்தைக் கொண்டுவந்து கொடுக்கவேண்டும் என்று கத்ரு கேட்க, கருடன் அதனை ஏற்று கடும் சிவவழிபாட்டின் பயனாக பெரும் போருக்குப் பின் அமுத கலசத்தைக் கொண்டுவந்து கொடுத்து தாயை அடிமைத்தனத்திலிருந்து விடுவிக்கிறான்.

அமுத கலசத்தை இழந்த தேவர்கள் கருடனின் பலத்தை அறிந்து பயந்து திருமாலின் துணையுடன் நயமாகப் பேசி கருடனிடமிருந்து அமுத கலசத்தைப் பெற முயன்றபோது திருமால் கருடனைப் புகழ்ந்து பேசி வேண்டிய வரம் கேள் என்று கூற, "நீங்கள்சிவபெருமானை வழிபட்டு சுதர்சன சக்கரத்தைப் பெற்றவர். சுதந்திர சக்தியற்றவர். எனக்கு வரம் தருவதா! நான் உங்களுக்கு வரம் தருகிறேன் கேளுங்கள் என்று கூற, அமுத கலசத்தைக்கொடு என்று திருமால் கேட்க, கருடன் சொல் தவறாமல் அமுத கலசத்தைக் கொடுத்த வரலாறு பல அத்தியாயங்களில் கூறப்பட்டுள்ளதோடு,

விபூதி (திருநீறு), ருத்ராக்ஷ மகிமை - தக்ஷகன் ஆதிசேஷன் முதலான அரவங்கள் பாதாள உலகில் உள்ள ஹாடகேசலிங்க வழிபாடு செய்தல் - அஷ்டதிக்கஜங்களும் சிவவழிபாடு செய்தது பற்றியும் கூறப்படுகிறது.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ஒன்பதாவது அம்சத்தில் - முருகப்பெருமான் தொடர்ந்து கூறுவதாவது -

சிவநாமாக்களின் சிறப்பு, யுக தர்மங்கள், கலியுகத்தில் தர்ம நெறி குறைந்து வேதங்களுக்குரிய பெருமை குறைந்துள்ள நிலையில் காலடியில் (கேரளம்) சங்கரரின் அவதாரம், ஹரதத்தர் எனும் அறிவாற்றல் மிக்க சிவாசார்யர், சமயக்குரவர்களில் சுந்தரமூர்த்தி நாயனார், திருஞானசம்பந்தர் வாகீசர் எனும் திருநாவுக்கரசர் அப்பூதியடிகள் திருநீலகண்டர், வேடன் கண்ணப்பன் முதலானோர் தோன்றி சைவ சமயத்திற்கு ஆற்றிய அரிய தொண்டுகள் பற்றியும் சிவனருள் பெற்றமை பற்றியும் விரிவாக 65 அத்யாயங்களில் கூறப்பட்டுள்ளது.

பத்தாவது அம்சத்தில் யஜுர் வேதத்தில் நான்காவது காண்டம் ஐந்தாவது பிரச்னத்தில் (பகுதியில்) ஸ்ரீருத்ரம் எனப்படும் மிகவுயர்ந்த மந்திரங்களின் நடுவில் அமைந்துள்ள திருஐந்தெழுத்து எனப்படும் பஞ்சாக்ஷர மந்திரத்தினை இவ்வுலக ஆசாபாசங்களை விடுத்து ஒருமுகப்பட்ட மனத்துடன் ஜபித்தலும், திருநீறு தயார் செய்ய வேண்டிய முறையும் அவ்வாறு தயாரிக்கப்பட்ட திருநீற்றை உரிய முறையில் பஞ்சாக்ஷர மந்திரத்தைச் சொல்லியவாறு உடலில் நெற்றி, மார்பு, தொப்பூழ் பகுதி, கைகள் (முழங்கை மணிகட்டுகள்) காதுகள் முதுகுப்புறம் யாவற்றிலும் அணிந்து சிவவழிபாடு செய்தல் வேண்டும் என்றும் கூறி, திருநீற்றின் சிறப்பினைக் கூறும் முகமாக "மங்கணர்" என்ற சித்தர் தவவரலாற்றையும் கூறி, திருநீறுக்கு பஸ்மா, பஸிதம், பூதி, க்ஷாரம், ரக்ஷை என்று ஐந்து காரணப்பெயர்கள் உண்டு என்றும், நெற்றியில் திருநீறு அணிந்தால் தலையால் செய்த பாபங்களும், மார்பில் அணிந்தால் பிறர்மனை நாடிச்செய்த பாபங்களும், கைகளில் அணிந்தால் எல்லாவிதமான பாவங்களும் விலகும் என்றும் விபூதியின் பெருமை தெரியாமல் யார் அணிந்தாலும் அவர்கள் அறிந்தும்

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

அறியாமலும் செய்த பாவங்கள் நீங்கும் எனவும் திருநீற்றை நீரில் குழைத்து அணிந்த பிறகு கைகளை நீர்கொண்டு கழுவும்போது அந்த நீரை கீழேவிட்டுவிடக்கூடாது, அந்தநீர் மிகமிகத் தூய்மையானது என்பதுடன் அமுதமே அது என்றும் ருத்ராக்ஷத்தின் உற்பத்தி, தோற்றம் (வடிவம்), நிறம், சிறப்பு பற்றிக் கூறும் முகமாக "பலன்" எனும் அசுரனின் மூன்று குமாரர்களான தாராக்ஷன், மகராக்ஷன், வித்யுன்மாலி என்பவர்கள் குரு சுக்ராசாரியாரின் உபதேசப்படி கடும்தவம் செய்து அதன் பயனாக செம்பு, வெள்ளி, தங்கம் எனும் மூன்று உலோகங்களால் அமைந்த நகரங்களை அவர்கள் விருப்பப்படி பறந்து செல்லும் தன்மையுள்ளவைகளாகப் பெற்று தேவர்களைத் துன்புறுத்தியபோது அவர்களை வெல்வதற்காக சூரிய சந்திரர்களைச் சக்ரமாகக் கொண்ட பூமித்தேர்மீது அமர்ந்த சிவபெருமானின் கண்களிலிருந்து பெருகிய நீர் மரங்களாயிற்று. அவைதான் ருத்ராக்ஷ மரங்கள் ஆயின என்றும், ருத்ராக்ஷங்கள் வெண்மை, சிகப்பு, மஞ்சள், கருமை நிறங்கள் உள்ளவை என்றும், அவற்றுள் யார் யார் எவ்வகை ருத்ராக்ஷம் அணிய வேண்டும் என்றும், எவ்வளவு ருத்ராக்ஷங்களை எங்கு அணிய வேண்டும் என்றும் கூறப்படுவதுடன் 'நெல்லிக்காய்' அளவுள்ள ருத்ராக்ஷங்களே உயர்ந்தவையென்றும். இலந்தை விதை அளவு உள்ளவை. நடுத்தரமானவை (சுமார்) என்றும், அதைவிட சிறிய அளவுள்ள ருத்ராக்ஷங்கள் அதமம் (தாழ்ந்தவை) என்றும் இயல்பான துவாரம் உள்ளவையே சிறந்தவையென்றும்அவை ஒன்று முதல் பல முகங்கள் கொண்டவை என்றும், ஒவ்வொரு (வகை) முகமுள்ள ருத்ராக்ஷத்திற்கும் ஒவ்வொரு தெய்வத் தொடர்புள்ள பெயர் உண்டு என்றும், மதுமாமிசம் போன்றவற்றை உண்ணாதவர்களே அதனை அணியலாம் என்றும், வருடப்பிறப்பு, ஆடி, தைமாதப் பிறப்பு, ஐப்பசி மாதப்பிறப்பு, பௌர்ணமி, அமாவாசை போன்ற புண்ய காலங்களில் அவற்றை முறைப்படி அணிந்து சிவபூஜை செய்வோர் இக பர நன்மைகளைப் பெறுவர் என்றும், 26 அத்யாயங்கள் வரையிலான பகுதியிலும், அப்பால் ஸ்ரீருத்ரம்,

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ருத்ரைகாதசினீ, மஹாருத்ரம், அதிருத்ரம் எனும் வேள்விகளின் சிறப்பு பற்றிக் கூறி கொடிய இக்கலியுகத்தில் முறைப்படி நல்ல குருவிடம் பஞ்சாக்ஷர மந்திரத்தை எல்லா நியாஸ வகைகளுடன் உபதேசம் பெற்று, வாசிகம், உபாம்சு, மானஸம், அகர்பம், ஸகர்பம் எனும் ஐவகையான முறைப்படி ஜபம் செய்து, ஜபத்தைச் செய்வதற்கு 30, 27, 25 ருத்ராக்ஷங்கள் கொண்ட மாலைகளைப் பயன்படுத்தவேண்டும் என்றும், அத்தகைய மாலைகள் முறையே செல்வம், ஆரோக்யம் முக்தி எனும் பலன்கள் அளிப்பவையென்றும் கூறி சிவலிங்கத்தின் தோற்றம் பற்றிய வரலாறு, நர்மதையில் கிடைக்கும் பாணலிங்கம், தங்கம் முதலான உலோகத்தால் அமைந்த லிங்கம், மரகதம், வைரம், நீலம் கோமேதகம் ஸ்படிகம் முதலான ரத்னங்களால் அமைந்த லிங்கம். பாதரஸத்தால் அமைந்த மிக உயர்ந்த லிங்கம் எனப் பல வகை லிங்கங்கள் பூஜைக்கு உரியவை என்றும் அவற்றுள் ரஸலிங்கமே மிகமிக உயர்வானது என்றும் அத்தகைய லிங்க்ங்களை பூஜித்தால் என்ன பலன்கள் கிடைக்கும் என்றும் கூறப்பட்டு பிரதோஷகால பூஜைச் சிறப்பு, அதிலும் சனி ப்ரதோஷ பூஜைச் சிறப்பு பற்றிக்கூறி. சிவபூஜை செய்யும் விதிமுறைகள் பற்றியும் கூறப்பட்டு, வெளிப்புற சிந்தனைகளை விலக்கி ஏகாக்ர (ஒரேமுனைப்பான) சிந்தனையுடன் சிவபூஜை செய்கையில் ஏற்படும் "நானே சிவம்" (சிவோஹம்) என்ற ஆத்மானுபூதி பெறுவதே. சிவபூஜையின் உட்கருத்து என்றும் விரிவாகக் கூறுப்பட்டுள்ளது.

பத்தாவது அம்சத்தை தொடர்ந்து தற்போது வெளியிடப்படும் இப்பதினோறாவது அம்சத்தில், எந்த மாதத்தில் - திதியில் - நக்ஷத்திரத்தில் சிவவழிபாடு எவ்வாறு செய்யப்படவேண்டும், சிவாபிஷேகத்திற்கு உரிய பொருள்கள் யாவை, சமர்ப்பிக்கப்படும் பொருள்களின், மலர்களின், நிவேதனங்களின் மாறுபாட்டினால் ஏற்படும் பலாபலன்கள் யாவை என பார்வதியின் கேள்விகளுக்குச் சிவபெருமான்

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

அருளிய கருத்துக்களை முருகப்பெருமான் ஜைகீஷவ்யர் முதலான முனிவர்களுக்குக் கூறியதாக சூதமுனிவர் கூறுகிறார்.

பிரம்மன் முதலானோர் சிவாராதனம் செய்து உயர்நிலை பெற்றது போல் பக்தியுடன் ஒருமுகமான (ஏகாக்ர) சிந்தனையுடன் சிவவழிபாடு செய்தால் கூன், குருடு, செவிடு போன்ற அங்கஹீனப் பிறவியெடுக்காமல் நற்குலத்தில் பிறந்து இகபரசுகத்தைப்பெறலாம் என்றும்,

இரத்தினங்களால் அமைந்த லிங்கத்தினும் நர்மதா பாணலிங்கம் உயர்வானது என்று கூறி, பல நிறப்பொடிகள் கொண்டு கோலமிடப்பட்டு விளங்கும் மண்டபத்தில் சிவலிங்கத்தை (சரலிங்கமாயினும்/ஸ்த்திரலிங்கமாயினும்) பிரதிஷ்ட்டை செய்து பஞ்சபூத வடிவான சிவபெருமானை பலபுண்ய நதிகள், தீர்த்தங்களிலிருந்து கொண்டுவரப்பட்ட நன்னீரால் ஸ்ரீருத்ரம் சொல்லி அபிஷேகம் செய்து,

नमस्ते देवदेवाय - शिवायाकाशमूर्तये ।
भवाय भव्यरूपाय हरभूम्यात्मने नमः ।।
व्यक्ताव्यक्ताय सोमाय जलरूपाय ते नमः ।
उग्राय भीमरूपाय वायुमूर्त्यात्मने नमः ।।

அத்யாயம் - 5 - 74, 75, 76.

என்றவாறு துதித்து வில்வ பத்ரங்களால் அர்ச்சனை செய்து உயர்வகை அன்னங்கள் பழங்கள் நிவேதனம் செய்து, சிவபக்தர்களுக்கு உணவளிக்கவேண்டும் என்று ஐந்து அத்தியாயங்களிலும், அடுத்துள்ள அத்தியாயங்களில் நூதனமாக சிவாலய நிர்மாணம் செய்வது, மலர்தோட்டம் மண்டபங்க்ள் அமைப்பதினும், பழுதடைந்த சிவாலயங்களைச் செப்பனிட்டுச் சீர்படுத்துவதால் ஆயிரம் அச்வமேத யாகம்

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

செய்த பலன் கிடைக்கும் என்றும், சிவாலயத்தில் சிவபெருமானின் இருபத்தைந்து அழகான லிங்கங்களை உயர்ந்த பீடங்களில் நிறுவி வழிபடும், பக்தன் கைலாயத்தில் சிவகணங்களின் தலைவனாகப் போற்றப்படுகிறான் என்றும்,

சிவாலயங்களில் உட்கட்டுப் பகுதிகளை எப்படியெல்லாம் அமைப்பது என்றும் பல்வேறு வாஹனங்களை அமைப்பது பற்றியும், தேர் அமைப்பது சிவாலயங்களுக்குரிய பாத்தரங்கள், சாதனங்கள் இன்னவிதமாய் இருத்தல் வேண்டுமென்றும், மாதப்பிறப்பு, தக்ஷிணாயன உதராயண நாட்கள், பருவகாலங்களிலும் (மாதப்பிறப்பு, பௌர்ணமி, அமாவாசை, தேய்பிறை அஷ்டமி, சதுர்தசி இவை பஞ்சபர்வா எனப்படும்) வழிபாடு செய்வது மிகமிகச் சிறந்தது என்றும் கூறி சிவவழிபாட்டிற்கு உரிய மலர்கள் பற்றி ஒரு அத்யாயம் முழுவதும் (9வது புஷ்பாத்யாயம்) கூறப்படுவதுடன் பசும்பால், எண்ணெய், தயிர், இளநீர் மற்றும் பச்சைக்கற்பூரம், குங்குமப்பூ கலந்த சந்தனம் இத்தனை அளவு இருத்தல் வேண்டும் என்றும், குறிப்பிட்ட மாதம், திதி, நக்ஷத்திரங்களில் பூஜிப்பதால் எத்தகைய உயர்வான பலன்கள் ஏற்படும் என்றும், சிவபெருமானுக்கு உரிய ஆடைகள், அணிகலன்கள் பற்றியும், ஆலய பிரதக்ஷிணம் அங்கபிரதக்ஷிணம் செய்வது சிவஸாயுஜ்யத்தை அளிக்கவல்லது என்றும், இத்தகைய சிறப்பு வழிபாடு செய்யும் சிவனடியார்களை யமன் அணுகமாட்டான் என்றும், ஸ்ரீருத்ரத்தினால் கூறப்படும் சிவநாமாக்கள் அடங்கிய ஸ்தோத்ரமும் 16வது அத்யாயம் முடியவுள்ள பகுதியில் கூறப்படுகிறது.

அடுத்து ஒரு முகம் முதல் 14 முகம் வரையிலான ருத்ராக்ஷங்களின் பெருமை, பஞ்சாக்ஷர ஜபத்துடன் அதை அணிவதால் ஏற்படும் நன்மைகள், ஆஷாட (ஆடி) மாதத்தில் நல்முத்தினால் அமைந்த சிவலிங்கபூஜை செய்து,

नम इज्याय पूज्याय उपजीव्याय ते नमः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

என்றவாறு துதிக்க வேண்டும் என்றும், அடுத்து சிராவணமாத வழிபாடு, பாத்ரபத மாதம் ஆச்வயுஜம், கார்த்திகம், மார்கசீர்ஷம், புஷ்யம், மாகம், பால்குனம் எனும் மாதங்களில் செய்ய வேண்டிய வழிபாட்டின் சிறப்பு பற்றி 25 அத்யாயங்கள் வரையில் உள்ள பகுதியில் கூறப்படுகிறது.

அடுத்து தேய்பிறை அஷ்டமி, சதுர்தசி, அமாவாசை, பௌர்ணமி, மாதப்பிறப்பு எனும் ஐந்து பர்வாக்களில் சிவவழிபாட்டின் சிறப்பு, சோமவார விரதம், பிரதோஷ விரதத்தில் சிவவழிப்பாட்டின் சிறப்பு, அதிலும் சனி வாரத்தில் வரும் பிரதோஷ கால பூஜையின் மகத்வம், மகாசிவராத்திரியில் விரதம் இருப்பது, நாள் முழுவதும் சிவாராதனை செய்வது பற்றியும், மாதம்தோறும் தேய்பிறை பதினான்காம் நாளில் சிவராத்ரி (மாத சிவராத்ரி) பூஜை செய்வது பற்றியும் திருடர், நெருப்பினால் ஏற்படும் துயரங்கள் துஷ்ட கிரஹங்களின் பீடைகள், தீராத நோய் இவற்றால் துயரப்படுவோரின் அல்லல் விலக்கும் சாந்தி துதி 40 அத்யாயம் வரையிலான பகுதியில் கூறப்படுகிறது.

அடுத்து, சாந்தி ஸ்துதியின் பயன் பற்றியும், 28 ச்லோகங்கள் சிவஸ்துதி, சிவதர்மங்கள் பற்றியும் கோதானம் பசுக்களின் உடலில் எங்கெங்கு எல்லா தேவதைகளும் இருக்கிறார்கள் என்பது பற்றியும், பசுக்களை அதிக கவனமுடன் பரிபாலிக்க வேண்டியது பற்றியும், பயணம் செய்யும்போது வழியில் எங்கு (கிராமத்திலோ வனத்திலோ மலையிலோ) சிவலிங்கத்தைப் பார்த்தாலும் வணங்கி வழிபாடு செய்வதே சிவதர்மமாகும் என்றும், திருமணம் ஆகாதவரோ, திருமணம் ஆகி குடும்பம் நடத்துபவரோ, சன்னியாசியோ யாராயினும் சிவவழிபாடு செய்யாமல் உணவருந்தலாகாது என்றும், பாரத தேசத்தில் உள்ள சிவதலப்பெருமைகள், சிவபக்திச் சிறப்பு பற்றியும் விரிவாகக் கூறப்படுகிறது. இத்துடன் பதினோராவது அம்சம் நிறைவு பெறுகிறது.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

இவ்வரிய நூலை அச்சிட்டு வெளியிட அனுமதி வழங்கிய தஞ்சை மாவட்ட ஆட்சித்தலைவர் மற்றும் நூலக இயக்குநர் உயர்திரு. எம். எஸ். சண்முகம் இ. ஆ. ப., அவர்களுக்கு என் உளம்நிறைந்த நன்றியைத் தெரிவித்துக் கொள்கிறேன். நூலக நிருவாக அலுவலர் மற்றும் வெளியீட்டு மேலாளர் (பொறுப்பு) திரு. சாமி. சிவஞானம் அவர்களுக்கும் என் உளமார்ந்த நன்றியினைத் தெரிவித்துக்கொள்கிறேன்.

சென்னை — தேதியூர். S. கிருஷ்ணமூர்த்தி சாஸ்திரிகள்

28-8-2008

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। श्री गुरुभ्यो नमः ।।

।। श्री गणेशाय नमः ।।

।। शिवरहस्यम् ।।

।। एकादशाम्शः ।।

विघ्नाद्रि भङ्गकुलिशाकृतिचारुशुण्डा-
दण्डाग्रधारितरदं द्विरदेन्द्रवक्त्रम् ।
कर्णान्तरालसुविराजितचामरौघ-
संवीजनप्रसृतदानकटं नमामि ।। 1

सूत उवाच -

श्रृणु शौनक भूयोऽपि संवादं परमं शुभम् ।
जैगीषव्यस्य च मुनेस्तारकारेः शुभास्पदम् ।। 2

सहैभिर्मुनिभिर्विप्र शाम्भवैः शम्भुसत्कथाम् ।
त्वमतीव शिवे भक्तः शिवलिङ्गार्चनप्रियः ।। 3

शौनक उवाच -

जैगीषव्यस्तारकारिमपृच्छत्किं कथानकम् ।
त्वं नो वद महाभाग सूत पौराणिकोत्तम ।। 4

भवभक्तोऽसि नितरां भस्मरुद्राक्षभूषणः ।
त्वद्वाक्पङ्कजनिष्यन्दिमकरन्दोपमाः कथाः ।। 5

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सहैभिर्मुनिभिः सूत मच्चित्तभ्रमरोऽधुना ।
पातुमिच्छति निःशङ्कं कृतान्तहरसत्कथाः ।। 6

सूत उवाच -

धन्या यूयं सदा मान्या मुनयः शाम्भवोत्तमाः ।
वदामि भवतां भक्त्या रहस्यं शैवमुत्तमम् ।। 7

दशधर्मार्थकथनं श्रुत्वा पृच्छति षण्मुखम् ।
जैगीषव्यः पुरा योगी शिवभक्तो जितेन्द्रियः । ८

प्रणम्याह तदा स्कन्दं प्राञ्जलिर्विनयान्वितः ।

जैगीषव्य उवाच -

नमो ब्रह्मण्यपतये सुब्रह्मण्याय ते नमः ।। 9

प्रणवार्थमाहासारप्रवणायाखिलात्मने ।
द्विजराजकलामौलिपादपङ्कजचेतसे ।। 10

देवसेनापते तुभ्यं लवलीपतये नमः ।
केकिकुक्कुटवाहाय कुमाराय नमोनमः ।। 11

गजाननानुजायाथ सर्वमन्त्रात्मने नमः ।
शैवानन्दरहस्याब्धिसोमधाम्ने नमो नमः ।। 12

त्वत्तोऽयं वेदसारार्थो
दशमांशः श्रुतो मया ।
भस्मरुद्राक्षमहिमा
तथा पञ्चाक्षरस्य च ।। 13

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

रुद्रस्य महिमा चैव शिवलिङ्गार्चनाविधिः ।
शिवधर्मस्य महिमा शिवनाम्नः फलं तथा ।। 14

शिवभक्तस्य महिमा भक्तलक्षणमेव च ।
शिवद्रोहवतां पुंसां दुःखानि विविधानि च ।। 15

श्रुतो हि विस्तरेणैव गणैः सुरगणैर्मया ।
पुनश्च श्रोतुमिछामि शाम्भोश्चान्यत्कथानकम् ।। 16

यद्यप्यन्यसुगोप्यं स्यात् वदैवं मम शाङ्करे ।

सूत उवाच -

सचेत्थं मुनिना पृष्टः तुष्टः सेनापतिस्तदा ।। 17

जैगीषव्यमुखाम्भोजं वीक्ष्य तान् गणपान् सुरान् ।
षड्वक्त्रो नेत्रभ्रमरैः प्रपिबन्निव सम्भ्रमात् ।। 18

तत्स्तुत्या चैव सन्तुष्टश्चन्द्रोदय इवाम्बुधिः ।
प्रावर्धत महासेनः पात्रं वीक्ष्यातुलं प्रियम् ।। 19

जैगीषव्यं मुनिं शान्तं जितषड्वैरिविक्रमम् ।
सस्मार देव्यै यत्प्रोक्तं महेशेन दयालुना ।। 21

कैलासे लास्यसदने मदनान्तकरेण हि ।
तथा शिवरहस्येऽस्मिन् पूजाविधिविनिर्णयम् ।। 21

उवाच वीक्ष्य प्रसभं त्रयक्षपादाम्बुजाश्रयः ।
तद्वो वदामि सरसं संवादं श्रवणाद्भुतम् ।
कुमारस्य मुनेस्तस्य भवद्भ्यो ब्राह्मणोत्तमाः ।। 22

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सुब्रह्मण्य उवाच -

श्रृणुष्व शाम्भवश्रेष्ठ रहस्यं मुनिसम्मितम् ।
पुरा कैलासशिखरे सुखासीनं महेश्वरम् ।। 23

रत्नसिह्मासने दिव्ये वैद्रुमे मण्टपोत्तमे ।
सायन्तनाभ्रपटलीप्रभाधिकविराजिते ।। 24

शोशुभ्यत्स्तम्भकुम्भाग्रवृषभास जिते मुने ।
धूपदीपादिवितते गणवृन्दविराजिते ।। 25

रम्यपुष्पवनापारगन्धमेदुरदिङ्मुखे ।
वितानप्रच्छदपटपाटितान्तरसुन्दरे ।। 26

चम्पकाशोकपुन्नागसौगन्धिकुसुमास्तृते ।
प्रफुल्लकेतकोद्दाममल्लीपङ्कजगन्धिले ।। 27

नन्दिभृङ्गिमहाकाल चण्डभैरवसेविते ।
मया द्विरदवक्त्रेण पार्श्वतः परिसेविते ।। 28

पप्रच्छ पार्वतीकान्तं नितान्तं शान्तविग्रहम् ।
कृतान्तं हरमाशास्यं वेदान्तार्थैकगोचरम् ।। 29

प्रणम्य प्राञ्जलिर्देवी भर्तुर्वक्त्रमुदैक्षत ।
उत्पलाभकटाक्षेण सरसाननपङ्कजा ।। 30

सर्वहृत्प्रणवोदार जगच्चक्रप्रवर्तकः ।
इङ्गितज्ञस्तदाप्राह देवीमानन्दनिर्भराम् ।। 31

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सरसेन कटाक्षेण कृपामूर्तिर्महेश्वरः ।

ईश्वर उवाच -

का विवक्षास्ति ते सुभ्रु निःशङ्कं मे वदाग्रतः ।। 32

त्वं मे शक्तिः परा देवी त्वयाहं शक्तिमान् शिवे ।
त्वत्तेजसा जगद्व्याप्तं सदेवासुरमानुषम् ।। 33

रहस्यं वा प्रकाशं वा वदामि प्रमुदे त्वयि ।
त्वं मे शरीराधिकृता वद मे तं हृदि स्थितम् ।। 34

कुमार उवाच -

इति शम्भोर्वचः श्रुत्वा गिरिजा हर्षनिर्भरा।
समुद्यदश्रुपुलका प्राह कामारिमीश्वरी ।। 35

गिरिजा उवाच -

देव देव महादेव शरणागतवत्सल ।
स्वानन्दराशिवाराशे कृपाराशे महेश्वर ।। 36

शिवार्चनविधानं मे कालतिथ्यृक्षके तव ।
लिङ्गेऽभिषेकसम्भारः फलपञ्चामृतैः कृतः ।। 37

पुष्पधूपादि दाने च दीपनैवेद्यकल्पनैः ।
धातुपात्रे तारतम्यमर्घ्यताम्बूलकल्पनम् ।। 38

तत्फले तारतम्यं च वद मे करुणार्णव ।

सूत उवाच -

इत्यपर्णावचः श्रुत्वा सम्पूर्णहृदयः शिवः ।। 39

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

प्राह प्रमोदभरितः दृष्ट्वा तामद्रिकन्यकाम् ।
महादेवो महानन्दः परानन्दमहोदधिः ।। 40

ईश्वर उवाच -

अये सुगिरिकन्यके तव सरोजराजाननं
विलोक्य मुदमादितः प्रभृति पारसारं गतः ।
अनन्तमहिमास्पदं शिवरहस्यरत्नाकरं
सुगोप्यमपि तद्वदे(?) शिवगणेषु तुष्टिप्रदम् ।। 41

प्रकाश्यमिदमेव ते मम हृदि प्रकृष्टं चिरं
प्रतुष्टिदमिदं शिवे विहितसर्वधर्मैरपि ।
न यागशतकोटिभिर्विविधदानकोट्यापि वा
तुरङ्गगजगोद्मैर्द्विजवरेषु दत्तैश्च किम् ।। 42

भक्तो मे यदि लिङ्ग तुङ्गविहितानङ्गाङ्गसङ्गोज्झितो
गङ्गातुङ्गतरङ्गचञ्चलमना गङ्गतरङ्गाप्लुतः ।
भूयाद्भावुकभक्तिभावहृदयो भावो भवेऽप्यध्रुवे
लिङ्गार्चासु निषक्तमुग्धहृदयो व्यक्तं स मुक्तिं गतः ।।

।। इति श्रीशिवरहस्ये एकादशाम्शे प्रथमोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। द्वितीयोऽध्यायः ।।

पार्वत्युवाच -

देव देव महादेव वामदेव सनातन ।
विश्वरूप विरूपाक्ष सर्वेश्वर महेश्वर ।। 1

सुखोपायमतो ब्रूहि शिवधर्मं सनातनम् ।
विमुक्तिदं विरूपाक्ष सर्वेषां भक्तिवर्धनम् ।। 2

तव प्रियकरं शम्भो धर्मसर्वस्वमीश्वर
सुगोप्यमपि मे ब्रूहि शिव शङ्कर सर्वग ।
भ्रान्तस्य घोरसंसारे जन्ममृत्युजरार्दिते ।। 3

जरायुजाण्डजस्वेद भूमिजातेषु जन्तुषु ।
चराचरेषु जातेषु सुखदुःखाभिमानिनः ।। 4

पुरुषस्य भवे भक्तिः कदाचिज्जायते विभो ।
तव प्रसादसम्पन्नो यदा जन्तुर्भविष्यति ।। 5

तदैव लभते भक्तिं त्वत्तो मुक्तिं च बिन्दति ।
कीटो वापि पतङ्गो वा सुरो वापि नरोऽपि वा ।। 6

ब्राह्मणो वाप्यन्त्यजो वा तव भक्त्या विमुच्यते ।
सर्वेषां मुक्तिदं धर्मं वद मे करुणाकर ।। 7

सुब्रह्मण्य उवाच -

एवं देव्या तदा पृष्टो भगवान्परमेश्वरः ।
कैलासनिलयो योगी सर्वेशः सर्वभावनः ।। 8

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पार्वत्यै प्राह सर्वेशः सुखोपायं महोदयम् ।
परमं सर्वधर्माणां शिवधर्मं महामुने ।। 9

श्रूयतामभिधास्यामि गणैः सुरगणैर्मुने ।
शिवेन कथितं देव्यै देवी मामाह सादरम् ।। 10

तद्वक्ष्यामि सुविस्तारं शिवप्रियकरं मुने ।
शिवधर्मं शिवप्रीतिकरणं कारणं नृणाम् ।। 11

सर्वेषां प्राणिनां विप्र संसाराब्धेस्तु तारणम् ।
अज्ञानार्णवमग्नानां सर्वेषां प्राणिनामयम् ।। 12

संसारोदधिमग्नानां जन्ममृत्युजरावताम् ।
शिवधर्मोडुपः श्रीमान् उत्तारक उदाहृतः ।। 13

स्वर्गकामप्रदा धर्मा यज्ञाद्याः सकला अपि ।
महादानायो धर्मा अन्नगोभूमिपूर्वकाः ।। 14

व्रतकृच्छ्रादिचरणा आश्रमाः श्रमदायकाः ।
इष्टापूर्तादयः सर्वे [1]सर्वसौख्यान्तसुन्दराः ।। 15

बह्वायासप्रदा विप्र नैव मुक्तिप्रदायकाः ।
साक्षात् त्र्यक्षप्रीतिकरा मोक्षज्ञानैकसाधनाः ।। 16

शिवधर्माः शिवप्रोक्ताः [2]शिवायै ते शिवाय च ।
तद्वक्ष्यामि मुनिश्रेष्ठ संवादं शिवयोर्वरम् ।। 17

---

1. फलपाकान्तसुन्दराः ।
2. शिवायै शिवप्रोक्ताः शिवधर्माः ते तव शिवायक्षेमाय शिवश्रेयः प्रदानार्हाः भवन्ति ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शिव उवाच -

श्रृणु शैलसुते भक्तसुखोपायं महोदयम् ।
संसारे क्लिश्यतां नृणां मया चोत्तारकः कृतः ।। 18

शिवधर्मो विशिष्टोऽत्र शिपिविष्टपदाश्रयः ।
संसेव्योऽयं परो धर्मः शिवाख्योऽयं शिवार्थिभिः ।। 19

ये तिष्ठन्ति परे धर्मे ते रुद्रा नात्र संशयः ।
ग्रामे वा यदि वारण्ये जले वापि स्थलेऽपि वा ।। 20

क्षेत्रे वा नगरे वापि कीकटे वा जनावृते ।
यत्र वा विद्यते लिङ्गं सर्वतीर्थानि तत्र वै ।। 21

कीर्तयिष्यन्ति मामीशे सकृदप्याशु ये नराः ।
सर्वपापैर्विमुच्यन्ते कोटिजन्मकृतैरपि ।। 22

ये पूजयन्ति लिङ्गं मे त्रिकालं बिल्वपल्लवैः ।
ये पश्यन्ति सकृद्देवि शिवलिङ्गं ममाश्रयम् ।। 23

भूभागसञ्चरा रुद्रास्ते कृतार्था न संशयः ।
प्रातः सङ्गम(व)मध्याह्ने प्रदोषे वापि शङ्करम् ।। 24

ये पश्यन्त्यर्चयन्ते वा त एव गणपुङ्गवाः ।
अस्मिन् कैलाससदने वस्तुं योग्या भवन्ति हि ।। 25

यः क्षणं वा मुहूर्तं वा शिवं मां नो विचिन्तयेत् ।
सर्वोऽपि दिवसो वन्ध्यो भवत्येव गिरीन्द्रजे ।। 26

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

दुर्लभं प्राप्य मानुष्यं येऽर्चयन्ति सदाशिवम् ।
तेषां हि सफलं जन्म भस्मरुद्राक्षधारिणाम् ।। 27

शिवभक्तिपरा ये तु शिवप्रणतमस्तकाः ।
शिवलोके क्षणाद्देवि विषमाक्षा भवन्ति ते ।। 28

शिवपूजाकरकराः शिवालयगताङ्घ्रयः ।
शिवार्पितलसद्घ्राणा नैवेद्यास्वादजिह्वकाः ।। 29

शिवध्यानैकहृदया न ते दुःखस्य भाजनम् ।
तेषां हि सफलं जन्म कृतार्थाः शाम्भवोत्तमाः ।। 30

भवनानि मनोज्ञानि मङ्गलाभरणाः स्त्रियः ।
धनं च दिष्टपर्यन्तं मम पूजाविधेः फलम् ।। 31

तुरङ्गवरमातङ्गगोमहिष्यादिकोटयः ।
तद्द्वारि वरवृक्षाश्च नित्यं सन्निहिताः शिवे ।। 32

ये वाञ्छन्ति महाभाग्यं राज्यं च त्रिदशालयम् ।
ब्रह्त्वं वाऽथ विष्णुत्वंमिन्द्रत्वं वापि पार्वति ।। 33

तेऽर्चयन्ति सदाकालं ममैव चरणाम्बुजम् ।
सौभाग्यं कान्तिरारोग्यं शौर्यं त्यागः प्रभावता ।। 34

यशश्च जगति ख्यातिः शिवमर्चयतो भवेत् ।
देवासुरेषु मुनिषु यद्यदुत्कृष्टमीश्वरि ।। 35

तत्सर्वं मत्प्रसादेन लब्धमीशे शिवार्चनात् ।
ममैव पूजया विष्णुः पालयेज्जगतीत्रयम् ।। 36

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ममैव पूजया ब्रह्मा जगत्सृष्टिं करोत्यपि ।
ममैव पूजया रुद्रोऽप्यन्ते संहरते जगत् ।। 37

ममैव पूजया शक्रः पालयत्यमरावतीम् ।
ममैव पूजया देवि दिक्पाला वरुणो यमः ।। 38

वसवो द्वादशादित्या मरुतोऽप्यश्विनावपि ।
रुद्रा एकादशगणा सूर्याद्या ग्रहनायकाः ।। 39

मनवो मुनयः सिद्धा गन्धर्वा गरुडाः खगाः ।
यक्षकिम्पुरुषा नागा नृपा ये कालसम्भवाः ।। 40

युगे युगे प्रजा यास्ता सर्वे मत्पूजया वराः ।
भान्त्येव भानवः सर्वे वान्ति वाताः सदा शिवे ।। 41

वर्षन्त मेघाः सततं पान्ति दिक्पतयो जगत् ।
ज्योतींष्यपि प्रकाशन्ते नगा नागाश्च भूधराः ।। 42

शेषोऽप्यशेषशिरसा भुवं धत्ते शिवार्चनात् ।
स्वांशुभिः पोषयत्येव सोमोऽप्योषधिमण्डलम् ।। 43

नद्यः समुद्राश्च तथा नोद्वेलाः संवहन्त्यपि ।
किं शिवे बहुनोक्तेन सर्वं मत्पूजया स्थिरम् ।। 44

चरं वाप्यचरं वाद्य जगच्चक्रं प्रवर्तते ।
नारुद्रः संस्मरेद्रुद्रं नारुद्रो रुद्रमर्चयेत् ।। 45

नारुद्रः कीर्तयेद्रुद्रं नारुद्रो रुद्रमाप्नुयात् ।
सम्पर्कात् कौतुकाल्लोभात् भयाद्वापि च संस्मरेत् ।। 46

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कीर्तयेदर्चयेद्यो मां स मे प्रियतरो गणः ।
शिवधर्मस्य सारोऽयं शिवभक्तिः सुनिश्चला ।। 47

सा चाष्टाङ्गा मया चोक्ता कार्या नित्यं विशेषतः ।
मद्भक्तजनवात्सल्यं पूजायाश्चानुमोदनम् ।। 48

स्वयमभ्यर्चनं भक्त्या ममार्थे चाङ्गचेष्टनम् ।
मत्कथाश्रवणे भक्तिः स्वरनेत्रषु विक्रिया ।। 49

ममानुस्मरणं नित्यं यश्च मां नोपजीवति ।
भक्तिरष्टविधाह्येषा या हि म्लेच्छेऽपि वर्तते ।। 50

स शाम्भवो मुनिश्रेष्ठः स यतिः स च पण्डितः ।
न मे प्रियश्चतुर्वेदी सत्रयाज्यपि शङ्करि ।। 51

ब्राह्मणो वान्त्यजो वापि मद्भक्तः श्वपचो वरः ।
तस्मै देयं ततो ग्राह्यं स हि पूज्यो यथाह्यहम् ।। 52

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ।। 53

नार्चयेद्यस्सदाऽऽत्मस्थं यो मां समयमास्थितः ।
स मां पर्वतदुर्गेषु मार्गमाणो न पश्यति ।। 54

यो मां सर्वगतं पश्येत् सर्वं च मयि पश्यति ।
तस्याहं नित्यमात्मस्थः स च नित्यं मयि स्थितः ।। 55

सुदुर्लभा शिवे भक्तिः दुर्लभं च शिवार्चनम् ।
सुदुर्लभं शिवे दानं शिवहोमश्च दुर्लभः ।। 56

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सुदुर्लभं शिवज्ञानं तदभ्यासोऽतिदुर्लभः ।
सुदुर्लभतरं ज्ञेयं जपध्यानं शिवात्मकम् ।। 57

अत्यन्तदुर्लभं देवि शिवलिङ्गे शिवार्चनम् ।
सुदर्लभा तु तद्भक्तिः तदभ्यासोऽतिदुर्लभः ।। 58

सुदुर्लभमिदं ज्ञात्वा शिवभक्तिं समाश्रयेत् ।
लाभस्तेषां जयस्तेषां यशस्तेषां पदे पदे ।। 59

ये शिवं शरणं प्राप्ताः शिवार्चनपरायणाः ।
येषां दिवा च रात्रौ च नित्यं शिवगता स्मृतिः ।। 60

"नमः" कारादि संयुक्तं शिवायेत्यक्षरत्रयम् ।
जिह्वाग्रे वर्तते यस्य सफलं तस्य जीवितम् ।। 61

यदङ्गं भस्मसंयुक्तं त्रिपुण्ड्रललितालिकम् ।
रुद्राक्षमालाभरणं चन्द्रचूडालयं शिवे ।। 62

जातेनात्मद्रुहा येन भगवान्न समर्चितः ।
स चिरं सञ्चरत्यस्मन् संसारे दुःखसागरे ।। 63

दुर्लभं प्राप्य मानुष्यं न मूको बधिरो भवेत् ।
यदि सर्वगता सिद्धिर्विप्रत्वं च नरेषु च ।। 64

इहामुत्रसुखावाप्त्यै शिवे भक्तिं समाश्रयेत् ।
दुर्लभा दुर्लभा देवि मम भक्तिः सुदर्लभा ।। 65

मुक्तिदा मोक्षदात्री च पशुपाशनिकृन्तनी ।। 66

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ईश्वर उवाच -

ये काल कालकलनेन नयन्ति कालं
शीलेन कालनयनं यजतस्त्रिकालम् ।
धन्यास्त एव जगतीतलचारिरुद्रा
विद्रावितघनिचया शुचयो भवानि ।। 67

क्षणं क्षीणाघौघः कलयति कृतान्तान्तकमुमे
निरातङ्क शान्तो भवभयजतान्तो मुहुरहो ।
तनुः शेषे शेषो भवति विपुले चायुषिरये (?)
विशेषो नो भाग्ये प्रशिथिल वातौ क्षोणिवलये (?)

वैराग्यभाग्य रहितस्य भवोरुदुःखं
सञ्जानतो जनिविनाशनलोकजालम् ।
आलोकयन्नघ कुलाकुलशीलनेन
आरोग्य भाग्यरहिताः प्रलयन्त्यभाग्याः ।।

।। इति श्रीशिवरहस्ये एकादशाम्शे द्वितीयोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। तृतीयोऽध्यायः ।।

पार्वत्युवाच -

लिङ्कार्चनविधिं पुण्यं श्रोतुमिच्छामि शङ्कर ।
त्वत्प्रसादादशेषेण भगवन् चन्द्रशेखर ।। 1

यत्पुण्यस्थापिते लिङ्गे कृते यच्च शिवालये ।
मृदावेष्टकपाषाणसुधाभिः परिकल्पिते ।। 2

लिङ्गबेरप्रतिष्ठायां चरस्थावरपूजने ।
सम्मार्जनेन यत्पुण्यं यत्पुण्यसुपलेपने ।। 3

नीराजनौषधीबीजस्वानमङ्गलवादनैः ।
वाहनोत्सवदीपानां प्रदाने वा कियत्फलम् ।। 4

यत्पुण्यमर्घ्यदानेन तोयस्नानेन यद्भवेत् ।
क्षीरस्नानेन यत्पुण्यं शर्कराभिर्महेश्वर ।। 5

मधुस्नानेन यत्पुण्यं तथा पुण्ड्रेक्षुसारतः ।
पञ्चगव्यवरस्नाने तैलाभ्यङ्गेन यद्भवेत् ।। 6

गन्धचन्दनतोयैश्च कर्पूरागरुमिश्रितैः ।
नारिकेलाम्बुजम्बीरमोचाम्रवरपानसैः ।। 7

तत्तद्रसवरैःशम्भोरभिषेके फलं च किम् ।
स्वर्णरत्नादितोयैश्च पुष्पमिश्राम्बुभिः सह ।। 8

कर्पूरागरुतोयैश्च वस्त्रपूतैश्च वारिभिः ।
सहस्रधाराकलशैः शतधाराघटैस्तथा ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सहस्रशतसङ्खयानां स्नापनैः पुण्यवारिभिः ।
नदीनदसमुद्राणां वापीकूपोदकैस्तथा ।। 10

गवां शृङ्गोदकस्नाने कुशोदकविशोधने ।
यवगोधूमपिष्टानां लेपनस्नपनेऽपि च ।। 11

विलेपनैश्च गन्धाद्यैर्विलिप्तेन(विलेपेन)च यद्भवेत् ।
सुवर्णरौप्यताम्रादिकांस्यपैत्तिलमार्तिकैः ।। 12

दारवाश्ममयैः पात्रैस्तथा पर्णपुटैरपि ।
पात्रकल्पनतो वापि किं फलं स्यान्महेश्वर ।। 13

श्रीखण्डागरुकस्तूरीमिश्रगन्धविलेपने ।
यक्षकर्दमजालेपे फलं स्याच्छिवपूजने ।। 14

हेमकार्पासकौशेयवस्त्रदाने च यत्फलम् ।
घृततैलवराणां च कर्पूरवरदीपतः ।। 15

फलं कियन्महादेव धूपेषु परमेश्वर ।
साम्राणिगुग्गुलु कृते बिल्वत्वक्परिकल्पिते ।। 16

पञ्चवर्णकपिष्टैश्च रङ्गवल्या च किं फलम् ।
किं फलं स्याच्छिवे दत्ते वद शङ्कर सर्वग ।। 17

मुक्तापुष्पार्चने यस्य मालाभिर्लिङ्गपूजने ।
पुष्पमण्टपिकायाश्च पुष्पमालावलम्बने ।। 18

तथा पुष्पविशेषे च ग्राम्यारण्योद्भवेषु च ।
किं फलं श्रीमहादेव बिल्वैरभ्यर्चने कृते ।। 19

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नवरत्नादिपूजासु स्वर्णरौप्य सुमेषु च ।
नवधान्यमहापूजाफलं किं वा महेश्वर ।। 20

अन्नाभिषेके यत्पुण्यं अविच्छिन्नाम्बुधारया ।
अभिषेके कियत्पुण्यं फलं किं वा महेश्वर ।। 21

उद्वर्तनान्तरस्नाने कोष्णेन च सुवरिणा ।
नानारत्नादिमालानां प्रदाने च महत्फलम् ।। 22

रत्नगोलकदाने वा स्वर्णरौप्यविनिर्मिते ।
सहस्रशतदीपानां दर्शने च कियत्पलम् ।। 23

यवगोधूमशाल्यन्नभक्ष्यभोज्यप्रदानतः ।
शाकापूपादिदाने च फलं वद निवेदने ।। 24

छत्रदाने महादेव चामराणां प्रदानतः ।
तालवृन्तमयूराच्छपक्षव्यजनवीजने ।। 25

चित्रध्वजपताकानां दर्पणानां च दर्शने ।
ताम्बूलदाने यत्पुण्यं *वादित्राणां प्रदानतः ।। 26

घण्टावादित्रशङ्खानां काहलानां च वादने ।
वेणु वीणामृदङ्गानां दुन्दुभीनां रवेषु च ।। 27

स्त्रीणां सङ्गीतनाट्येन कृतेन च फलं कियत् ।
रथोत्सवादिकरणैर्नगरान्तः परिभ्रमैः ।। 28

---

* वादित्रध्वाननैस्तथा ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कियत्फलं महादेव महेभर्षभवाहने ।
वितानदाने यत्पुण्यं बलिहोमक्रियासु किम् ।। 29

गवाश्वभृत्यनागानां भूमिदाने महेश्वर ।
ग्रामखेटपुराणां च देशदाने च यत्फलम् ।। 30

नीलोत्पलसहस्राणां मालादाने फलं च किम् ।
स्वर्णमाल्योपहारेण पुंसां पुण्यं च यद्भवेत् ।। 31

तत्पालनापहारेण पुण्यापुण्यं च यद्भवेत् ।
प्रातःकालार्चने किं वा मध्याह्ने वा फलं कियत् ।। 32

सायन्तने प्रदोषे वा निशीथे वा महेश्वर ।
भूतासु सोमवारेषु अष्टमीषु च पर्वसु ।। 33

शिवरात्र्यां महादेव पूजया किं फलं भवेत् ।
तिथिनक्षत्रपूजायां मासि मास्यर्चनेन किम् ।। 34

मासि मासि च पूजासु द्रव्ये लिङ्गेषु किं फलम् ।
प्रदक्षिणानमस्कारे स्तुतौ वा च कियद्भवेत् ।। 35

शिवक्षेत्रे नदीतीरे गोष्ठे वा वनपर्वते ।
बिल्वमूलेषु पूजायां कियत्फलमुदीरितम् ।। 36

घृतकम्बलपूजाभिः पवित्रारोपणे शिवे ।
श्रावणे कार्तिके वापि पूजया किं फलं भवेत् ।। 37

धनुर्मास्युषसि प्रीत्या पूजया किं फलं भवेत् ।
ग्रहणे सोमसूर्याणां विषुवायनयोरपि ।। 38

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सङ्क्रान्तौ च व्यतीपाते महापूजाप्रकल्पने ।
स्नानाभ्यङ्गे किं फलं स्यात् वद मे करुणाकर ।। 39

शिवारामकराणां च पुष्पार्थं शिवपूजने ।
किं बिल्ववनकर्तॄणां वापीकूपक्रियासु च ।। 40

शिवालये विशेषेण शिवक्षेत्रेषु वा पथि ।
छायावृक्षाग्रहाराणां करणे शाम्भवेषु च ।। 41

वेदानां पठने वापि ब्रह्मचारिप्रपोषणे ।
यतीनांमन्नपानादि *वटोपकरणानि च ।। 42

नमस्कारे तथा तेषां प्रत्युत्थानाभिवादने ।
भिक्षां प्रतिग्रहं वस्त्रं दत्वाथ शिवयोगिषु ।। 43

सर्ववर्णे शाम्भवेषु दत्वान्नं लभते फलम् ।
शिवप्रीत्यर्थमेवेह मखानां करणे च किम् ।। 44

शिवभक्तार्चने किंस्यात् फलं मे वद शङ्कर ।
तत्सर्वं कृपया पुण्यं सुसूक्ष्ममपि तद्वद ।। 45

सुगोप्यमपि देवेश यद्यनुग्राह्यता मयि ।
नाहं वदाम्यभक्तेषु सत्यं सत्यं महेश्वर ।। 46

अस्मिन् कैलाससदने मदनान्तकरप्रिये ।
शपामि शिवपादाब्जे त्रिः नात्र संशयः ।। 47

---

* वस्त्रो

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

देव्युवाच -

एवं ये शिवधर्मसारमतुलं कुर्वन्ति तेषां फलं
किं वा स्यात्परमेश्वर त्रिभुवने तन्मे वदैवादरात् ।
एवं त्वत्पदपूजनैकमतयो भक्तास्त एव ध्रुवं
पुण्यं चाद्य दरिद्रकेषु च कथं प्राप्नोति तच्छङ्करम् (?)

स्कन्द उवाच -

इत्थं पर्वतनन्दिनीप्रियवचोवीचीभिरालावितः
सद्योहृद्यमभेद्यमद्भुतमहाधर्मेषु सारं शिवः ।
प्राहानन्दभरेण भावितमहानन्दैकसारादरो
मोचाधिक्यसुधाधरीकृतमहावाचा नगेन्द्रात्मजाम् ।। 49

।। इति श्रीशिवरहस्ये एकादशाम्शे शिवगौरीसंवादे
शिवधर्मप्रश्नो नाम तृतीयोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। चतुर्थोऽध्यायः ।।

ईश्वर उवाच -

शृणु पर्वतराजेन्द्रतनये गोप्यमप्यथ ।
अप्रकाश्यं न ते देवि त्वत्तः प्रियतरा न मे ।। 1

तेन ते चाखिलं वक्ष्ये शृणुष्वैकाग्रमानसा ।
पूर्वमेकार्णवे घोरे नष्टे स्थावरजङ्गमे ।। 2

विवादः सुमहानासीत् ब्रह्मविष्ण्वोः परस्परम् ।
अहं कर्ता ह्यहं कर्ता न मत्तोऽन्यो जगत्पिता ।। 3

एवमाह हरिं ब्रह्मा ब्रह्माणं च हरिस्तदा ।
तयोर्दर्पापहाराय प्रबोधार्थं च देवयोः ।। 4

मध्ये समभवल्लिङ्गंमैश्वरं तैजसं परम् ।
ज्वालामालावृतं दिव्यमप्रमेयमनूपमम् ।। 5

योजनायुतविस्तीर्णं स्थितं तत्राऽमलाम्भसि ।
ज्वालाभिर्मोहितौ तस्य लिङ्गस्यासुरसत्तमे ।। 6

तदा विस्मयमापन्नौ अद्राष्टाममराधिपौ ।
गतावूर्ध्वमधस्तस्य सम्प्रधार्य परस्परम् ।
अधो द्रष्टुं गतो विष्णुरगादूर्ध्वं पितामहः ।। 7

अदृष्ट्वा तमधश्चोर्ध्वं तौ समेत्य परस्पम् ।
कृताञ्जलिपुटौ भूत्वा लिङ्ग तत् तुष्टुवतुस्तदा ।। 8

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ब्रह्मविष्णू ऊचतुः -

अनादिदेव देवेश विश्वेश्वर महेश्वर ।
सर्वज्ञ ज्ञानविज्ञानप्रदामेय नमोऽस्तु ते ।। 9

अनेक(अनन्त)कान्तिसम्पन्न अनन्तासनसंस्थित ।
अनन्तशक्तिसंभोग परमेश नमोऽस्तुते ।। 10

परात्परतरातीत उत्पत्तिस्थितिकारण ।
सर्वार्थसाधनोपाय विश्वेश्वर नमोऽस्तुते ।। 11

बहुरूप महारूप सर्वरूपोत्तमोत्तम ।
पशुपाशार्णवातीत वृषभारूढ ते नमः ।। 12

स्वप्रभानिर्मलामेय सर्वस्वामिन् महेश्वर ।
योगिवर्य महायोगिन् योगेश्वर नमोऽस्तु ते ।। 13

निरञ्जन निराधार स्वाधार निरुपप्लव ।
प्रपन्नशरणेशान योगातीत नमोऽस्तुते ।। 14

जिह्वाचपलभावेन यदिदं गादितं मया (प्रभो) ।
तत्क्षन्तव्यमनौपम्य कस्ते स्तौति गुणार्णवम् ।। 15

नमस्ते नामलिङ्गाय शिवलिङ्गाय ते नमः ।
नमस्ते गूढलिङ्गाय परलिङ्गाय भो(यो)गिने ।। 16

नमस्ते ज्योतिलिङ्गाय देवलिङ्गाय लिङ्गि ने ।
(ज्योतिर्लिङ्गाय ते देवलिङ्गायार्लिङ्गिने नमः)
नमस्ते सूक्ष्मलिङ्गाय बुद्धिलिङ्गाय बुद्धये ।। 17

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नमः पर्वतलिङ्गाय भावलिङ्गाय ते नमः ।
जगत्कारणलिङ्गाय जगतां पतये नमः ।। 18

आवयोः पतये चैव
नमोऽस्मत्पतये(तुभ्यं) चैव धर्माणां पतये नमः । (?)
लिङ्गोत्पत्तिस्तवं पुण्यं यः शृणोति नरः सदा ।। 19

नोत्पद्यते हि संसारे स्थानमाप्नोति शाश्वतम् ।
तस्मात्सर्वप्रयत्नेन शृणुयाद्वाचयेत्तथा ।। 20

पापकञ्चुकमुत्सृज्य प्राप्नोति परमं पदम् ।
एवं स्तुत्वा महादेवं प्रणम्य शिरसा प्रभुम् ।। 21

ब्रह्मविष्णू समापन्नौ भक्त्या परमया युतौ ।
लिङ्गमध्ये परंलिङ्गं स्थितं प्रादेशसम्मितम् ।। 22

समाधिस्तोत्रसम्पन्नौ दृष्टवन्तौ शिवात्मकम् ।
नैव तत्काञ्चनं रौप्यं नाभूत् स्फाटिकमौक्तिकम् ।। 23

लक्षमात्रं स्थितं शान्तं केवलं तच्छिवात्मकम् ।
तयोस्तुष्टो महादेवः प्रदाय वरमुत्तमम् ।। 24

कारणत्वमनुज्ञाय तत्रैवान्तरधीयत ।
तदा प्रभृति ब्रह्माद्या प्रतिष्ठाप्य सुरासुराः ।। 25

तल्लिङ्गानुकृतं लिङ्गं पूजयेयुस्तपोधनाः ।
परं शुद्धशरीरं च लिङ्गक्षेत्रमनादिमत् ।। 26

यदेतदैश्वरं तेजस्तल्लिङ्गं पञ्चसंज्ञितम् ।
कल्पान्ते तस्य लिङ्गस्य लीयन्ते सर्वदेवताः ।। 27

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

दक्षिणे लीयते ब्रह्मा वामतस्तु जनार्दनः ।
हृदये चैव गायत्री सर्ववेदोत्तमोत्तमा ।। 28

लीयन्ते मूर्ध्नि वै वेदाः सषडङ्गपदक्रमाः ।
जठरे लीयते सर्वं जगत्स्थावर जङ्गमम् ।। 29

उत्पद्यते पुनस्तस्मात् ब्रह्मादि सचराचरम् ।
आकाशं लिङ्गमित्याहुः पृथिवी तस्य पीठिका ।। 30

आलयः सर्वभूतानां लयनाल्लिङ्गमुच्यते ।
तस्माल्लिङ्गं प्रतिष्ठाप्य सर्वदेवभवोद्भवम् ।। 31

स्थापितं तेन सर्वं स्यात्पूजितं च न संशयः ।
कृताञ्जलिपुटो विष्णुर्ब्रह्मा चापि विशेषतः ।। 32

पूर्वं लिङ्गं समभ्यर्च्य पश्चात्कर्माणि चक्रतुः ।
ब्रह्मा ब्रह्माक्षरैर्दिव्यैर्लिङ्गं पूजयते सदा ।। 33

गन्धपुष्पादिभिर्नित्यं विष्णुः पूजयते शिवम् ।
ब्रह्मा शैलमयं भक्त्या लिङ्गं पूजयते सदा ।। 34

तस्य सम्पूजनादेव प्राप्तं ब्रह्मत्वमुत्तमम् ।
इन्द्रनीलमयं लिङ्गं विष्णुरर्चयते सदा ।। 35

विष्णुत्वं प्राप्तवांस्तेन विश्वव्याप्तं सनातनम् ।
शक्रोऽपि देवदेवस्य लिङ्गं मणिमयं शुभम् ।। 36

नित्यमर्चयते भक्त्या तेन शक्रत्वमाप्तवान् ।
लिङ्गं हेममयं कान्तं धनदोऽर्चयते सदा ।। 37

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तेनासौ धनदो देवो धनदत्वमवाप्तवान् ।
विश्वेदेवा महात्मानो रौप्यलिङ्गमयं हरम् ।। 38

अर्चन्ति विधिवत्तेन विश्वेदेवक्त्वमाप्नुवन् ।
वायुः पूजयते नित्यं लिङ्गं पैत्तलसम्भवम् ।। 39

वायुत्वं तेन सम्प्राप्तं सर्वप्राणिशरीराम् ।
वसवः कांस्यकं लिङ्गं पूजयन्ति विधानतः ।। 40

प्राप्तास्तेन महात्मानो वसुत्वं सुमहोदयम् ।
अश्विनौ पार्थिवं लिङ्गं वरुणोऽर्चयते सदा ।। 41

तेनेव वरुणत्वं हि प्राप्तवानप्पतित्वताम् (?) ।
लिङ्गमन्नमयं देवि हव्यवाड् यजति स्वयम् ।। 43

अग्नित्वं प्राप्तवांस्तेन तेजोरूपगुणान्वितम् ।
ताम्रलिङ्गं सदाकालं भक्त्या देवो दिवाकरः ।। 43

त्रिकालं यजते तेन प्राप्तं सूर्यत्वमुत्तमम् ।
मुक्ताफलमयं लिङ्गं सोमः पूजयते सदा ।। 44

तेन सोमत्वमापन्नः सर्वकान्तशरीरभृत् ।
प्रवालकमयं लिङ्गं नागाः सम्पूजयन्त्यपि ।। 45

तेन नागाःसुभोगाढ्याः पाताले नित्यमास्थिताः ।
कृष्णायसमयं लिङ्गं पूजयन्त्यसुरोत्तमाः ।। 46

राक्षसा दैत्यनाथाश्च तेन तेऽमितविक्रमाः ।
त्रपुसीसमयं लिङ्गं पिशाचाः पूजयन्ति हि ।। 47

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

गन्धर्वाप्सरसो यक्षा यातुधाना महेश्वरि ।
वज्रवैडूर्यगोमेदै(द)पुष्परागोद्भवानि च ।। 48

लिङ्गानि पूजयन्त्येव भक्त्या सर्वेश्वरस्य हि ।
तेन ऋद्धिबलोपेताः प्राप्तास्ते परमं पदम् ।। 49

त्रैलोहिकं महालिङ्गं यजन्ते गुह्यकाः सदा ।
तेन भोगबलोपेताः प्रयान्ति परमं पदम् ।। 50

वन्यदारुभवं लिङ्गं यजन्ते मातरः सदा ।
मातृत्वं प्रप्य ताः सर्वाः प्रयान्त्येव महेश्वरम् ।। 51

मुनयो मनवो यक्षा रक्षोरगमरुद्गणाः ।
देवदैत्याः सगन्धर्वा विद्याधरमहोरगाः ।। 52

पूजयन्ति शिवे लिङ्गे मामीशं देवनायकम् ।
सर्वो लिङ्गमयो लोकः सर्वो लिङ्गे प्रतिष्ठिचः ।। 53

तस्मात्सम्पूजयेल्लिङ्गं यदीच्छेत्सिद्धिमात्मनः ।
लिङ्गे त्वयाहं देवेशि सर्वदा संस्थितो ह्यहम् ।। 54

अनुग्रहाय लोकानां तथा लिङ्गे प्रपूजयेत् ।
(तस्माल्लिभ्मं प्रपूजयेत्)
यो न पूजयते लिङ्गे मामीशं भुवनेश्वरि ।। 55

नासौ स्वर्गस्य मोक्षस्य नैव राज्यस्य भाजनम् ।
तस्मादेकमना देवि यावज्जीवं प्रतिज्ञया ।। 56

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अर्चयीत सदा(अर्तयेत् सर्वदा) लिङ्गे
मामीशं भुवनेश्वरि ।
वरं जीवपरित्यागः स्वशिरश्छेदनं वरम् ।। 57

नत्वनभ्यर्च्य भुञ्जीयात् (भुञ्जीत)
भगवन्तं महेश्वरम् ।
देवि लिङ्गार्चनात्पुण्यमधिकं नास्ति किञ्चन ।। 58

इति विज्ञाय यत्नेन पूजनीयः सदाशिवः ।
नास्ति लिङ्गार्चनसमं तपो वा गिरिकन्यके ।। 59

तपोऽन्यत्क्षरते सर्वममुत्रफलभोगतः ।
तल्लिङ्गार्चनपुण्यस्य क्षयो नास्ति गिरीन्द्रजे ।। 60

वर्धते भक्तिभावेन अल्पमप्यन्ततः कृतम् ।
यो वा लिङ्गार्चनं द्वेष्टि धिक् धिक् तस्य कुमानसम् ।।61

स खरोत्पन्न एव स्याद्ब्राह्मणोऽपि स चान्त्यजः ।
तादृशं तु सकृत् दृष्ट्वा सवासा जलमाविशेत् ।। 62

नरो नरकगामीस्यात्तस्य सम्भाषाणादपि ।
महोश्वरं महादेवं ये द्विषन्ति महीतले ।।। 63

ते कृतघ्ना भवन्तीह ये न भक्ता महेश्वरे ।
रुद्रपिण्डसमुद्भूता ब्राह्मणा रुद्रदेवताः ।। 64

तस्माद्रुद्रार्चनं श्रेष्ठं ब्राह्मणानां महेश्वरि ।
तस्माल्लिङ्गार्चनं सर्वैः कार्यं वर्णाश्रमैरपि* ।। 65

---

* वर्णाश्रमादरैः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तस्मात्सर्वेषु भूतेषु गतिर्देवो महेश्वरः ।
तस्मात्सर्वप्रयत्नेन (पूज्यो)पतिर्देवो महेश्वरि ।। 66

सागराणां क्षयोऽस्त्येव क्षीयते हिमवानपि ।
रुद्रार्चनजपुण्यस्य क्षयो नास्त्येव शङ्करि ।। 67

एष्टव्या बहवः पुत्राः शिवलिङ्गार्चकाः सदा ।
यद्येको मम लिङ्गार्चां करिष्यति धरातले ।। 68

समुद्धरन्ति ते गोत्रं रज्जुः कूपाद्घटं यथा ।
समुद्धृत्य तथा यत्नात्कुलानामेकविंशतिम् ।। 69

शिवत्वं यान्ति ते क्षिप्रं धर्माधर्मविवर्जिताः ।। 70

ईश्वर उवाच -

लिङ्गोत्पत्तिस्तवमिममुमे यः शृणोतीह भक्त्या
तस्यापारमहाघसङ्घनिचयः सद्यो विनाशं व्रजेत् ।
लिङ्गस्थापनपुण्यमप्यतितरां सम्प्राप्य गाणत्वम-
प्यन्ते याति ममाद्रिराजशिखरे सत्यं वदाम्यद्रिजे ।। 71

।। इति श्रीशिवरहस्ये एकादशाम्शे शिवगौरीसंवादे
लिङ्गोत्पत्तिस्तवो नाम चतुर्थोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। पञ्चमोऽध्यायः ।।

स्कन्द उवाच -

एवं देव्या तदा पृष्टो महादेवोऽभ्युवाच ताम् ।
लिङ्गप्रतिष्ठासु विधिं देव्यै प्रोवाच शङ्करः ।। 1

जैगीषव्य उवाच -

लिङ्गप्रतिष्ठाविधिं तं मे वद विशेषतः ।
सुरैश्च गणवृन्दैश्च श्रोतुमुत्कण्ठितं मनः ।। 2

सूत उवाच -

तस्य स्कन्दो मुनेः श्रुत्वा वचनं प्रत्यभाषत ।

स्कन्द उवाच -

पुराकैलासशिखरे सुखासीनं जगत्प्रभुम् ।। 3
पार्वती प्रणता प्राह महादेवं घृणानिधिम् ।

पार्वत्युवाच -

देवदेव महादेव महाकारुणिकोत्तम ।। 4

लिङ्गप्रतिष्ठामाहात्म्यं वद मे परमेश्वर ।
यत्पुण्यं स्थापिते लिङ्गे स्थावरे वाऽथ जङ्गमे ।। 5

किं तत्पुण्यफलं शम्भो कस्मिन् काले विशेषतः ।
कोऽधिकारी विशेषेण आगमे वैदिकेऽपि वा ।। 6

केषु स्थानेषु भगवन् प्रतिष्ठा सुफलप्रदा ।
प्रसीद दयया शम्भो हृच्छयं वक्तुमर्हसि ।। 7

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

श्रीमहादेव उवाच -

शृणु पद्मपलशाक्षि प्रतिष्ठाविधिमुत्तमम् ।
शिवलिङ्गस्य मे देवि जङ्गमस्थावरस्य च ।। 8

शिवक्षेत्रे गिरौ नद्यां वने गङ्गातटे शुभे ।
हिमालये च केदारे वाराणस्यां महेश्वरि ।। 9

गङ्गादिसङ्गमे वापि वैद्यनाथे कुरुस्थले ।
तथा भद्रवटे पुण्ये रुद्रकोटौ प्रभासके ।। 10

पुष्करे च तथोङ्कारे लिङ्गं स्थाप्य सुपुण्यभाक् ।
कृष्णवेण्याः पयोष्ण्याश्च गोदावर्या महेश्वरि ।। 11

तुङ्गायाश्चाथ पम्पाया वेगवत्यास्तथा तटे ।
क्षिप्राया नर्मदायाश्च गङ्गायमुनयोस्तटे ।। 12

तटेषु भीमरथ्याश्च चर्मण्वत्या महेश्वरि ।
कवेरजायास्तीरेषु क्षेत्रेष्वेतेषु शङ्करि ।। 13

श्रीकण्ठे च तृणावर्ते मातृरत्नगिरौ तथा ।
जम्बुकेशे पञ्चनदे कुम्भघोणेऽर्जुने तथा ।। 14

श्वतारण्ये ब्रह्मवने पुण्ये छायावने शुभे ।
तथा दभ्रसभायां वा वृद्धाद्रौ गोणगे तथा ।। 15

लिङ्गप्रतिष्ठादेशाः स्युर्नदीक्षेत्राण्यमूनि मे ।
पुण्यानि च प्रतिष्ठासु नवारण्यानि शङ्करि ।। 16

नैमिशं दण्डकारण्यं ब्रह्मारण्यं महेश्वरि ।
कुशारण्यं देववनं रुद्राण्यं बृहद्वनम् ।। 17

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कालञ्जरं पद्मवनं सप्तपुर्योऽत्र पुण्यदाः ।
प्रतिष्ठायां महादेवि शिवलिङ्गस्य सत्तमे ।। 18

अयोध्या मधुरा माया काशी काञ्ची अवन्तिका ।
पुरी द्वारवती देवि प्रतिष्ठासु महाफलाः ।। 19

कुलाचलेष्वपीशीनी प्रतिष्ठा सुमहाफला ।
निषधः कुमुदो विन्ध्यः पारियात्रश्च नीलकः ।। 20

मेरुदर्दरकैलासौ दक्षिणे हेमकूटकः ।
कुलाचलेष्वथैतेषु स्थाप्य लिङ्गं महाफलम् ।। 21

महाकैलासमौलौ तु शिवलिङ्गप्रतिष्ठितिः ।
दुर्लभा सर्वदेवानां मनुष्याणां तु किं पुनः ।। 22

सर्वक्षेत्रनदीतीरवनपर्वतमौलितः ।
विशिष्टाऽत्र महादेवि कोटिकोटिगुणाधिका ।। 23

स्वायम्भुवं तथा दैवमार्षं मानुषमेव च ।
स्वायम्भुवस्य लिङ्गस्य परितः क्रोशमेव हि ।। 24

तत्र वासो विशिष्टानां भवतीत्येव मे मनः ।
तत्रैव मरणाज्जन्तोः शिवलोको न संशयः ।। 25

देवेचापि तदर्धंस्यात्परिमाणं च मानुषे ।
बाणं स्वयम्भुतुल्यं स्यात्क्षेत्रमानं सदैव हि ।। 26

क्षेत्रे लिङ्गस्थापनाच्च पुण्यं नद्यास्तटे शतम् ।
वनेषु स्थापितं तस्मात्ततोऽपि गिरिमौलिगम् ।। 27

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नवधातुजलिङ्गानि समुत्कृष्टानि शङ्करि ।
नवरत्नोद्भवान्येव महोत्कृष्टानि शैलजे ।। 28

ततो रसेन्द्रकलितं वाणलिङ्गं ततोऽधिकम् ।
न प्रतिष्ठा न च स्पर्शो बाणलिङ्गेषु विद्यते ।। 29

सपीठमस्त्वपीठं वा बाणलिङ्गं प्रपूजयेत् ।
बाणलिङ्गं तु शूद्रेण यदि देवि प्रतिष्ठितम् ।। 30

सर्वेषां दर्शनार्चासु अधिकारो भविष्यति ।
केवलं स्याच्छिलालिङ्गं न दृश्यं सर्वथा द्विजैः ।। 31

[1]सर्वथामरकतं लिङ्गं न कार्यं रत्नवर्जितम् ।
धातुजं चाङ्गुलैः षड्भिःस्फाटिकं स्याद्यथोचितम् ।। 32

वितस्तिमात्रं मृल्लिङ्गं कार्यं वै सर्वदा शिवे ।
ततो न्यूनं हरेदायुर्बाणं प्रादेशसंमितम् ।। 33

गृहस्थैश्च गृहे पूज्यं स्थावरेषु ततोऽधिकम् ।
लिङ्गमस्तकविस्तारो लिङ्गोच्छायसमः शिवे ।। 34

[2]वेधा च तद्द्विगुणिता तद्वत्पीठमुमे स्थितम् ।
गोमुखी तद्द्विगुणिता पञ्चसूत्रं विदुःशिवे ।। 35

पञ्चपातकनाशाय पञ्चसूत्रं विदुःसदा ।
न्यूनाधिके हरेदायुः कीर्त्यारोग्यविनाशनम् ।। 36

---

1. हीनमामलकाल्लिङ्गं न कार्यं रत्नवर्जितम् ।
2. वेधा - a hole, an excavation, The depth of an excacvation.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सर्वद्रव्यकृतं लिङ्गं पञ्चसूत्रं प्रशस्यते ।
नैवायं नियमो देवि स्वयम्भूतेऽथ शस्यते ।। 37

अरत्निमात्रादूर्ध्वं यत्स्थावरं लिङ्गमेव हि ।
न स्थाप्यं तद्गृहे गौरि स्थाप्यं तच्च शिवालये ।। 38

प्रतिमा वा महेशस्य देवतानां महेश्वरि ।
वितस्तिमात्रादूर्ध्वं चेन्नार्च्याऽसौ वै गृहे सदा ।। 39

मृद्धातुनिर्मिता वा स्यात् पाषाणप्रभवाऽथवा ।
प्रतिष्ठाप्यार्चयेत्सा तु तदूर्ध्वा स्याच्छिवालये ।। 40

मूर्तयोऽष्टौ महेशस्य पञ्चविंशत्परीमिताः ।
समाकारा स्य(स्व)नेत्रान्ताः प्रतिष्ठाप्य गणो भवेत् ।। 41

गृहे शिवालये वापि मूर्तयोऽमी(मूः) महेशितुः ।
उमासहायो नृत्तेशो दक्षिणामूर्तिरेव वा । 42

कङ्कालो लिङ्गभागस्थस्तथा शूलधरोहरः ।
चन्द्रचूडो वृषाङ्कस्थोऽप्यर्धनारीश्वरः शिवे ।। 43

कपालपाणिर्वरदो विष्णवे ब्रह्मणे शिवे ।
दिगम्बरः कालनाशो गजचर्मपरीवृतः ।। 44

कैलासवासोऽघोरात्मा सद्योजातोऽथपूरुषः ।
वामदेवस्तथेशानस्त्रिपुरान्तकरो हरः ।। 45

एताश्चान्याश्च यो मूर्तीः प्रतिष्ठाप्यार्चयेच्छिवे ।
धातुजानां च लिङ्गानां प्रतिमानामपीश्वरि ।। 46

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

चराणां चास्थिराणां च शतवर्षात्प्रतिष्ठितिः ।
वैदिकी चागमी यांच प्रतिष्ठा द्विविधा शिवे ।। 47

खण्डस्फुटितदग्धेषु पाषण्डपतितान्त्यजैः ।
शूद्रैः स्पृष्टे प्रतिष्ठा स्यात् पुनः संस्कारपूर्वकम् ।। 48

अन्त्यजोपहतानां तु परित्यागो जले भुवि ।
चराणां स्थावराणां वा तथा स्वायम्भुवेऽपि वा ।। 49

स्वायम्भुवीयलिङ्गस्य शकलं वेदिकास्वपि ।
अष्टबन्धकद्रव्येण योज्य बध्वा प्रतिष्ठितिः ।। 50

आगामी चागमीयानां तुलो चन्द्र विभूषिते (?)
वसन्तोऽथ ऋतुर्देवि वार्षिकः शशिरोधकः ।। 52

उत्तराशागते भानौ लिङ्गं स्थाप्यार्चयेच्छिवे ।
माघफाल्गुनवैशाखे ज्येष्ठ आषाढ एव च ।। 53

मासेषु शुक्ल पक्षेषु लिङ्गस्थापनमुत्तमम् ।
अष्टम्यां वा चतुर्दश्यां पर्वणोर्वा महेश्वरि ।। 54

सोमवारेऽथवा भद्रे रविभौमबुधेष्वपि ।
स्थिरप्रतिष्ठा च स्थिरर्क्षे च चरे वरम् ।। 55

शान्तैर्द्विजवरैर्देवि शिवभक्तैर्जितेन्द्रियैः ।
शतावरैः स्थावरेषु ऋत्विजः परिकीर्तिताः ।। 56

दश त्रयो वा विप्रेन्द्राः शिवभक्ताः सुवाससः ।
भस्मरुद्राक्षसम्पन्नास्त्रिपुण्ड्रपरिमण्डिताः ।। 57

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

चरलिङ्गप्रतिष्ठायां वरणीया द्विजोत्तमाः ।
ब्रह्मा सदस्याश्चाचार्यो मधुपर्केण पूजिताः ।। 58

वासोभिरहतैश्चैव गोभिः पूज्या यथाबलम् ।
वस्त्रालङ्करणै रत्नैर्धनैर्धान्यैर्गृहैरपि ।। 59

पूजनीयाः प्रतिष्ठादौ ब्रह्मणा वेदपारगाः ।
धान्याधिवासः कर्तव्यो जलवासश्च शङ्करि ।। 60

प्रतिमायाश्च लिङगस्य कर्तव्योऽथ विजानता ।
द्रोणत्रयं धान्यमिति जलकुम्भं सपल्लवम् ।। 61

नदीनदाहृतैस्तोयैर्वापीकूपाहृतैस्तथा ।
नवधान्यानि वासांसि समाहृत्य द्विजैः सह ।। 62

तथैवौषधयः पुण्या विष्णुक्रान्तापमार्गकाः ।
दर्भाग्राश्च तथा दूर्वा यवाग्राण्यथ मेण्डि(थि)काः ।। 63

पल्लवाः स्युरुमे पञ्च कल्कान्यपि सुमध्यमे ।
समाहृत्य शुभे देशे गोमयेनोपलेपिते ।। 64

रङ्गवल्यादिशोभाढ्ये मण्डपे पुष्पमण्डिते ।
गणेशमादौ सम्पूज्य नान्दीश्राद्धं विधाय च ।। 65

ततः प्रतिसरं कृत्वा ब्राह्मणाननुमन्त्र्य च ।
पत्न्या सह समासीन अरजे वाससी दधत् ।। 66

सङ्कल्प्य वरयेद्विद्वान् आचार्यं च सदस्यकम् ।
ब्रह्माणं च प्रतिष्ठाप्य दिनत्रयेमथेश्वरि ।। 67

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

बोधायनोक्तविधिना प्रतिष्ठाप्य महेश्वरम् ।
हावयेत्पायसैर्विद्वान् चरुणा सधृतेन वा ।। 68

स्वस्वशाखोक्तमार्गेण प्रतिष्ठाप्य हुताशनम् ।
कुम्भाभिषेकं कृत्वैव मूलेन प्रणवेन वा ।। 69

नेत्रोन्मीलनवर्जं च लिङ्गे च प्रतिमास्वपि ।
कुर्यान्नेत्रोन्मीलनादि प्रतिमास्वपि शङ्करि ।। 70

महाभिषेकविधिना पूजयेल्लिङ्गमैश्वरम् ।
पञ्चामृतैः पञ्चगव्यैस्तथा फलरसैरपि ।। 71

श्रीरुद्रेणाभिषेकोऽत्र कर्तव्यश्चमकैरपि ।
वस्त्रैर्गन्धैश्च धूपैश्च दीपनैवेद्यकल्पनैः ।। 72

ताम्बूलनीराजनतः पूजयेच्छत्रचामरैः ।
प्रदक्ष्णानमस्कारैः संस्तुवीत महेश्वरम् ।। 73

नमस्ते देवदेवाय शिवायाकाशमूर्तये ।
भवाय भव्यरूपाय हरभूम्यात्मने नमः ।। 74

व्यक्ताव्यक्ताय सोमाय जलरूपाय ते नमः ।
उग्राय भीमरूपाय वायुमूर्त्यात्मने नमः ।। 75

व्योमकेशाय नित्याय तेजोमूर्त्यात्मने नमः ।
एवं संस्तुत्य देवेशि प्रार्थयेच्छङ्करे क्षमाम् ।। 76

जानताऽजानता वापि प्रतिष्ठा या मया कृता ।। 77

तां क्षमस्व महादेव लिङ्गेऽस्मिन् सुस्थिरो भव ।
ततोऽर्चयेद्गन्धपुष्पैर्धनैर्गोभिः प्रपूजयेत् । 78

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

आचार्यं ऋत्विजश्चैव दीनाऽनाथान् द्विजोत्तमान् ।
भोजयेच्छिवभक्तांश्च दक्षिणाभिः प्रतोषयेत् ।। 79

सहस्रं त्रिशतं वापि शतं द्वादश एव वा ।
*अर्थहीनं च कर्तारं मन्त्रहीनं च ऋत्विजम् ।। 80

*स्त्रियं लक्षणहीनां च न प्रतिष्ठासमो रिपुः ।
वित्तशाठ्यं न कुर्वीत फलमाढ्यंदरिद्रयोः ।। 81

एवं सङ्क्षेपतः प्रोक्तः प्रतिष्ठाविधिरुत्तमः ।। 82

सूत उवाच

प्रतिष्ठादिनिष्ठा विशिष्टा यदि स्यात्
महातुङ्गलिङ्गे गरिष्ठा सहिष्ठा ।
महाकष्टहन्ती धनिष्ठा सुशस्ता
वरिष्ठा महाज्येष्ठलिङ्गे विशिष्टा ।। 83

अलं महीमण्डलदानजालै-
राखण्डलप्रीणनयज्ञसङ्घैः ।
अखण्डकृच्छ्राचरणव्रते फलं
लिङ्गस्य तत्कोटिगुणं प्रतिष्ठितौ ।। 83

।। इति श्रीशिवरहस्ये एकादशाम्शे शिवलिङ्गप्रतिष्ठाविधिः
नाम पञ्चमोऽध्यायः।।

---

* अत्र श्लोकस्यास्य प्रसङ्गो नास्ति । अनन्वयात् । (अनन्वितत्वात्)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। षष्ठोऽध्यायः ।।

देव्युवाच -

प्रासादगोपुराणां च करणे वा फलं च किम् ।
प्राकारगोपुरद्वारवाहनानां प्रकल्पने ।। 1

मण्टपानां च करणे वापीकूपोपकल्पने ।
शिवागारे विशेषेण शिवपुष्पवनस्य च ।। 2

किं फलं स्यान्महादेव तन्मे वद दयानिधे ।

ईश्वर उवाच -

*मृद्दार्विष्टकपाषाणैर्यः कुर्याद्वै शिवालयम् ।। 3

त्रिःसप्तकुलसंयुक्तः शिवलोके महीयते ।
मृन्मयात्कोटिगुणितं पुण्यं स्याद्दारुभिः कृतम् ।। 4

त्रिगुणं चेष्टकादिभ्यः सुधया परिकल्पितम् ।
शैलैरनन्तं देवेशि कल्पितं शिल्पिभिर्दृढम् ।। 5

कोटिकोटिगुणं पुण्यमुत्तरत्र महेश्वरि ।
मृच्छैलयोः समं ज्ञेयं फलं आढ्यदरिद्रयोः ।। 6

यत्र क्वापि शिवे भक्त्या कुर्याच्छैलेष्टकादिभिः ।
नवं पुराणरहितं जीर्णं पतितमेव वा ।। 7

नवादपि सदोत्कृष्टं जीर्णोद्धारं महेश्वरि ।
अष्टेष्टकाभिर्वा कुर्यात्क्रीडमानः शिवालयम् ।। 8

---

*इष्टका इत्याकारान्तं पदमेव साधु । इष्टिका इष्टका - Brick

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सोऽपि रुद्रगणो भूयात् भक्त्या युक्तानुसारतः ।
गर्भगेहं महेशस्य यः कुर्याद्युक्तधातुभिः ।। ९

पट्टिकाकुमुदोपेतं देव कोष्ठैश्च शोभितम् ।
रुद्रावतारचरितैर्वृषकुम्भविराजितम् ।। 10

तावद्युगसहस्राणि रुद्रलोके महीयते ।
तत्पाषाणसुधालेपकणैः साहस्रसङ्ख्यया ।। 11

तावत्कालं वसेत्स्वर्गे यावदिन्द्राश्चतुर्दश ।
मण्टपं दशभिः स्तम्भैर्युतं यःकारयेच्छिवे ।। 12

शतस्तम्भं ततोऽपीशे सहस्रस्तम्भमण्डितम् ।
सुपीठवेदिकोपेतं वलभीकुम्भमण्डितम् ।। 13

*जालकीतोरणोपेतं चित्रविद्रुमपुत्रिकम् ।
तावद्युगसहस्राणि शिवलोके महीयते ।। 14

गोपुरैर्भूधराकारैः सहस्रतलमण्डितैः ।
कारयेच्छिल्पशास्त्रज्ञै रुद्ररूपविचित्रितैः ।। 15

दशैकादशसाहस्रतलैः शतपरीमितैः ।
कुम्भैर्वृषैरुद्ररूपैर्योऽलङ्कुर्याच्च रङ्गतः ।। 16

यावन्ति रुद्ररूपाणि तानि सर्वाण्यपि लेखयेत् ।
तावद्वर्षसहस्राणि शिवलोके महीयते ।। 17

शिवालयस्य परितश्चतुर्दिक्षु विराजितैः ।
प्राकारं कारयेद्युक्तं मारमारस्य शङ्करि ।। 18

---

* जालकी - Windows

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

यावत्तस्मिन् विरचिता पाषाणा इष्टकास्तथा ।
तावद्वर्षसहस्राणि मम लोके महीयते ।। 19

खण्डस्फुटितसंस्कारं यः कुर्वीत शिवालये ।
प्राकारं गोपुरं वापि मण्टपं वा सपीठकम् ।। 20

नूतनादपि चोत्कृष्टं जीर्णोद्धारं प्रशस्यते ।
दूरतः शिखरं दृष्ट्वा गोपुरस्य महेशितुः ।। 21

सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति ।
पश्चात्प्राङ्मुखलिङ्गस्य गर्भागारं तु कारयेत् ।। 22

देवालयं ततः कृत्वा देवीमूर्तिभिरन्वितम् ।
शिवलोके गणो भूत्वा मोदते शाश्वतीःसमाः ।। 23

स्कन्दालयं गणेशस्य भैरवस्य महात्मनः ।
चण्डेश्वरालयं कृत्वा स लभेत्पुण्यमद्भुतम् ।। 24

वृषालयं प्रकुर्वीत तदग्रे बलिपीठकम् ।
तस्याग्रतो ध्वजस्तम्भं कुर्यादूर्ध्वसवर्तुलम् ।। 25

पञ्चविंशतिमूर्तीनामालयानि समन्ततः ।
श्लक्ष्णानि च मनोज्ञानि सुकुट्टिमयुतानि च ।। 26

चित्रध्वजपताकाग्रस्वर्णकुम्भयुतानि च ।
कृत्वा यत्फलमाप्नोति तदेकाग्रमनाः शृणुः ।। 27

स्कन्दोमासहितं देवमासीनं परमासने ।
कृत्वा भक्त्या प्रतिष्ठाय सर्वान् कामानवाप्नुयात् ।। 28

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कैलासे संवसेदेव दक्षिणे विष्णुपञ्चकम् ।
यावत्कालेनसंतिष्ठेत् तावद्भोगभुगव्ययः । 29

एकपादं चतुर्बाहुं त्रिणेत्रं शूलसंयुतम् ।
दृष्ट्वास्थितं हरिं वामे दक्षिणेविधिमव्ययम् ।। 30

अष्टाविंशतिकोटीनां कारणं स्वाङ्गतो हरः ।
विनिर्मायाथ मूर्तीनां पञ्चविंशतिकं तथा ।। 31

पुरुषं हृदयाद्देवि सद्योजातं तु पादतः ।
अघोरं वक्त्रतः शंभुर्हस्ताभ्यां वाममीश्वरम् ।। 32

ईशानमूर्ध्वतः शम्भुर्निर्मायाग्रे सचासृजत् ।
प्रकृतिं वामतश्चैव चेतनां बुद्धिदेशतः ।। 33

अहङ्कारादहङ्कारं तन्मात्राणि च मात्रया ।
इन्द्रियाणीन्द्रियाद्देवि लीलया परमेश्वरः ।। 34

पृथिवीं पाददेशात्स गुह्यदेशाज्जलं तथा ।
नाभिदेशान्महावह्निं हृदयाद्भास्करं तथा ।। 35

कर्णात्सोमं तथात्मानं भ्रूमध्यान्मस्तकाद्दिवम् ।
सृष्ट्वैव संस्थितः साक्षाज्जगत्सर्वं चराचरम् ।। 36

पञ्चविंशतिमूर्तीश्च प्राविशत्स्वेन तेजसा ।
एकांशेन महादेव एकधा बहुधा श्रुतः । 37

वामाङ्गस्थितलोकेशहरिभ्यां चैवसेवितः ।
सर्वज्ञं सर्वगं देवं कृत्वा भक्त्या विधानतः ।। 38

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

प्रतिष्ठाप्य यथान्यायं शिवसायुज्यमाप्नुयात् ।
त्रिपादं सप्तहस्तं च चतुःशृङ्गं द्विशीर्षकम् ।। 39

वृ(कृ)त्वा यज्ञेशमीशानमग्निलोके महीयते ।
तत्र भुक्त्वा महाभोगान् कल्पलक्षं सुखी नरः ।। 40

क्रमादागत्य लोकेऽस्मिन् धराधीशो भवेन्नृपः ।
वृषारूढं तु यः कुर्यात् सोमं सोमार्धभूषणम् ।। 41

हयमेधायुतं पुण्यं कृत्वा प्राप्येन्द्रवल्लभः ।
काञ्चनेन विमानेन किङ्किणीजालमालिना ।। 42

गत्वा शिवपुरं दिव्यं तत्रैव स विमुच्यते ।
नन्दिना सहितं देवं साम्बं सगणमव्ययम् ।। 43

कृत्वा यत्फलमाप्नोति तत्ते वक्ष्याम्यनुत्तमम् ।
सूर्यमण्डलसङ्काशैर्विमानैर्वृषसंयुतैः ।। 44

अप्सरोगणसङ्कीर्णैः देवदानवदुर्लभैः ।
नृत्यद्भिरप्सरःसङ्घैः पुष्पगन्धमनोहरैः ।। 45

गत्वा शिवपुरं दिव्यं गाणपत्यमवाप्नुयात् ।
नृत्यन्तं देवदेवेशं शैलजासहितं प्रभुम् ।। 46

सहस्रबाहुं देवेशि चतुर्बाहुमथापि वा ।
नन्द्याद्यैर्भूतसङ्घैश्च संवृतं परमेश्वरम् ।। 47

कृत्वा भक्त्या प्रतिष्ठाप्य रुद्रलोके महीयते ।
शैलजासहितं साक्षात् वृषभध्वजमीश्वरम् ।। 48

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ब्रह्मेन्द्रविष्णुसोमाद्यैः कृताञ्जलिपुटैर्गणैः ।
मातृभिर्मुनिभिश्चैव संवृतं परमेश्वरम् ।। 49

कृत्वा भक्त्या प्रचिष्ठाप्य यत्फलं तद्वदाम्यहम् ।
सर्वयज्ञतपोदानतीर्थवेदेषु यत्फलम् ।। 50

तत्फलं कोटिगुणितं लब्ध्वा याति शिवंपदम् ।
तत्र भुक्त्वा महाभोगान् यावदाभूतसंप्लवम् ।। 51

सृष्ट्यन्तरे ततः प्रात्ये(प्रेत्य) मानवं पदमाप्नुयात् ।
इभास्यदारकं देवं साम्बं सिद्धाकृतिं प्रभुम् ।। 52

सुधूम्रवर्णं रक्ताक्षं त्रिणेत्रं चन्द्रशेखरम् ।
बकपक्षधरं मूर्ध्ना नागरङ्कुधरं हरम् ।। 53

सिह्माजिनोत्तरीयं च मृगचर्माम्बरप्रियम् ।
तीक्ष्णदंष्ट्रं गदाहस्तं कपालोद्यतपाणिनम् ।। 54

हुं फट्कार महाशब्दशब्दिताखिलदिङ्मुखम् ।
पुण्डरीकाम्बरं दोर्भ्यां बिभ्रद्वै कम्बुकं यथा ।। 55

संहतं च नदन्तं च पिबन्तं सत्यसागरम् ।
नृत्यन्तं भूतसङ्घैश्च संवृतं सगणं प्रभुम् ।। 56

कृत्वा भक्त्या प्रतिष्ठाप्य यथाविभवविस्तरम् ।
अत्र विघ्नान्विनिर्जित्य शिवलोके महीयते ।। 57

तत्र भुक्त्वा महाभोगान् यावदाचन्द्रतारकम् ।
ज्ञानं विचारतो लब्ध्वा रुद्रेभ्यस्तत्र मुच्यते ।। 58

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अर्धनारीश्वरं देवं चतुर्भुजमनुत्तमम् ।
वरदाभयहस्तं च शूलपद्मधरं प्रभुम् ।। 59

भावेन सर्वं संस्थाप्य सर्वाभरणभूषितम् ।
कृत्वा भक्त्या प्रतिष्ठाप्य शिवलोके महीयते ।। 60

तत्र भुक्त्वा महाभोगानणिमदिगुणैर्वृतः ।
आचन्द्रतारकं ज्ञानं ततो लब्ध्वा विमुच्यते ।। 61

यः कुर्याद्दिवदेवेशं सर्वज्ञं लकुलीश्वरम् ।
वृतं शिष्यैः प्रशिष्यैश्च व्याख्यानोद्यतपाणिनम् ।। 62

कृत्वा भक्त्या प्रतिष्ठाप्य शिवलोकं स गच्छति ।
भुक्त्वा तु विपुलांस्तत्र भोगानुग्रतरं नरः ।। 63

ज्ञानयोगं समासाद्य तत्रैव स विमुच्यते ।
पूर्वदेवामराणां च तदा स्वांशकलैः स्थितैः ।। 64

कृतमुद्रस्य रुद्रस्य चिताभस्मानुलेपितैः ।
पुम्मुण्डधारिणस्तेषां शिरोमालाधरस्य च ।। 65

ब्रह्मणः केशजेनैकं उपवीतं च बिभ्रतः ।
बिभ्रतो वामहस्तेन कपालं ब्रह्मणो वपुः ।। 66

विष्णोः कलेवरं चैव बिभ्रतः परमेष्ठिनः ।
कृत्वा भक्त्या प्रतिष्ठाप्य विष्णुलोके महीयते ।। 67

कालकूटं कराब्जान्ते निधायासीनमासने ।
कृत्वा भक्त्या प्रतिष्ठाप्य मुच्यते भवबन्धनात् ।। 68

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ओं नमो नीलकण्ठाय इति पुण्याक्षराष्टकम् ।
मन्त्रमाह सकृद्वा यः पातकैः स प्रमुच्यते ।। 69

मन्त्रेणानेन गन्धाद्यैर्भक्त्या वित्तानुसारतः ।
सम्पूज्य देवदेवेशं शिवलोके महीयते ।। 70

जलन्धरान्तकं देवं सुदर्शनकरं प्रभुम् ।
कृत्वा भक्त्या प्रतिष्ठाप्य विष्णुलोके महीयते ।। 71

तिष्ठतोऽथ निकुम्भस्य पततश्चरणाम्बुजे ।
वामेतरं प्रविन्यस्य वाम(मा)मालिङ्ग्य चाद्रिजाम् ।। 72

शूलं प्रकूर्परे स्थाप्य कङ्कणीकृतपन्नगम् ।
सम्प्रेक्ष्य चान्तकं पार्श्वे कृताञ्जलिपुटं स्थितम् ।। 73

रुपं कृत्वा यथान्याय्यं शिवसायुज्यमाप्नुयात् ।
यः कुर्याद्देवदेवेशं त्रिपुरान्तकमीश्वरम् ।। 74

धनुर्बाणसमायुक्तं सोमं सोमार्धभूषणम् ।
रथे तु संस्थितं देवं चतुराननसारथिम् ।। 75

तदाकारतया सोऽपि गत्वा शिवपुरं सुखी ।
क्रीडतो नात्र सन्देहो द्वितीय इव शङ्करः ।। 76

तत्र भुक्त्वा महाभोगान् यावदिच्छं द्विजोत्तमाः ! ।
ज्ञानं विचारितं लब्ध्वा तत्रैव स विमुच्यते ।। 77

गङ्गाधरं सुखासीनं चन्द्रशेखरमेव च ।
उमया सहितं देवं वामसङ्गाम्बिकायुतम् ।। 78

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

विनायकं तथा स्कन्दं ज्येष्ठां दुर्गां सुशोभनाम् ।
भास्करं च तथा सोमं ब्रह्माणीं च महेश्वरीम् ।। 79

कौमारीं वैष्णवीं देवीं वाराहीं वरदां तथा ।
इन्द्राणीं चैव चामुण्डां वीरभद्रसमन्विताम् ।। 80

विघ्नेशेन च यो धीमाञ्छिवसायुज्यमाप्नुयात् ।
लिङ्गमूर्तिं महाज्वालामालासंवृतमव्ययम् ।। 81

लिङ्गस्य मध्ये वै कृत्वा चन्द्रशेखरवत्तनुम् ।
व्योम्नि कुर्यात्तथा लिङ्गे ब्रह्माणं हंसरूपिणम् ।। 81

विष्णुं वराहरूपेण लिङ्गाधस्तात्त्वधोमुखम् ।
ब्रह्माणं दक्षिणे तस्य कृताञ्जलिपुटं स्थितम् ।। 83

वामे विष्णुं महाबाहुं कृताञ्जलिपुटं तथा ।
मध्ये च लिङ्गं घोरं महाम्भसि सुसंस्थितम् ।। 83

कृत्वा भक्त्या प्रतिष्ठाप्य शिवसायुज्यमाप्नुयात् ।
क्षेत्रसंरक्षकं देवं शिवलिङ्गार्चनं तथा ।। 85

यः करोति यथान्याय्यं शिवलोके महीयते ।। 86

ये (यः) पञ्चविंशत्परेमेशमूर्तीः
    कृत्वाऽऽलयाभ्यन्तरपीठसंस्थाः ।
सुरूपवर्णाभरणा मनोज्ञाः
    शिवे प्रतिष्ठाप्य सुपुण्यभाजनः (नम्) ।। 87

भूयाद्गणेन्द्रो रजताद्रिमौलौ
    वृषाग्रकुम्भैः सुपताकजालैः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सन्मण्टपालीवलभीप्रतोलिकः
सुपालिकापुत्तलिकाविचित्रम् ।। 88

सत्यं च वर्णोत्तमगर्भगेहं
कृत्वासुधाचित्रितमीशतुल्यः ।
लिङ्गं प्रतिष्ठाप्य सुपुण्यभाग्भवेत्
देवीं गणं स्कन्दमथापि चण्डम् ।। 89

यावद्ब्रह्मशतं मुकुन्दसदनेस्थित्वा चिरं भोगभाक्
भूयात्सान्वय कोटिजन्मसुशिवे नारायणेनार्चितः ।
पश्चान्मे गणमुख्यतामुपगतः सर्वेऽपि शैवो जनः
सर्वस्मादधिकं फलं स लभते पुण्यस्य शैलेन्द्रजे ।।90

।। इति श्रीशिवरहस्ये एकादशाम्शे शिवलिङ्गप्रतिष्ठा
नाम षष्ठोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। सप्तोऽध्यायः ।।

ईश्वर उवाच -

कैलासाचलसङ्काशं गोपुरावलिभासुरम् ।
प्राकारवरशोभाढ्यं महामण्टपसुन्दरम् ।। 1

पर्यन्तराजद्वृषभं चित्रविद्रुमवेदिकम् ।
गवाक्षतोरणयुतं वलभीकुलभूषितम् ।। 2

नानाद्रुमलतोपेतं वापीकूपशतावृतम् ।
सरोभिः फुल्लकल्हारकमलोत्पलमण्डितैः ।। 3

नानाविहगशोभाढ्यं नृत्यच्छिखिलाकुलम् ।
कृत्वा नगोर्ध्वशिखरजालजालकिताम्बरम् ।। 4

रम्यनिर्झरकं मञ्जुरङ्गवल्लीविचित्रितम् ।
तन्मध्ये मम देवेशि कुर्यात्प्रासादमुन्नतम् ।। 5

शतं सहस्रमयुतं स्तम्भकुम्भविराजितम् ।
वेदिकापट्टिकोपेतं चित्रविद्रुमपुत्रिकम् ।। 6

प्रतोलीवलभीनिर्यद्द्वारासारगृहान्तरम् ।
पुष्पमालापरिक्षिप्तं धूपदीपविराजितम् ।। 7

मध्ये सिह्मासनयुतं डोलास्तरणशोभितम् ।
वितानशोभितोर्ध्वान्तमुपधानशतावृतम् ।। 8

तस्मिन्नासनपर्यङ्के मूर्तिं सोमां महेश्वरि ।
त्रिणेत्रां चारुचन्द्रार्कां त्वत्सहायां सुशोभनाम् ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

स्कन्दान्वितां नीलकण्ठां त्रिपुण्ड्रपरिशोभिताम् ।
प्रतिष्ठाप्य च कैलासप्रासादे परमेश्वरि ।। 10

स यत्फलमवाप्नोति तदेकाग्रमनाः शृणु ।
सूर्यकोटिप्रतीकाशैर्यानैः कैलाससप्रभैः ।। 11

[1]औमं कौमारमैशानं वैष्णवं ब्राह्ममेव च ।
प्राजापत्यं महातेजोजनोलोकं महस्तथा ।। 12

ऐन्द्रमासाद्य चेन्द्रत्वं कृत्वा कल्पायुतं दिवि ।
मन्वन्तर परीवृत्तं यावदिन्द्रशतं शिवे ।। 13

भुक्त्वा चैव भुवर्लोकभोगान् देवसुदर्लभान् ।
यावदायुर्ब्रह्मणोऽयं वसेत् कैलासपर्वते ।। 14

मेरुमासाद्य देवानां भवनेषु प्रमोदने ।
किम्पूरुषाप्सरोलोके यक्षविद्याधरालये ।। 15

भुक्त्वा भोगान् स विपुलान् पदे स्यादैच्छिके भुवि ।
आखण्डलाधिको भूयात् महीमण्डलमण्डनः ।। 16

एकछत्राधिपो राजा भवेद्वीजितचामरः ।
जातिस्मरो भवेद्भूम्यां कृत्वा धर्मं शिवस्य तु ।। 17

पुनर्मद्गणपो भूयान्नास्यान्तो धर्मवर्त्मनः ।
[2]मन्दिराद्रिं(मन्थराद्रौ मन्दराद्रौवा)प्रकुर्वीत मम प्रासादमुत्तमम् ।।

---

1. उमासम्बन्धि इत्यर्थे औममितिप्रयोगः ।

2. मन्थराद्रौ मन्दराद्रौ वा । अथवा अद्रिसमाकृतिमन्दिरमिति वा ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शिखरायुत संयुक्तं प्रासादं दिव्यवेदिकम् ।
*रुद्रावतारक्रीडाभिरप्सरोगणचित्रितम् ।। 19

देवदानवगन्धर्वप्रतिमापरिशोभितम् ।
सन्तानपारिजातादिमन्दराद्यैरलङ्कृतम् ।। 20

देवोद्यानोद्भवैर्वृक्षैः समन्तादुपशोभितम् ।
सुधाविचित्रिताः सर्वाः कारयेत्प्रतिमाः शुभाः ।। 21

रञ्जिताः पञ्चवर्णैश्च तत्प्रासादे विशेषतः ।
मम देव्या गणेशस्य स्कन्दभैरवनन्दिनः ।। 22

वृषाग्रे चारुशृङ्गैश्च शोभितं कारयेन्नरः ।
तत्प्रासादे महापीठे पुष्पमालाविराजिते ।। 23

गन्धधूपदिवितते दीपमालाकृतान्तरे ।
नृत्तमानं त्रयानेत्रं(?) सोमं सोमार्धशेखरम् ।। 24

मत्पार्श्वे त्वां महादेवीं पश्यन्तीं मत्पदाम्बुजम् ।
कृत्वा भक्त्या प्रतिष्ठाप्य स मे प्रियतरो गणः ।। 25

मन्दराद्रिप्रतीकाशैर्विमानैर्विश्वतोमुखैः ।
हावभावसमायुक्तरुद्राणीनृत्तनिर्भरैः ।। 26

गत्वा शिवपुरं दिव्यं भुक्त्वा भोगाननुत्तमान् ।
ज्ञान योगं समासाद्य गाणा(ण)पत्यं लभेन्नरः ।। 27

---

* अप्सरोगण चित्रितं विविधरुद्रावतारक्रीडाचित्रशोभितमित्यर्थे ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

यः कुर्यान्मेरुनामानं प्रासादं मे महेश्वरि ।
सहस्रशृङ्गसंयुक्तस्तम्भसाहस्रसंयुतम् ।। 28

वेदिकातोरणोपेतं वलभीजालिकान्वितम् ।
दिक्पालैर्देवसङ्घैश्च तत्तद्वर्णायुधान्वितैः ।। 29

कल्पितं शिल्पिवर्यैश्च प्रासादान्त पीठके ।
धूपदीपसुमामोदप्रसारितदिगन्तरे ।। 30

वामदक्षिणपार्श्वे(र्श्व)स्य विष्णुब्रह्मादिसेविताम् ।
उमान्वितां ममैवेशि मूर्तिं संस्थाप्य पूजयेत् ।। 31

स यत्फलमवाप्नोति न तत्सर्वां महामखैः ।
सर्वयज्ञतपोदानसर्वतीर्थेषु यत्फलम् ।। 32

लब्ध्वा विमानवर्येण जितसूर्येण याति माम् ।
निषधं नामतः कुर्यात् प्रासादं भक्तिमान्नरः ।। 33

सहस्रशिखरोपेतं शुभकुम्भसमन्वितम् ।
वलभीकुलसञ्छन्नं तोरणारुणमण्डितम् ।। 34

वेदिकापट्टिकोपेतं मुनिवर्यैश्च शोभितम् ।
वैखानसैर्वालखिल्यैर्देवगन्धर्वशोभितम्* ।। 35

तादृग्विधसुधाक्लृप्तमूर्तिभिः परिशोभितम् ।
तत्रासने सुखासीनं चन्द्रखण्डजटालकम् ।। 36

---

* प्रयोगोऽयं विमर्शमर्हति । एवमाद्यनन्वितप्रयोगशतसङ्कुलमिद-मितिहासरत्नम् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

त्रिपुण्ड्रफालं मां देवि योगपट्टसनोज्ज्वलम् ।
चिन्मुद्राद्रावितांज्ञानं मुनीनां भावितात्मनाम् ।। 37

संवृतं मुनिभिस्तत्र नतप्राञ्जलिभिः शिवे ।
कृत्वा मे दक्षिणमूर्तिं वटमूले प्रतिष्ठिताम् ।। 38

देवलोकं पानवर्यैः सहयुक्तैर्विराजितैः ।
विमानैश्चन्द्रतारैश्च वृतमप्सरसां गणैः ।। 39

भुक्त्वाथ सुचिरंकालं देवभोगाननुत्तमान् ।
अभूतं देवि पश्चान्मे ज्ञानमैश्वरमुत्तम् ।। 40

लब्ध्वा मय्येव लीयेत भक्तियुक्तः प्रमुच्यते ।
कुर्याद्वा यः शिवे भक्त्या हिमशैलाख्यमुत्तमम् ।। 41

प्रासादं परया भक्त्या दिव्यस्तम्भशतैर्युतम् ।
जालिकामालिकामध्यस्तम्भकुम्भशतवृतम् ।। 42

वेदिकातोरणोपेतं दिव्यपीठमनोहरम् ।
धूपदीपावृतं पुष्पमालामुदितमेदुरम् ।। 43

नन्दिभृङ्गिमहाकालमूर्तिभिः परिशोभितम् ।
तिष्ठन्तं मां तत्र मूर्तिं कृत्वा वृषमुखे करम् ।। 44

सोष्णीषं सोममकुटं पुष्पापीडमुमान्वितम् ।
प्रतिष्ठाप्य लभेद्गौरि विमानं सार्वगामिकम् ।। 45

हिमशैलोपमैर्यानैर्भुक्त्वा देव पुरे सुखम् ।
नन्दनादिवने देवि पीत्वाऽमृतमनुत्तमम् ।। 46

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

स्रग्गन्धवासोविभ्राजदप्सरोभिः प्रमोदते ।
यावदिन्द्रायुतं देवि पश्चान्मे गणपो भवेत् ।। 47

नीलाद्रिशिखराख्यं वा प्रासादं तोरणान्वितम् ।
वेदिकापट्टिकोपेतं [1]गोपानसि विराजितम् ।। 48

पञ्चाशत्स्तम्भसंवीत चित्रविद्रुमपुत्रिकम् ।
[2]विराजितवृषाग्रं च धूयमानपताककम् ।। 49

वेणुवीणारवानेकसमधूपादिदीपितम्[3] ।
पीठे देवि प्रतिष्ठाप्य गजघ्नीं मूर्तिमव्ययाम् ।। 50

त्रिणेत्रचारुचन्द्रांकां [4]गजमस्तलसाङ्घ्रिकाम् ।
विदीपितमहाशूलकरां दंष्ट्राङ्कुरास्यकाम् ।। 51

यानैर्वृषयुतैर्देवि तिष्ठेद्धि परमेष्ठिनः ।
लोके भोगयुतो धीमानधीते ज्ञानमुत्तमम् ।। 52

पश्चात्तेनैव मां प्राप्य ब्रह्मणा परिमुच्यते ।
वृषभाख्यं हि यः कुर्यात्प्रासादं परमेश्वरि ।। 53

मण्टपं वा सुविहितं स्तम्भकुम्भशतावृतम् ।
राजद्वृषाग्रकलशं पुष्पमालापरिष्कृतम् ।। 54

---

1. गोपानस a curved Beam which supports a thatch. गोपानसीत्येव ईकारान्तं पदं कोशेषु लभ्यते । गोपानसीति इकारान्तः प्रयोगोऽपि साधुरेवेति गम्यते ।
2. विराजित वृषाधीशधूयमानपताककम् ।
3. धूपितम् ।
4. गजमस्तलसत्पदाम् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तत्र पीठे कालहरं मां प्रतिष्ठाप्य शङ्करि ।
कालस्य मकुटे [1]पादहस्तशूलेन ताडितम् ।। 55

कालं च पतितं चाग्रे उग्रं मां चन्द्रशेखरम् ।
दंष्ट्राकरालवदनं कृत्वा बेरं [2]लभेन्नरः ।। 56

[3]गाणापत्यं प्रियं मे स्यात् विमानेनार्क [4]भास्वता ।
गत्वा शिवपुरं देवि ज्ञानं लब्ध्वा विमुच्यते ।। 57

महेन्द्राख्यं तु यः कुर्यात् प्रासादं परमेशितुः ।
नानालङ्कारशोभाढ्यं स्तम्भकुम्भशता वृतम् ।। 58

गवाक्षपङ्क्ति मध्यस्थां शिखरप्रकरान्वितम् ।
वेदिकाद्वारविहितं दृषद्भिः पिहितं दृढैः ।। 59

तस्मिन्नासनवर्ये मां प्रतिष्ठाप्य त्वया सह ।
मूर्तिं कृत्वा ताम्रमयीं राजतीं स्वर्णनिर्मिताम् ।। 60

चन्द्रापीडां त्रिणयनां मन्दस्मितमनोहराम् ।
वामदक्षिणभागे मे गणेशगुहसंयुताम् ।। 61

स फलं लभते मर्त्यो भुवि भाग्यसमन्वितः ।
पुत्रपौत्रैर्युतो दारैर्वंशलक्षसमन्वितः ।। 62

[5]काव्यसंशोभियानेन पुष्पमालाविराजता ।
कैलासं दक्षिणं प्राप्य [6]यक्षेन्द्रार्चितभोगभुक् ।। 63

---

1. विध्यन्तंकालमकुटे शूलेनाथ निजङ्घ्रिणा।
2. परमैपदित्वं चिन्त्यम् । 3. गाणपत्यम् 4. रोचिषा
5. शुक्रग्रहवद् शोभमान यानेन । 6. यक्षेन्द्रार्चितश्चासौ भोगभुक् च । अथवा यक्षेन्द्रेण बहुमानित-उत्तम भोगयुक्तः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

प्रासादं हेम कूटाख्यं कृत्वा स्तम्भशतान्वितम् ।
गवाक्षशिक्षाविततं त्र्यक्षप्रीतिकरं शिवे ।। 64

संराजद्वेदिका कुम्भपताकावलिशोभितम् ।
तत्र सिह्मासनासीनं अर्धनारीश्वरं हि माम् ।। 65

प्रतिष्ठाप्य लभेन्मुक्तिं भुङ्क्ते भोगाननुत्तमान् ।
विषयान् विषवत् त्यक्त्वा निःशेषं मामवाप्नुयात् ।। 66

हेम्ना वा राजतेनापि ताम्रकांस्यसुपित्तलैः ।
मणिभिः स्फटिकैर्वापि विद्रुमैर्वा महेश्वरि ।। 67

आढ्यो वा द्रव्यरहितो भक्त्या कुर्याच्छिवालयम् ।
मृन्मयात्कोटिगुणितं पुण्यं स्याद्दारुभिः कृते ।। 68

कोटिकोटिगुणं पुण्यं मृत्काष्टादिष्टकामयम् ।
त्रिगुणं चेष्टकादिभ्यः शैलैर्देवि शिवालयम् ।। 69

दृषद्भिः कृष्णवर्णैश्च ततः कोटिगुणं भवेत् ।
मृच्छैलयोः समं ज्ञेयं फलमाढ्यदरिद्रयो ।। 70

वने वापि नदीतीरे पुण्यपर्वतमूर्धसु ।
तीरे नदीपतेर्देवि भक्त्या कुर्याच्छिवालयम् ।। 71

स्थावरं शिवलिङ्गस्य गृहे वा पुरुषाधिकम् ।
न कार्यमालयं देवि चरलिङ्गस्य शङ्करि ।। 72

यत्र क्वापि शिवे भक्त्या कुर्याच्छैलैः शिवालयम् ।
जीर्णं वा पतितं वापि खण्डितं स्फुटितं तथा ।। 73

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पूर्ववत्कारयेद्युक्तः सर्वस्माल्लभते फलम् ।
नवादपि महादेवि जीर्णोद्धारः प्रशस्यते ।। 74

प्रासादं गोपुरं वापि प्राकारं मण्टपं तथा ।
कर्तुरभ्यधिकं पुण्यं लभते नात्र संशयः ।। 75

भक्त्या वित्तानुसारेण कुर्यात्प्रासादसञ्चयम् ।
अल्पे महति वा पुण्यं सममाढ्यदरिद्रयोः ।। 76

वित्तशाठ्येन यः [1]कुर्यात्पुण्यमाढ्योऽपि मानवः ।
न स तत्फलमाप्नोति प्रलोभाक्रान्तमानसः ।। 77

तस्मान्मदालयं देवि कुर्याद्वित्तमवञ्चयन् ।
अष्टेष्टकाभिरपि वा कुर्यादेव शिवालयम् ।। 78

प्रसादार्थं महेशस्य प्रासादं परमेश्वरि ।
तथैवान्यस्य करणे साहाय्यमपि वा स्वयम् ।। 79

वाचा धनेन वा देवि स्वस्याशक्तौ सदा शिवे ।
कुर्याद्विघ्नकरो[2] यस्तु नरके पच्यते चिरम् ।। 80

यावद्ब्रह्मशतं गौरि यः शिवालयभङ्गकृत् ।
किं पूर्णे बहुनोक्तेन भक्त्या वित्तानुसारतः ।। 81

कुर्यद्देवि शिवक्षेत्रं जन्म प्राप्येह मानवम् ।
वापीकूपकरा ये स्युस्तटाकं वा शिवालये ।। 82

---

1. पुण्यं=पुण्यप्रदं कर्म ।
2. कुर्याद्विघ्नं नरो यस्तु ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

[1]यावत्तद्विन्दुतोयानां सहस्रपरिवत्सरम् ।
सुधासागरमध्यस्थो निवसेत् स पितामहैः[2] ।। 83

वनवाटीकरो यस्तु पुष्पार्चाया(यै) महेश्वरि ।
एकं बिल्वतरुं वापि रोपयेद्यः शिवालये ।। 84

यावत्तत्पत्रकुसुमं बीजमूलफलानि च ।
तावद्वर्षसहस्राणि मम लोके महीयते ।। 85

उत्सवार्थं महेशस्य वाहनानि च कारयेत् ।
गजमश्वं भूतगणं वृषं चापि महेशितुः ।। 86

सौवर्णं राजतं वापि दारुणा रङ्गचित्रितम् ।
कृत्वा भवेद्गणेन्द्रोऽसौ मम कैलासमौलिगः ।। 87

रथं च मम देवेशि ध्वजकुम्भपरिष्कृतम् ।
सहस्रशतचक्रं वा दशचक्रं मनोहरम् ।। 88

उत्तमं शतचक्रं स्यात् दशचक्रं तु मध्यमम् ।
अधमं षट्चतुश्चक्रं रथं शिल्पविदो विदुः ।। 89

तादृक्कलाचित्रितं च पुष्पमालापरीवृतम् ।
कद्भिर्देव(र्देव)गन्धर्वैर्ब्रह्मसारथिमुन्नतम् ।। 90

कृत्वा मल्लोकमाप्नोति पुनरावृत्तिवर्जितम् ।
गृहोत्सवार्थे कुर्वीत पुरुषोऽर्धरथं शिवे ।। 91

---

1. यावन्तो बिन्दवस्तत्र तावद्वर्षसहस्रकम् ।
2. सपितामहः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ईश्वर उवाच -

मदालयं(शिवालयं) यः परमेश्वरस्य
करोति लोष्टैरपि भक्तियुक्तः ।
कैलासमायाति विमानवर्यैः
सुरेन्द्रपद्मोद्भवविष्णुवन्द्यः ।। 92

बाल्ये च काष्ठेन शिवं च कृत्वा
मृदापि वा पांसुभिरेव लिङ्गम् ।
सम्पूज्य पुण्यैर्लभते गणेन्द्रतां
भक्त्या कृतत्वादगणय्य पुण्यम् ।। 93

प्रासाद प्रकरं महेशसदने कृत्वा प्रसादं लभेत्
शम्भोर्मुख्यगणेन्द्रतामुपगतो [1]मन्दारवृन्दार्चितः ।
तस्मिन्नीश्वरमूर्तयः सुविहिताः संस्थाप्य मेघायुतं
पुण्यं प्राप्य स मोदते गिरिसुते पातादिशङ्कोज्झितः ।।

यो वाहनानि रुचिराणि गजांश्च भूत-
कैलासवर्यमगजे प्रकरोति भक्त्या ।
दिव्यं सुधांशुवरदीधिति सन्निभाङ्गं
[2]लब्ध्वा शिवे मम निवसेत गणेन्द्रं ।। 95

कृत्वा रथाधिपतये वरचारुचक्र-
प्रोद्यत्पताककनकोत्तमकुम्भमौलिम् ।
वेदाश्वसारथिविधिं रथमीशमूर्तिं
संस्थाप्य कर्षति महोत्सवकरः स मुक्तः ।। 96

।। इति श्रीशिवरहस्ये एकादशाम्शे प्रासादकरणं
नाम सप्तमोऽध्यायः ।।

---

1. वृन्दार   2. लब्ध्वान्तिके मम शिवे ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। अष्टमोऽध्यायः ।।

ईश्वर उवाच -

शृणु देवि प्रवक्ष्यामि सूक्ष्मधर्मं ममैव हि ।
प्रसादजनकं साक्षात् अल्पायासमहाफलम् ।। 1

गोप्यमेतत्प्रयत्नेन नाभक्तेषु प्रकाशयेत् ।
रहस्यं नोक्तपूर्वं मे तस्माद्यत्नेन धारयेत् ।। 3

दरिद्रोऽपि शिवे कर्तुं प्रासादं वा शिवालयम् ।
सम्मार्जनादिभिर्वापि प्रसादं शाम्भवं लभेत् ।। 3

वृत्यर्थं वा महादेवि शिवक्षेत्रे च कर्मकृत् ।
सम्मार्जनं तु यः कुर्यात् मार्जन्या मृदुसूक्ष्मया ।। 4

चान्द्रायणायुतस्येशि फलं मासाच्छिवालये ।
नाहारवशजीर्णा या वन्ध्या या क्षीणवत्सका ।। 5

रोगार्ता गोमयं तस्या न ग्राह्यमुपलेपने ।
अन्याभ्यो होमयं ग्राह्यं स्थाने वा पतितं शुभे ।। 6

उपर्यधश्च सन्त्यज्य गृह्णीयान्मध्यमुत्तमम् ।
वस्त्रपूतेन तोयेन यः कुर्यादुपलेपनम् ।। 7

शिवालयेऽतिरात्रस्य यज्ञस्य फलमाप्नुयात् ।
व्रीहिपिष्टैः प्रकुर्याद्यो रङ्गवल्लीं ममालये ।। 8

अग्निष्टोमस्य स फलं प्राप्नोतीशे न संशयः ।
पञ्चवर्मकपिष्टैश्च पद्मं शङ्खमुमाकृतिम् ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

रङ्गवल्लीं शिवस्याग्रे स्वस्तिवाद्यैरलङ्कृताम् ।
वाजपेयस्य स फलं नरः स्त्री वा समाप्नुयात् ।। 10

पात्राणि शिवपूजार्थमाहरेच्च यथाबलम् ।
मृद्वश्मदारुजानीशे धातुजान्यधरोत्तरम् ।। 11

अश्मपात्राद्दारुमयं बिल्वौदुम्बरपर्णजम् ।
स्नानार्घ्यदानविधिषु प्रशस्तं शिवपूजने ।। 12

दारवेणार्घ्यपात्रेण यद्दत्वा लभते फलम् ।
तस्माच्चतुर्गुणं पुण्यं शिवे मृत्पात्रदानतः ।। 13

ताम्रपात्रादपि श्रेष्ठं कांस्यपैत्तलसम्भवम् ।
ताम्रपात्राभिषेकेण फलं शतगुणं लभेत् ।। 14

पलाशपद्मपत्राभ्यामर्घ्यं ताम्रसमं भवेत् ।
रौप्यपात्रेण विज्ञेयं तस्माल्लक्षगुणाधिकम् ।। 15

सुवर्णपात्रं च ततो देवि कोटिगुणोत्तमम् ।
एवं स्नानार्घ्यनैवेद्यबलिधूपादिभिः क्रमात् ।। 16

पात्रोत्तरविशेषेण फलं स्यात्परमेश्वरे (रि) ।
मृत्कुम्भताम्रकुम्भेन स्नानं शतगुणोत्तमम् ।। 17

रौप्यं लक्षाधिकं पुण्यं हैमं कोट्यधिकं भवेत् ।
अर्घ्यं पुष्पजलोपेतं यः शिवाय निवेदयेत् ।। 18

स पूज्यः सर्वलोकेषु शिववन्मोदते भृशम् ।
गन्धतोयेन संमिश्रं पुष्पार्घ्याद्युत्तरोत्तरम् ।। 19

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पञ्चगव्यसमायुक्तमर्घ्यं शतगुणोत्तरम् ।
आपः क्षीरकुशाग्राणि घृतं देवि च तण्डुलाः ।। 20

तिलाः शिद्धार्थकाश्चैवमर्घ्यमष्टाङ्गमुच्यते ।
घृतं विनाक्षतं ग्राह्यमिति केचित्प्रचक्षते ।। 21

यवतण्डुलगोधूममाषैरक्षतमादिशेत् ।
अर्घ्यमष्टाङ्गमापूर्य लिङ्गमूर्ध्नि विशोधयेत् ।। 22

दशवर्षसहस्राणि शिवलोके महीयते ।
कपिलापञ्चगव्येन धृतक्षीरयुतेन च ।। 23

स्नानं दशगुणं ज्ञेयमितरस्मान्नसंशयः ।
स्नानं फलशतं ज्ञेयमभ्यङ्गः पञ्चविंशतिः ।। 24

फलानां द्वे सहस्रे तु महास्नानं शिवे विदुः ।
पयोदधिघृतक्षौद्रशर्कराद्यैरनुक्रमात् ।। 25

ईशादिमन्त्रैः संस्थाप्य शिवलोकमवाप्नुयात् ।
यः पुमान् तिलतैलेन करयन्त्रोद्भवेन च ।। 26

शिवाभिषेकं कुरुते स मे प्रियतरो भवेत् ।
अभिषेको दशफलः स्नानार्थं शतमीश्वरि ।। 27

महास्नाने ह्यशक्तस्य कुम्भं द्रोणत्रयं शिवे ।
पञ्चविंशत्पलेनैव लिङ्गेऽभ्यङ्गं तु कारयेत् ।। 28

घृतेन वाऽथ तैलेन गन्धयुक्तेन वा शिवे ।
शिवस्य सर्पिषा स्नानं प्रोक्तं पलशतेन वै ।। 29

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पलानां द्विसहस्रेण महास्नानं विधीयते ।
तस्यार्धं मधुना देवि दध्ना तत्सममीश्वरि ।। 30

तत्पादतः शर्करया स्नानमेतच्छिवे मम ।
नीरस्नानयुतं देवि दध्ना घृतपयस्ततः ।। 31

मधुना सितया देवि पुण्यं स्यात्तच्छताधिकम् ।
पादस्नानं महादेवि कुम्भत्रयमितीरितम् ।। (?) 32

क्षीरस्नानं महेशस्य कापिलेनेतरेण वा ।
कुर्यात्तस्यापराधानि (धांश्च)क्षमते शङ्करःशतम् ।। 33

खण्डदध्ना योऽभिषिञ्चेत् सहस्रं क्षमते शिवः ।
वर्षकोटिसहस्रैस्तु यत्पापं समुपार्जितम् ।। 34

घृताभिषेको लिङ्गस्य दहेत्सर्वं न संशयः ।
लिङ्गस्य दर्शनं पुण्यं दर्शनात्स्पर्शनं वरम् ।। 35

स्पर्शनादर्चनं क्षेष्ठं घृतस्नामतः परम् ।
मधुस्नानेन देवेशि अश्वमेधफलं लभेत् (भवेत्) ।। 36

सितया स्नाप्य मां देवि सर्वजीववधोद्भवैः ।
पापैर्न लिप्यते गौरि पुण्यं महदवाप्नुयात् ।। 37

कृष्णाष्टम्यां सोमवारे प्रदोषे वा महेश्वरि ।
घृतस्नानकरो यश्च स फलं लभते शिवे ।। 38

कुलैकविंशमूर्तिश्च शिवलोके महीयते ।
क्षीरस्नानात् क्षरत्यंहः देवि जन्मशतार्जितम् ।। 39

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

क्षीरेण दध्नाज्येनापि सितया मधुना फलम्
अभिषिच्य मुदा लिङ्गं लभेत् (?) पर्वणि वा शिवे ।। 40

सङ्क्रान्तावयने पाते ग्रहणे सोमसूर्ययोः ।
अयुतं यो गवां दद्याच्छाम्भवेषु च यज्वसु ।। 41

वस्त्रहेमसवत्सानां द्विजवर्येषु तल्लभेत् । (?) ।
नारिकेलोदकेनापि योऽभिषिञ्चेन्महेश्वरि ।। 42

चरं वा स्थिरलिङ्गं वा स्नानमात्रेण पुण्यभाक् ।
गवामयनयज्ञस्य कदलीफलमानतः ।। 43

फलानां च सहस्राणि स्नानं रम्भाफले विदुः ।
शतं वा दशकं वापि मध्यमाधममुच्यते ।। 44

स्नाप्य रम्भाफलैर्लिङ्गमुर्वरादानजं लभेत् ।
कोशैर्यः पानसानां तु अभिषेके शतं शिवे ।। 45

सहस्रं परमं देवि शतं मध्यममुच्यते ।
एषामेकतमं स्नानं गोदानदशकं फलम् ।। 46

स्नानमिक्षुरसेनापि यो लिङ्गे सकृदाचरेत् ।
लभेच्छिवं वंशशतैर्मम लोके महीयते ।। 47

पक्वाम्रसुरसैर्देवि अभिषिच्य महेश्वरम् ।
जम्बीरसारैर्यौ लिङ्गं स्नापयेद्भक्तिसंयुतः ।। 48

विधूय पापकलिलं सोमवद्राजते शिवे ।
कुशतोयेन यो लिङ्गं स्नापयेद्भक्तिमान्नरः ।। 49

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

काञ्चनेन विमानेन ब्रह्मलोके महीयते .
गन्धचन्दनतोयेन यो लिङ्गं स्नापयेच्छिवे ।। 50

गन्धर्वलोकमाप्नोति दिवि गन्धर्वपूजितः ।
पुष्पोदकेन सावित्रं कौबेरं हिम(हेम)वारिणा ।। 51

रत्नोदकेन चाप्यैन्द्रं लोकं सम्प्राप्य मोदते ।
द्रोणत्रयान्धसां राशिं द्रोणपुष्पनिभं शिवे ।। 52

दत्वा लिङ्गस्य मौलौ मे मत्समीप्यमुपैष्यति ।
पुण्यं स लभते गौरि शिवरात्रौ शताधिकम् ।। 53

सितेन भस्मना स्नाप्य गन्धिना शोधितेन च ।
द्रोणपञ्चकमानेन स मदग्रे प्रमोदते ।। 54

कूपोदकाच्च ताटाकं ताटाकाद्वाप्यमुत्तमम् ।
नदीनां चैव सर्वासां पुण्यानां चाब्धिसङ्गजम् । 55

वरं गङ्गा महादेवि स्नाने पर्युषितं न मे ।
वस्त्रपूतेन तोयेन यो लिङ्गं स्थापयेत् सकृत् ।। 56

सर्वकामसमृद्धात्मा वारुणं लोकमाप्नुयात् ।
पाटलोत्पलपद्मानि करवीराणि चम्पकम् ।। 57

स्नानकालेऽम्बुयोज्यानि कल्कानि सुरभीणि च ।
तेनाभिषिच्य लिङ्गे मे राजसूयफलं लभेत् ।। 58

कर्पूरागरुतोयेन यो लिङ्गं स्नापयेत् सकृत् ।
सर्वपापविनिर्मुक्तः प्रयाति शिवमन्दिरम् ।। 59

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पितॄनुद्दिश्य यो लिङ्गं स्नापयेच्छीतवारिणा ।
तृप्ताः स्वर्गं प्रयास्यन्ति पितरो नरकादपि ।। 60

लिङ्गं स्नाप्य महादेवि जलाविच्छिन्नधारया ।
ग्रीष्मे *गलन्तिकाभिर्वा नैरन्तर्यं दिवानिशम् ।। 61

स मे गणेशः स्कन्दः स्यात् अश्वमेधायुतं लभेत् ।
श्रीखण्डद्रवसारेण यो विलिम्पेदुमासखम् ।। 62

ग्रीष्मर्तौ सकलर्तौ वा पौण्डरीकफलं लभेत् ।
कृष्णागरुं देवदारुं प्रभवं श्रीतरोरपि ।। 63

गन्धं दत्वा चन्द्रमौलौ द्वादशाहफलं लभेत् ।
त्रिफलं चन्दनं प्रोक्तं कुङ्कुमं तत्समं स्मृतम् ।। 64

कर्पूरं तु तदर्धं स्यात् घनसारश्च तत्समः ।
पलमेकं च कस्तूर्याः मेलनाद्यक्षकर्दमः ।। 65

यक्षकर्दमपङ्केन यो विलिप्य महेश्वरम् ।
सोऽग्निचित्याऽयुतमखफलमाप्नोति मानवः ।। 66

लिङ्गमूर्तेर्महेशस्य शिवस्य परमात्मनः ।
स्नानकाले प्रकुर्वीत तौर्यत्रिकरवं शिवे ।। 67

भेरीमद्दलशङ्खानां काहलं वरदुन्दुभीन् ।
वीणावेणुमहाढक्कापटहानकडम्बराः ।। 68

---

* गलन्तिकाः A small pitcher. A small water-Jar with a hole in the bottom from which the water drops upon the object of worship (an image, Linga) plared below.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कांस्यझल्लरवाद्येभ्यश्चर्मवाद्यं विशिष्यते ।
ततो मुखेन चाध्मातं ततस्तन्त्रीभवं शिवे ।। 69

एवं वादित्रघोषं यः प्रकुर्यात्स्नान कर्मणि ।
वंशलक्षयुतो धीमान्मम लोके महीयते ।। 70

नाट्यार्थमङ्गनाजालं लयशिक्षासमन्वितम् ।
तरुणं रूपसम्पन्नं गेयवादित्रकोविदम् ।। 71

दत्वा लिङ्गालये भद्रे सर्वामृद्धिमवाप्नुयात् ।
घृताभ्यङ्गे घृतस्नाने यद्विलिङ्गस्य रूषितम् ।। 72

यवगोधूमजैश्चूर्णैः कषायैर्गन्धयोजितैः ।
कवोष्णेनाम्बुना देवि स्नापयेत्तदनन्तरम् ।। 73

घर्षयेद्बिल्वपत्रैश्च लिङ्गपीठं सुशोधयेत् ।
दशधेनुसहस्राणि ददतः फलमाप्नुयात् ।। 74

कपिलापञ्चगव्येन कुशवारियुतेन च ।
स्नापयेन्मन्त्रपूतेन ब्रह्मस्नानमघापहम् ।। 75

ईश्वर उवाच -

शङ्खानां च सहस्रकैरपि तथा धारा सहस्रीघटैः
कुम्भैश्छिद्रशताष्टकैर्वरगवां शृङ्गाग्रधारादिभिः ।
स्नाप्याम्बुप्रभवैः महेशजनिम श्रीरुद्रमन्त्रैःशिवे
पुण्यं प्राप्य स मोदते गिरिसुते कैलासमौलौ गणः ।।

।। इति श्रीशिवरहस्ये एकादशाम्शे अष्टमोऽध्यायः ।।

---

* संस्नाप्यान्वहमीशलिङ्गमनघं श्रीरुद्रमन्त्रैः शिवे ।
इति शोधितः श्लोकपादः पादार्थानुसारितया ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। नवमोऽध्यायः ।।

पार्वत्युवाच -

पुष्पैःकतिविधैः पूजा कर्तव्या कथयस्व मे ।

ईश्वर उवाच -

पुष्पैररण्यसम्भूतैः पत्रैर्वा गिरि सम्भवैः ।। 1

अपर्युषितनिश्छिद्रैः प्रोक्षितैर्जन्तुवर्जितैः ।
आत्मारामोद्भवैर्वापि पुष्पैः सम्पूजयेच्छिवम् ।। 2

पुष्पं जातिविशेषेण भवेत्पुण्यं ततोऽधिकम् ।
तपःशीलगुणोपेते पात्रे वेदस्य पारगे ।। 3

दत्वा सुवर्णमयुतं यत्फलं कुसुमे शुभे ।
दशदत्वा सुवर्णानि यत्फलं तदवाप्नुयात् ।। 4

अर्कपुष्पेऽपि वैकस्मिञ्छिवाय विनिवेदिते ।
एवं पुष्पविशेषेण फलं तस्य ततोऽधिकम् ।। 5

पुष्पजातिविशेषेण यथा स्यात्तन्निबोधत ।
अर्कपुष्पसहस्रेभ्यो बकपुष्पं विशिष्यते ।। 6

बकपुष्पसहस्रेभ्योवरदन्तुरकं* परम् ।
धत्तूरकसहस्रेभ्यो बृहत्पुष्पं विशिष्यते ।। 7

बृहत्पुष्पसहस्रेभ्यः करवीरं विशिष्यते ।
करवीरसहस्रेभ्यः कुशपुष्पं विशिष्यते ।। 8

---

* धत्तूरक or धत्तूर - The white thorn apple.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कुशपुष्पसहस्रेभ्यः शमीपुष्पं विशिष्यते ।
शमीपुष्पसहस्रेभ्यः श्रीमन्नीलोत्पलं वरम् ।। 9

सर्वेषामेवपुष्पाणां प्रबलं नीलमुच्यते ।
नीलोत्पलसहस्रेण यो मालां सम्प्रयच्छति ।। 10

अलाभे तु सहस्राणां तदर्धार्धेन मालिकाम् ।
शिवाय विधिवद्भक्त्या तस्य पुण्यफलं शृणु ।। 11

कल्पकोटिसहस्राणि कल्पकोट्ययुतानि च ।
वसेच्छिवपुरे श्रीमान् शिवतुल्यपराक्रमः ।। 12

शेषाणां पुष्पजातीनां यत्फलं परिकीर्तितम् ।
तत्फलस्यानुसारेण शिवलोके महीयते ।। 13

शम्याश्चैव बृहत्याश्च तुल्यं कुसुममुच्यते ।
करवीरसमा ज्ञेया जाती विजयपाटला ।। 14

श्वेतमन्दारकुसुमं सितपद्मसमं भवेत् ।
नागचम्पकपुन्नागौ धुत्तूरक समौ स्मृतौ ।। 15

केतकी मागधा चैव ह्यधिका च मदन्तिका ।
शिरीष सर्जबन्धूक कुसुमानि विवर्जयेत् ।। 16

गन्धवन्त्यपवित्राणि यानि तानि विवर्जयेत् ।
गन्धहीनमपि ग्राह्यं पवित्रं यत्कुशादिकम् ।। 17

सात्विकं तद्धि कुसुममपवित्रं तु तामसम् ।
कनकानि कदम्बानि रात्रौ देयानि शङ्करे ।। 18

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

दिवा शेषाणि पुष्पाणि दिवा रात्रौ च मल्लिका ।
रात्रौ स्वर्णकदम्बानि अर्धरात्रौ च मल्लिका ।। 19

प्रहरं तिष्ठते जाती करवीरमहर्निशम् ।
कीटकेशापविद्धानि शीर्णपर्युषितानि च ।। 20

स्वयं पतितपुष्पाणि त्यजेद्भूपहतानि च ।
मुकुलैर्नार्चयेद्देवं अपक्वं न निवेदयेत् ।। 21

अलाभे सति पुष्पाणां तत्पत्राणि निवेदयेत् ।
पत्राणामप्यलाभे तु फलान्यपि निवेदयेत् ।। 22

फलानामप्यलाभे तु तृणगुल्मौषधीरपि ।
ओषधीनामभावे तु मानसं प्रवरं शुभम् ।। 23

प्रत्येकमुक्तपुष्पेषु दशसौवर्णकं फलम् ।
स्रङ्निबन्धेषु तेष्वेव द्विगुणं फलमिष्यते ।। 24

यः सुगन्धैर्मुक्तपुष्पैर्लिङ्गं सम्यक्प्रपूजयेत् ।
मालाभिर्वा सुगन्धाभिः सोऽनन्तफलमश्नुते ।। 25

बिल्वपत्रैरखण्डैर्यः सकृल्लिङ्गं प्रपूजयेत् ।
सर्वपापविनिर्मुक्तः शिवलोके महीयते ।। 26

*धुन्धूरकैश्च यो लिङ्गं सकृत्पूजयते (?) नरः ।
स गोलक्षफलं प्राप्य शिवलोके महीयते ।। 27

---

* धत्तूरकैः इत्येव साधु ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

बृहतीकुसुमैर्भक्त्या यो लिङ्गं सकृदर्चयेत् ।
गवामयुतदानस्य फलं प्राप्य शिवं व्रजेत् ।। 28

मल्लिकोत्पलपद्मानि जातीपुन्नागचम्पकैः ।
अशोकश्वेतमन्दारकर्णिकारसुमानि च ।। 29

करवीरार्कमन्दारान् शमीपाटलकेसरम् ।
कुशापामार्गकुमुद कदम्बद्रोणकानि च ।। 30

सौगन्धिकासमानागसिन्धुशाफालिकार्जुनैः ।
तुलसीकर(त)काङ्कोलनागवञ्जुलसम्भवैः ।। 31

नन्द्यावर्तेश्च शम्याकतिलकं नवमल्लिका ।
मरुपुन्नागदन्ती च मालतीकुटजादयः ।। 32

पुष्पैरेतैर्यथालाभं यो नरः पूजयेच्छिवम् ।
स च यत्फलमाप्नोति तदेकाग्रमनाः शृणु ।। 33

सूर्यकोटिप्रतीकाशैर्विमानैः सार्वगामिकैः ।
पुष्पमाल्यपरिक्षिप्तैर्गीतवादित्रनिःस्वनैः ।। 34

तन्त्रीमधुरवाद्यैश्च स्वच्छन्दगमनालसैः ।
रुद्रकन्यासमाकीर्णैर्देवदानवकिन्नरैः ।। 35

चामरैर्वीज्यमानश्च स्तूयमानः सुरासुरैः ।
गच्छेच्छिवपदं दिव्यं यत्र वा रुचिरं भवेत् ।। 36

यस्तैर्वापीह कुसुमैर्जलस्थलरुहैः शिवम् ।
अन्वहं पूजयेद्भक्त्या शिवलोके महीयते ।। 37

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शिवस्योपरि यः कुर्यात्सुखसत्पुष्पमण्टपम् .
शोभितं पुष्पमालाभिरापीडनप्रलम्बिनम् ।। 38

अत्याश्चर्यमहायानैदिव्यपुष्पोपशोभितैः ।
सर्पोपरि चरन् श्रीमान् गच्छेच्छिवपुरं सुखी ।। 39

अनेकाकार विन्यस्तैः सुगन्धि कुसुमैर्गृहे ।
यः कुर्यात्पर्वकालेषु विचित्रकुसुमोज्ज्वलम् ।। 40

स पुष्पकविमानानां सहस्त्रैः परिवारितः ।
दिव्यस्त्रीसुखसम्भोगक्रीडारतिसमन्वितः ।। 41

अक्षयं मोदते कालं अचिरात् (अवाप्य)शिवमन्दिरम् ।
शिवादिसर्वलोकेषु यत्रेष्टं तत्र याति सः ।। 42

पूजासु भक्तिविन्यासवद(च)नादिषु सर्वदा ।
फलमेव समासेन दातुर्वित्तानुसारतः ।। 43

फलमिष्टं समाप्नोति लिङ्गं सम्पूजयन्नरः .
शिववत् ससुपुत्राद्यानन्दवान् मोदते चिरम् ।। 44

लिङ्गवेदी भवेद्देवी लिङ्गं साक्षान्महेश्वरः ।
तयोःसम्पूजनं भक्त्या देवि देवश्च पूजितौ ।। 45

स्वयमुत्पाद्य पुष्पाणि यः शिवं पूजयेत्सदा ।
तानि साक्षात् प्रगृह्णाति तद्भक्त्या सततं शिवः ।। 46

यः कुर्यात्तु शिवाराममाम्रबिल्वादिशोभितम् ।
जातीविजयराजाब्जकरवीरार्ककुब्जकैः ।। 47

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पुन्नागवकुलैश्चैव अशोकोत्पलचम्पकैः ।
कदलीयूपहोमाद्यैस्तस्य पुण्य फलं शृणु ।। 48

यावत्तत्पत्रकुसुमबीजमूलफलानि च ।
तावद्वर्षसहस्रेण रुद्रलोके महीयते ।। 49

न पर्युषितदोषोऽस्ति बिल्वपत्रस्य शङ्करि ।
बिल्वानां चूर्णमपि वा पातयेल्लिङ्गमूर्धनि ।। 50

नाबिल्वं पूजयेल्लिङ्गमन्यैस्तन्नामतो यजेत् ।
अपामार्गौर्दर्भपत्रैः पूज्य वेतससम्भवैः ।। 51

अहर्निशं कृतैः पापैर्मुच्यते नात्र संशयः ।
पत्रेषु बिल्वपत्रं स्यात् पुष्पे नीलोत्पलं प्रियम् ।। 52

तत्तत्कालभवं चान्यत्प्रियं मे परमेश्वरि ।
प्रहरं तिष्ठते ! जाती करवीरमहर्निशम् ।। ।। 53

तुलस्यां बिल्वपत्रेषु सर्वेषु जलजेषु च ।
न पर्युषितदोषोऽस्ति बिल्वं स्याद्वर्षमीश्वरि ।। 54

पद्मं पञ्चदिनात्त्याज्यं शेषं पर्युषितं दिनात् ।
एभिर्यः पुष्पलक्षैर्मां *समभ्यर्च्यैव मुक्तिभाक् ।। 55

तस्याहं मुक्तिदं ज्ञानं प्रयच्छाम्येव शङ्करि ।

---

* समभ्यर्चयते नरः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ईश्वर उवाच -

बिल्वापामार्गजाजीतुलसिशमिबृहत्कानकं भृङ्गदूर्वा-
मन्दाम्भोजाहिदर्भामुनितिलकतगारब्रह्मकत्वारमल्ली ।
चापाश्वारातिकुम्भीदमनमरुवकाबिल्वतोहानिशस्ता-
त्रिंशत्र्येकार्यरीशोदधिनिधिवसुभभूयमाभूययेव (?) ।। 57

यत्तत्पर्युषितं न चैव कलितं वृन्तैर्विहीनं शिवे
दुर्गन्धाद्युपहन्तृकेतकमहापद्मादि नार्च्यं शिवे ।
छित्वा नैव निपातयेत्सुममुपे सम्पूर्णमेवार्चयेत्
सौवर्णेषु च रत्नगर्भकलि ते नो पर्युषितत्वे विधिः ।। 58

स्वारामोद्भवमेव पुष्पमगजे मत्पूजनार्हं भवेत्
नो वा शूद्रकलब्धमाहतमधो यात्येव तत्पूजनात् ।
भूमौ वा पतितैरपि स्पृशति चेत्स्नानादिहीनो नरः
पुष्पेष्वेवमयं विधिर्भवति मे नो बिल्वपत्रोत्तमे ।। 59

शुक्राख्य पत्रं च कपित्थ पत्रं
निर्गुण्डिकावारणबिल्वपत्रम् ।
पञ्चैव बिल्वानि ममेशि पूजने
प्रशस्तरूपं प्रियमेव बिल्वम् ।। 60

वसुधाराधिप मित्रपादपूज्या
वसुधाधृग्वरहारपादसाराः ।
सकृदारग्वधपुष्पतोऽर्च्य लिङ्गे
सकलप्राणिवधोत्थपापमुक्ताः ।। 61

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

गौरीयल्लकलिङ्गपूजनरतोमल्लीभिरेवांदयं-
मल्लीभिर्नियमेन मल्लयरतो गल्लस्य वाद्यं चरन् ।
हल्लीलास्यलयानुगौ मम कृपावल्ली प्ररोहं गता
तस्मिन्नेव समुल्लसत्यनुदिनं सल्लापतस्तस्य हि ।। 62

पारिभद्रसुमपूजया शिवे-
वीरभद्रगणपोपमलीलः ।
भद्रमेव लभते जिततन्द्रो
रुद्र एव स भवेन्न दरिद्रः ।। 63

शिवे मरुबकैर्बकैरपि तथैव सच्चम्पकै-
स्तथा कुरवबकैर्धवैःकनकनागपुन्नागकैः ।
समर्च्य शिवमंहसा प्रवरराशिपारंगतो
जनो भवति मुक्तिभागतुलतुङ्गलिङ्गे मम ।। 64

कदलीफलपुष्पपूजया
दलितान्येव भवन्ति पातकानि ।
दलितान्यथ तस्य दुःखजाला-
न्यमितान्यप्यथ सत्यमेव गौरि ।। 65

कुशकाशसमर्चको यदि स्या-
न्मयि भक्तोऽम्बरकेशलिङ्गके मे ।
यमपाशकशाभिघातदुःखं
न भवेज्जातु कदाचिदस्य गौरि ।। 66

भूतास्वपामार्गदलैः समर्च्य
लिङ्गं ममाङ्गं विशते स धन्यः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कनिष्ठजन्मापि स गर्भदुःखं-
नैवाप्नुयाज्जातु सुदर्भतोऽर्च्य ।। 67

जितैणमदसौरभैरसमबिल्वपुष्पैर्दलैः
सुसौरभसुमैः शिवे नववसन्तकालोत्थितैः ।
जनो जनि विवर्जितां गतिमुपैति भाग्योदयै-
र्निशासु वरकेतकीकुसुमपूजकोधन्यधीः ।। 68

यःपुण्डरीककुसुमैर्नवचन्द्रखण्ड-
लीलालकावलितलिङ्गसुपूजकश्चेत् ।
आखण्डलादिमुखवन्दितपादपीठ-
श्चण्डांशुजातवदनं न स जातु पश्येत् ।। 69

कमलैरमलैर्महेशलिङ्गं
शतपत्रैःशतपत्रमित्रनेत्रम् ।
परिपूज्य लभेत्कलत्रपुत्रं
मखसत्रादधिकां तु पुण्यवृद्धिम् ।। 70

बिम्बाभदाडिमकदम्बकदम्बपुष्पै-
रम्बापतेः प्रियतमोत्तमचारुलिङ्गम् ।
बृन्दारवृन्दवरनायकमौलिवन्द्यो
बन्धाद्विमुक्तिमुपयाति न पापगन्धम् ।। 71

अतसीतुलसीभिरीशलिङ्गं
कुमुदैरप्यमदैर्मुदा भवानि ।
सकृदीश्वर पूज्य (?) वन्य पुष्पैः
यदि सामान्य नरो भवेत्स धन्यः ।। 72

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अर्कद्वयं च करवीरमुनीन्द्रपुष्पै-
धात्री पवित्रसुमैर्वरजातिकाभिः ।
द्रोणैश्च नन्दिकुसुमैरसमैः कदम्बैः
शेवन्तिकात्रयमुमे परिपूज्य धन्यः ।। 73

जातेन किं तेन हि पारिजात-
पूजारतं यस्य न मानसं स्यात् ।
मन्दोऽपि मन्दार सुमं समर्प्य
वाचस्पतिं धिक्कुरुते सभासु ।। 74

शमीकुसुमपूजया सुमशरारिलिङ्गे शिवे
शरारिरिवनीरगोऽप्युरगवैरिवेगातिगः ।
भवेसुचिरसम्भृतैरघसहस्त्रकैरावृतो-
ऽप्यनारतमनुस्मरेत् शमनजातभीत्युज्झितः ।। 75

सौवर्णवर्णसमदिव्यसुकर्णिकारैः
सम्पूज्य लिङ्गमगजे सकलोऽपि वर्णः ।
पर्वण्यपि प्रथितदोपहर प्रदोषे-
ऽपर्णापतेः प्रियतरो गणपः स तूर्णम् ।। 76

सितासितसुपाटलीपटलपुष्पसम्पूजया
स पाटयति पातकद्रुमसहस्त्रमेव द्रुतम् ।
स सङ्कटकुलं सदा न हि कदापि पश्येन्नरः
सकण्टकपथं शिवे यमभटोरुदण्डाहतः ।। 77
ईषच्छिरीषकुसुमैर्मम लिङ्गमौलौ
(ईशा)एषोऽनुरक्तहृदयःसुविशेषयेच्चेत् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

हित्वाघसङ्घमगजे गणपुङ्गवेन्द्रो
भद्राणि सोऽद्य(देवि) लभते स सुरेन्द्रवन्द्यः ।। 78

उत्फुल्लहल्लकुसुमैर्मृगबालपाणि-
लिङ्गार्चनेन कलयेन्न स जातु कालम् ।
रङ्कोऽप्यसौ भवति सर्वधराधिनाथ-
वन्द्याङ्घ्रियुग्मनखचन्द्ररुचिर्भवानि ।। 79

मन्दाराम्बुजमल्लिकाविरचितां मालां च नीलोत्पलैः
युक्तां यः प्रददाति शङ्करमहालिङ्गे सहस्रैः कृताम् ।
तस्यार्धार्धसुसङ्ख्यया सुविहिता [1]स्यात्प्रीतये मुक्तिद
मुक्तापुष्पसमर्चनादपि सदा [2]सम्प्रीतये मे परा ।। 80

पुष्पाध्यायमिदं[3] सदैव हृदये धार्यं हि वर्यैः सदा
कार्यं स्यान्मम पूजनं सुविहितं वीर्योन्नतैः शैलजे ।
गर्वं चाप्यपहृत्य धैर्यपरमैर्हस्तार्चितैः पावनै-
रर्च्योऽहं भुवि सादरं सुमगणैर्हीनो भवेत्पातकैः ।।

।। इति श्रीशिवरहस्ये एकादशाम्शे पुष्पाध्यायोनाम
नवमोऽध्यायः ।।

---

1. स्याद्भुक्तिमुक्तिप्रदा ।
2. मत्प्रीतये सा परा ।
3. अध्यायशब्दस्य नपुंसकत्वं चिन्तयम् । लक्षाधिकपद्य निर्मातृ विषये दोषापादनमनुचितमेव । ततापि बहुत्र पौनक्त्यं, अस्य अर्वाचीन-कालीनत्वेऽपि प्राक्कालीनताबुद्ध्युच्पादनाय लक्षाधिक शब्ददोषाः नियमविरुद्धप्रयोगाः एकस्मिन्नेव पद्येवृत्तविपरिणामाश्चेति इतीदं सर्वं खेदावहं भवति ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। दशमोऽध्यायः ।।

ईश्वर उवाच -

वक्ष्ये पूजाविधिं देवि मम लिङ्गे विशेषतः ।
नक्षत्रेषु विशेषेण [1]फलं स्यात्कृतविग्रहः ।। 1

उपलिप्य समां भूमिं गोमयेन स्वयं शिवे ।
आसनं परिकल्प्यास्मिन् आवाह्य वृषभं ततः ।। 2

लिङ्गमूर्तिं महादेवं स्नाप्य पुण्योदकेन च ।
पञ्चाक्षरेण मन्त्रेण प्रतिष्ठाप्य वृषासने ।। 3

पुष्पैश्च बिल्वपत्रैश्च पूजयेद्गिरिकन्यके ।
धूपदीपादिकं दत्वा नैवेद्यं चैव बुद्धिमान् ।। 4

प्रदक्षिणत्रयं कृत्वा ब्रह्मचर्यपरायणः ।
पञ्चाक्षरेण मन्त्रेण स्नाप्य लिङ्गं समाहितः ।। 5

तिलैश्च तण्डुलैः पुष्पैः पूज्य पूर्वोक्तमार्गतः ।
हविर्निवेद्य मेधावी दिनमेकमुपोषितः ।। 6

सुरापानकृतं पापं स्वर्गंदग्ध्वा च गच्छति ।
तृतीयायां तथापूज्य शिवलिङ्गं समाहितः ।। 7

ब्राह्मणान् भोजयित्वा तु स्वर्णस्तेयाद्विमुच्यते ।
चतुर्थ्यां शङ्करं भवक्त्या पूज्य पूर्वोक्तमार्गतः ।। 8

---

1. नक्षत्रेषु विशिष्टेषु कृते भूरिफलप्रदम् ।
2. दग्ध्वा स्वर्गं प्रयच्छति इति वक्तव्यं भवति ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

यथाशक्ति धनं दत्वा ब्राह्मणाय समाहितः ।
गुरुतल्पगदोषेण मुच्यते नात्र संशयः ।। 9

पञ्चम्यां तण्डुलेनैव पूज्य पूर्वोक्तमार्गतः ।
महापातकसंसर्गाद्दोषान्मुक्तो भवेन्नरः ।। 10

षष्ठ्यां घृतेन च स्नाप्य चन्दनेन घृतेन च ।
महापातकदोषेण मुच्यते नात्र संशयः ।। 11

सप्तम्यां शुद्दतोयेन स्नाप्य पुष्पैः प्रपूजयेत् ।
क्षुद्रपापात्प्रमुच्येतं शिवे नात्रास्ति संशयः ।। 12

अष्टम्यां पञ्चगव्येन स्नाप्य तोयेन शङ्करम् ।
सर्वपापाद्विनिमुक्तः शिवलोकमवाप्नुयात् ।। 13

नवम्यां पूज्य देवेशं सर्वान् कामानवाप्नुयात् ।
दशम्यामीश्वरं पूज्य सर्वपापैः प्रमुच्यते ।। 14

एकादश्यां शुचिः स्नात्वा भोजनेन विवर्जितः ।
शिवं शुद्धोदकैः स्नाप्य शिवलोके महीयते । 15

द्वादश्यामभिषिच्येशं गुग्गुलं धूपयेन्नरः ।
ब्रह्मलोकमवाप्नोति नात्रकार्या विचारणा ।। 16

त्रयोदश्यां शिवं पूज्य शङ्करं चन्दनैःसह ।
विलिप्य सर्वपापेभ्यो मुच्यते नात्र संशयः ।। 17

चतुर्दश्यां महादेवं स्नाप्य पूर्वोक्तमार्गतः ।
तिलतण्डुलपुष्पाद्यैः पूज्य विप्रं तु भोजयेत् ।। 18

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अभीष्टं सकलं लब्ध्वा शिवलोके महीयते ।
पञ्चदश्यां शुचिः स्नात्वा तोयेनैवाभिषेचयेत् ।। 19

पुष्पैर्नानाविधैः पूज्य ब्राह्मणान् भोजयेन्मुदा ।
ऐश्वर्यमचलं लब्ध्वा प्रेत्य स्वर्गे महीयते ।। 20

अश्विन्यां देवमाराध्य ब्राह्मणान् भोजयेन्नरः ।
अश्विनीलोकमाप्नोति नात्र कार्या विचारणा ।। 21

भरण्यां रुद्रमाराध्य ब्राह्मणान्भोजयेन्नरः ।
यमलोकमवाप्नोति यावदाचन्द्रतारकम् ।। 22

कृत्तिकायां शिवं पूज्य ब्राह्मणानेव भोजयेत् ।
अग्निलोकमवाप्नोति मुने नात्र विचारणा ।। 23

रोहिण्यां शङ्करं पूज्य ब्राह्मणायान्नदो नरः ।
सर्वपापाविनिर्मुक्तो ब्रह्मलोकमवाप्नुयात् ।। 24

आर्द्रायां देवमाराध्य दद्याद्ब्राह्मविदे धनम् ।
सम्यग्ज्ञानमवाप्नोति नात्र कार्या विचारणा ।। 25

आदित्ये योऽर्चयित्वेशं ब्राह्मणानेव भोजयेत् ।
आदित्यलोकमाप्नोति स पुनर्ब्रह्म गच्छति ।। 26

पुष्यैः पूज्य महादेवं विप्रायान्नं ददाति यः ।
बृहस्पतिसमो बुद्ध्या भवेदत्र न संशयः ।। 27

आश्लेषर्क्षे महादेवं पूज्य पुष्पं ददाति यः ।
नागलोकमवाप्नोति न पुनर्भुवि जायते ।। 28

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मखे देवं समाराध्य तिलानामाढकं नरः ।
शिवं वा द्रोणयुग्मं वा ब्राह्मणाय ददाति यः ।। २९

सर्वपापविनिर्मुक्तः पितृलोकमवाप्नुयात् ।
भगनक्षत्रके भक्त्या पूज्य देवं त्रियम्बकम् ।। 30

यथाशक्तिप्रदानेन भगलोकमवाप्नुयात् ।
उत्तरे शिवमभ्यर्च्य गां ददाति द्विजाय यः ।। 31

सूर्यलोकमवाप्नोति नात्र कार्या विचारणा ।
हस्ते पूज्य महादेवं दत्वा ब्रह्मविदे धनम् ।। 32

सूर्यलोकमवाप्नोति सुखं चाक्षय्यमाप्नुयात् ।
चित्रायामीश्वरं पूज्य दत्वा भक्त्याङ्गुलीयकम् ।। 33

त्वष्टारं प्राप्य तेनैव सह रुद्रमवाप्नुयात् ।
स्वातौ(त्यां)सोमं समभ्यर्च्य ब्राह्मणानपि पूजयेत् ।। 34

वायुलोकमवाप्नोति सौख्यं चानन्त्यमश्नुते ।
विशाखे पूज्य देवेशं दत्वा वेदविदे धनम् ।। 35

इन्द्रलोकमवाप्नोति मुने नात्र विचारणा ।
मूले महेश्वरं पूज्य ब्राह्मणाय ददाति यः ।। 38

अन्नं स नैर्ऋतं लोकं गत्वा रुद्रमवाप्नुयात् ।
पूर्वाषाढे महादेवं पूज्य पुष्पं ददाति यः ।। 39

स याति वारुणं लोकं नात्र कार्या विचारणा ।
उत्तराषाढनक्षत्रे पूज्य देवं त्रियम्बकम् ।। 40

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

दत्वा तण्डुलमन्वग्यो ब्राह्मणायानसूयवे ।
ब्रह्मलोकमवाप्नोति नात्रकार्या विचारणा ।। 41

इन्द्रं शतभिषे पूज्य ब्राह्मणायानसूयवे ।
दत्वा वस्त्रं हिरण्यं वा वारुणं लोकमाप्नुयात् ।। 42

पूर्वभाद्रपदे पूज्य पुराणं परमेश्वरम् ।
एकपादमरं याति मुने नात्र विचारणा ।। 43

यस्तु पूज्योत्तरे भाद्रे शिवं परमकारणम् ।
ब्राह्मणाय विनीताय ददाति धनमुत्तमम् ।। 44

आहिर्बुध्न्यमवाप्नोति नास्ति संशयकारणम् ।
रेवत्यामपि पूज्येशं दत्वा विप्राय भोजनम् ।। 45

सूर्यलोकमवाप्नोति सत्यं सत्यं वदाम्यहम् ।
अर्कवारे महादेवि त्रिः कृत्वा तु प्रदक्षिणम् ।।46

प्रणम्य दण्डवद्भूमौ भक्त्या परमया सह ।
स्नानस्त्रक्चन्द्रनाद्यैस्तु स्वशरीरमलङ्कृत (?)* ।। 47

भोग्यं ददाति या वेश्या यथेष्टं शिवयोगिने ।
तस्याः पुण्यफलं ब्रह्मन् शृणु वेदविदां वरः ।। 48

ब्रह्महत्यासुरापानस्वर्णस्तेयादिपातकैः ।
मुच्यते नात्र सन्देहो मद्भक्तस्य हि पूजनात् ।। 49

---

* स्वलङ्कृतवपुर्लता इति सङ्गतः पाठः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

इह लोके मुने पुंसां वल्लभा भवति ध्रुवम् ।
आयुरारोग्यमैश्वर्यमपि प्राप्नोत्यसंशयम् ।। 50

प्रेत्य सूर्यप्रतीकाशैर्विमानैर्बहुभिः सह ।
पावनं लोकमाप्नोति सुखं चाक्षय्यमश्नुते ।। 51

अर्कवारे तु विद्वांसं धनं दत्वा तु भोजयेत् ।
वेश्या ह्यलङ्कृता ब्रह्मन् तस्य पुण्यफलं शृणु ।। 52

सर्वपापविनिर्मुक्ता सर्वैश्वर्यमवाप्नुयात् ।
प्रेत्य चेश्वरमाप्नोति मुने नात्र विचारणा ।। 53

सोमवारे महादेवं दृष्ट्वा भूमौ प्रणम्य च ।
वस्त्रं वा धनमन्यद्वा स युद्धे जयमाप्नुयात् ।। 54

बुधवारे विरूपाक्षं प्रणम्य भुवि दण्डवत् ।
*अभ्यङ्गं योगिनं कुर्वन्नारोग्यं शीघ्रमाप्नुयात् ।। 55

जीववारे शिवं दृष्ट्वा प्रणम्य परमेश्वरम् ।
ज्ञानिनं भोजयित्वा तु शीघ्रं ज्ञानमवाप्नुयात् ।। 56

शुक्रवारे मुने दृष्ट्वा प्रणम्य वृषवाहनम् ।
शिवयोगिकरे दत्वा यत्किञ्चिद्धमुत्तमम् ।। 57

वन्ध्या पुत्रमवाप्नोति नरश्चाप्नोति काङ्क्षितम् ।
मन्दवारे महादेवं नमस्कृत्य तु योगिनम् ।। 58

---

* अभ्यङ्गं योगिने(नःवा) अभ्यक्तं योगिनं इति वा ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ददाति धनमत्यल्पमपि यो मुनिसत्तम ।
स राजवल्लभो भूत्वा धनमक्षय्यमाप्नुयात् ।। 59

व्यतीपाते धनं धान्यं तिलं वा तण्डुलं तु वा ।
नमस्कृत्य महादेवं योगिने यो ददाति च ।। 60

सर्वपापविनिर्मुक्तः स्वर्गं मोक्षं च विन्दति ।
बहुनोक्तेन किं ब्रह्मन् महादेवस्य पूजनात् ।। 61

दानानि यज्ञाश्च महातपांसि
सन्यासवृत्तिश्च जितेन्द्रियत्वम् ।
सर्वं न तुल्यं भवतीश्वरस्य
लिङ्गस्य बिल्वार्चनमेव विद्धि ।। 62

सत्रातिरात्रजनितादपि पुण्यसङ्घात्
पात्रेषु दानकरणादपि पुण्यवर्यम् ।
नक्षत्रपूजनमुमे मम लिङ्गमौलौ
*द्वित्रैर्जलैः कुसुमपत्रवरैः यत्कृतं स्यात् ।। 63

।। इति श्रीशिवरहस्ये एकादशाम्शे
तिथिनक्षत्रवारार्चनमहिमानाम
दशमोऽध्यायः ।।

---

* द्वित्रैः सुमैर्जलकणैरपि पत्रवर्यैः । इति पाठः सुगमः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। एकादशोऽध्यायः ।।

ईश्वर उवाच -

लिङ्गद्वयं समाख्यातं चलं चाचलमेव च ।
चरं धातुषु सङ्क्लृप्तंमचलं(रं)पार्थिवादिषु ।। 1

चले सदावसत्येवप्रीतियुक्तो महेश्वरः ।
अचले मन्त्रसंस्कारात् वत्स्यत्येव सदाशिवः ।। 2

जङ्गमस्यावमानेन स्थावरं निष्फलं भवेत् ।
तस्माल्लिङ्गद्वयं देवि नावमन्येत कर्हिचित् ।। 3

कृतावमानो यो मोहान्नरके पच्यते चिरम् ।
तस्मात्पत्रैः फलैस्तोयैः क्षीराद्यैः स्नापयेच्छिवम् ।। 4

स यत्फलमाप्नोति तदेकाग्रमनाः शृणु ।
सर्वयज्ञतपोदानतीर्थ देवेषु यत्फलम् ।। 5

तत्फुण्यं कोटिगुणितं स्नाप्य लिङ्गं लभेन्नरः ।
मातृतः पितृतश्चैव यतश्चोद्वहते स्त्रियः ।। 6

कुलैकविंशमुत्तार्य मम लोके महीयते ।
गन्धानुलेपनात्पुण्यं द्विगुणं चन्दनस्य तु ।। 7

चन्दनादगरु ज्ञेयं पुण्यमष्टगुणाधिकम् ।
कृष्णागरौ देवदारौ फलं यत्सममेव हि ।। 8

यक्षकर्दमजालेपस्ततः शतगुणोत्तरः ।
लिङ्गे स्वालेपनं कुर्याद्दिव्यगन्धैः सुगन्धिभिः ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

वर्षकोटिशतं दिव्ये शिवलोके स मोदते ।
चन्दनागरुकस्तूरीकर्पूरैः कुङ्कुमादिभिः ।।

लिङ्गमापीठमालिप्य कल्पकोटिं वसेद्दिवि ।
संवीज्य तालवृन्तेन वायुलोके महीयते ।। 11

लाक्षां प्राप्याङ्गनिर्मुक्ताद्धूपं दद्यान्महेश्वरे ।
नैरन्तर्येण मासार्धं तस्य पुण्यफलं शृणु ।। 12

कल्पायुतं महादेवि भोगं भुक्त्वा मदालये ।
भुक्त्वा शिवपुकरे भोगान् तस्यान्ते स महीपतिः ।। 13

स सारवद्धरायुक्तं राज्यं निष्कण्टकं लभेत् ।
गुग्गुलुं घृतसंमिश्रं दुग्धं गृह्णाति शङ्करः ।। 14

अपराधसहस्रं च इहामुत्रकृतं क्षमे ।
देवदारुजकर्पूरधूपदीपौ महाफलौ ।। 15

श्रीफलं चाज्यसंमिश्रं दध्ना प्रियतरं शिवे ।
एभिः सुगन्धिकं धूपं षट्सहस्रगुणोत्तरम् ।। 16

अगरुर्दशसाहस्रं द्विगुणः स्यात्सितागरुः ।
गुग्गुलुर्दशसाहस्रं सघृतं स्यात् अनन्तकम् ।। 17

एतानि सघृतं दत्वा अग्निष्टोमायुतं लभेत् ।
पापानि निर्दहन्त्येव तुषाग्निरिव काञ्चनम् ।। 18

मधूकतिलतैलेन कौसुम्भेन महेश्वरि ।
दद्याच्छिवालये दीपान् सितवर्तिसमुज्ज्वलान् ।। 19

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मधूकतिलतैलोत्थदीपे स्याद्दशकं फलम् ।
कौसुम्भं तच्छताच्छ्रेष्ठं घृतेनानन्त्यमुच्यते ।। 20

धृतदीपप्रदानेन गव्येन शतयोजनम् ।
मम लोकं भासयित्वा विमानैरर्कसन्निभैः ।। 21

गणश्रेष्ठो भवेद्देवि नैरन्त्तर्येण दीपतः ।।
दशवारं शतं मध्यं सहस्रं वरमेव मे ।। 22

[1]एकं वापि शिवस्याग्रे दीपदोऽज्ञाननाशकृत् ।
यः कुर्यात्कार्तिके मासि शोभनां दीपमालिकाम् ।। 23

घृतेन वाऽथ तैलेन चतुर्दश्यष्टमीषु च ।
पूर्णिमायाममायां वा ग्रहणे पुण्यपर्वणि ।। 24

यावत्प्रदीपसङ्ख्यानं तैलेनाथ घृतेन वा ।
तावद्युगसहस्राणि शिवलोके महीयते ।। 25

सूर्यायुतप्रतीकाशैर्विमानैर्भासयन्दिशः ।
दीपवृक्षान् समुद्‌बोध्य शर्वस्यायतने शिवे ।। 26

सर्वस्माद्‌द्विगुणं पुण्यं लभते नात्र संशयः ।
कृष्णवर्णसितं पीतं पट्‌टकौशेयराङ्कवम् ।। 27

कार्पासजं वा देवेशि वस्त्रं दत्वा शिवाय तु ।
[2]स्वर्णकार्पासजं वापि उपवीत प्रदो मम ।। 28

---

1. एको वापि शिवस्याग्रे दीपो ह्यज्ञाननाशकृत् ।
2. स्वर्णकार्पाससंवीतमुपवीतं मनोहरम् इति सङ्गतः पाठः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

वासांसि सुविचित्राणि स्वर्णवन्ति मृदूनि च ।
धूपितानि शिवे दत्वा लभेत्पुण्यमनुत्तमम् ।। 29

यावत्तद्वस्त्रसन्तूनां परिमाणं विधीयते ।
तावद्युगसहस्राणि शिवलोके महीयते ।। 30

योऽर्कपत्रपुटे कृत्वा मधुपर्केण मन्त्रितम् ।
निवेदयित्वा(?) शर्वाय सोऽश्वमेधफलं लभेत् ।। 31

तण्डुलप्रस्थमानेन कुर्वन्नन्नं सुसंस्कृतम् ।
शिवाय तन्निवेद्यैव ह्यमेयफलफाग्भवेत् ।। 32

दिने दिने पर्वणि वा शाल्यन्नेन सुपुण्यभाक् ।
हरिद्राकृसरं दद्याद्यवगोधूममिश्रितम् ।। 33

चाणकाढकमुद्गान्नं दत्तं स्यादुत्तरोत्तरम् ।
सगुडं सघृतं देवि प्रशस्तं मन्निवेदने ।। 34

क्षीराज्यदधिमिश्रान्नं शाकापूपाज्यमिश्रितम् ।
दत्वा वर्षायुतं तृप्तो दिवि तिष्ठति भोगवान् ।। 35

यावन्तस्तण्डुलास्तस्मिन् नैवेद्यपरिसङ्ख्यया ।
तावद्युगसहस्राणि रुद्रलोके महीयते ।। 36

गोधूमशर्करापूपं घृतपाचितमुत्तमम् ।
पिष्टोद्भवं मध्यमं स्याद्भक्ष्यं चैवोत्तरोत्तरम् ।। 37

केवलं पायसं दत्वा शिवायानन्तपुण्यभाक् ।
पानीयपानकानां तु प्रदाने शङ्कराय तु ।। 38

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

दधिक्षीरघृतक्षौद्रशर्करातक्रकस्य वा ।
शीतस्य सलिलस्यापि सकर्पूरस्य शङ्करि ।। 39

निवेदने परा प्रीतिर्मम स्यादुत्तरोत्तरा ।
कदलीनारिकेलाम्रदाडिमीमातुलिङ्गकम् ।। 40

पानसं वा फलान्येव सुस्वादुरसवन्ति च ।
दद्यान्नैवेद्यमीशाय फलं स्यादुत्तरोत्तरम् ।। 41

पञ्चसौगन्धिकोपेतं ताम्बूलं चोत्तमोत्तमम् ।
एलालवङ्गकर्पूर जातीपत्रफलानि च ।। 42

नारिकेलफलोपेतं मातुलङ्गसमायुतम् ।
एलालवङ्गकर्पूरमुखवासं प्रचक्षते ।। 43

मुखवासं शिवे दत्वा वसेद्वर्षशतं दिवि ।
शालिपिष्टोद्भवैर्दीपैःषड्विंशत्या तु कारयेत् ।। 44

शतं तु मध्यमं देवि सहस्रं परमं विदुः ।
वृषाकारनराकारं नाक्षत्रं पञ्चवैककम् ।। 45

कुम्भे दीपं ततो दद्यात्पुण्यं स्यादुत्तरोत्तरम् ।
कुर्यान्नीराजनं लिङ्गे शिवमुद्दिश्य मङ्गलैः(मङ्गलम्)।।

अष्टम्यादिषु सर्वेषु दिवसेषूत्सवेषु च ।
यावत्पर्वाणि विधिवत्कुर्यान्नीराजनं शिवे ।। 47

वर्तिसङ्ख्यासहस्राणि दिवि *मोदति सूर्यवत् ।
कांस्यलोहमयीं घण्टां प्रबध्नीयाच्छिवालये ।। 48

---

* मोदेत इति आत्मनेपदि धातोर्विधिलिङ्गप्रयोगः साधुः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

यावन्नादं पुण्यफलं कुर्वतो गिरिकन्यके ।
भेरीमृदङ्गपटहवीणावेवेणुरवाकुलम् ।। 49

शङ्खकांस्यादिवादित्रं यः शिवाय निवेदयेत् ।
स विमानैर्महाभोगैर्वंशवीणाप्सरोगणैः ।। 50

युगानामयुतं देवि वसेच्छिवपुरे शिवम् ।
स्त्रीणां नाट्यादिकरणे तौर्यत्रिकपुरसरम् ।। 51

यथेष्टमैश्वरे लोके मोदेताभूतसंप्लवम् ।
शिवस्योपरि यो दद्याद्वितानं पट्टवस्त्रजम् ।। 52

मुक्ताजालिकपर्यन्तं मध्यपद्मेन चित्रितम् ।
योऽन्तर्गर्भगृहे शम्भोर्बध्नीयात्स विमुच्यते ।। 53

योऽन्तः शिवगृहं भक्त्या सुसुगन्धैःप्रलेपयेत् ।
कवाटद्वारकुड्यन्तं तिर्यगूर्ध्वं सवेदिकम् ।। 54

वासयेत्पुष्पमालाभिर्धूपैश्चापि सुगन्धिभिः ।
यः कुर्यात्सकृदप्येवं तस्य पुण्यफलं शृणु ।। 55

सर्वकामसुसम्पूर्णैर्महायानैर्मनोरमैः ।
आपूरयन्दिशःसर्वा आमोदैश्च सुगन्धिभिः ।। 56

कल्पकोटिशतं दिव्यं शिवलोके महीयते ।
तस्यान्ते पृथिवीपालो भवेद्राजा महेश्वरि ।। 57

भक्त्या निवेद्य रुद्राय तालवृन्तं सुशोभनम् ।
दशवर्षसहस्राणि रुद्रलोके महीयते ।। 58

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मयूरव्यजनं दत्त्वा शिवाय च सुशोभने ।
वर्षकोटिशतं साग्रं शिवलोके महीयते ।। 59

शिवाय चामरं दत्त्वा हैमरौप्यादिदण्डकम् ।
हंसकुन्देन्दुधवलं मृदुवालं मनोहरम् ।। 60

चामरासक्तहस्ताग्रदिव्यस्त्रीपरिवारितः ।
महाभोगैर्विमानस्थश्चिरं शिवपुरं वसेत् ।। 62

यो दद्याद्विमलं छत्रं पाण्डरं गुच्छमण्डितम् ।
चन्द्रवृत्तं शतैषीकानिर्मितं हेमदण्डकम् ।। 62

एकातपत्रसाम्राज्यं त्रिणेत्रकृपया लभेत् ।
शिवस्य पुरतो दत्त्वा दर्पणं चन्द्रदर्पहम् ।। 63

चन्द्रांशुनिर्मलः श्रीमान् सुभगः कामरूपधृक् ।
कल्पायुतसहस्रं तु शिवलोके स मोदते ।। 64

कृत्वा प्रदक्षिणं भक्त्या शिवस्यायतने नरः ।
अश्वमेधसहस्रस्य लभेत् पुण्यं पदे पदे ।। 65

अङ्गप्रदक्षिणं कोटिनमस्कारापरार्धकम् ।
उरसा शिरसा दृष्ट्या बाहुभ्यां पादतः शिवे ।। 66

अष्टमूर्तिं तथाष्टाङ्गैः प्रणमन् मुक्तिमेनि च ।
पश्यल्लिङ्गं महेशस्य प्रणवेन हृदा शिवे ।। 67

स्तुवीत देवमीशानं गिरा च स्पष्टया सदा ।
एवं संस्तुवते मुक्तिं दिशाम्यहमतन्द्रितः ।। 68

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

प्रातर्दृष्ट्वा महालिङ्गं नैशं पापं विनश्यति ।
आजन्म सञ्चितं पापं मध्याह्ने दर्शनात्क्षयम् ।। 69

यात्येव निशि दृष्ट्वेशं गोदानायुतपुण्यभाक् ।
प्रदोषे दोषराहित्यं ब्रह्महत्यादिपञ्चकम् ।। 70

नश्यत्येव शिवं वीक्ष्य शिवधर्मस्य सङ्ग्रहः ।

ईश्वर उवाच -

यो हीत्थं शिवधर्मसारमघभित् ज्ञात्वैव सम्पूजयन्
याति स्थानमहो गिरीन्द्र तनये कैलासशैलं मम ।
तत्रैवाविरतं मदीयममलं ज्ञानं च वेदान्तजं
सम्प्राप्यामरराजवन्दितपदो नित्यं प्रमोदेत सः ।।

।। इति श्रीशिवरहस्ये एकादशाम्शे शिवधर्मकथनं नाम
एकादशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। द्वादशोऽध्यायः ।।

ईश्वर उवाच -

निर्माल्यं धारयेत् भक्त्या शिरसा पार्वतीपतेः ।
राजसूयायुतफलं प्राप्नोति भुवि मानवः ।। 1

शिरसा शिवनिर्माल्यं भक्त्या यो धारयिष्यति ।
अशुचिर्भिन्नमर्यादः सर्वावस्थां गतोऽपि वा ।। 2

निर्माल्यधारणादेव शुचिः पूतो भविष्यति ।
निर्माल्यधारणे योग्यास्त्रिपुण्ड्रपरिचिह्नताः ।। 3

निर्माल्यं पुरतो दत्तं हविरन्नं फलं जलम् ।
न चण्डादिकृतं यत्र तद्भोज्यं भस्मभूषितैः ।। 4

नाभिषिक्तं स्थावरे वा चरे वापि महेश्वरि ।
अन्नं विनापि तद्बाह्य फलानि क्षीरजातयः ।। 5

स्वायम्भुवे पार्थिवे च धातुजे रसरत्नजे ।
न चाण्डालकृते देवि तद्ग्राह्यं वैदिकैरपि ।। 6

मलोदरे न मेग्राह्यं निर्माल्यं जलमण्वपि ।
अन्येषामागमानां तु निर्माल्यं नैव भक्षयेत् ।। 7

न लङ्घयेत निर्माल्यं सोमसूत्रं च पुण्यहृत् ।
अशाम्भवेभ्यो निर्माल्यं दत्वा नरकमृच्छति ।। 8

शम्भोः स्नानोदकं सेव्यं सर्वतीर्थमयं हितत् ।
बिन्दुत्रयाधिकं नैव ग्राह्यं तीर्थं शिवस्य हि ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

यतो मूत्रं भवेद्देहे पीत्वा मृत्युमवाप्नुयात् ।
कृत्वा कुम्भाभिषेकान्तां अष्टबन्धनसंस्कृतिम् ।। 10

शिवशास्त्रविधानेन सर्वपापैः प्रमुच्यते ।
देवखात समा भूमिः प्रागुदक्प्रवणोन्नता ।। 11

शिवायतननिक्षेपे विशिष्टा सा शिवे सदा ।
कूपं खात्वा शिवागारे वापीमपि तटाककम् ।। 12

यावत्तत्तोयमानेन पितृभिर्मोदते दिवि ।
शिवलिङ्गाग्रगं देवि यत्तोयं पुरतः स्थितम् ।। 13

शिवगङ्गेति विज्ञेयं तत्र स्नातः शिवं व्रजेत् ।
गङ्गाद्याः पुण्यनद्यो याः समुद्रास्तत्र संस्थिताः ।। 14

शिवाग्रगे समुद्रेऽपि नित्यं स्नात्वा शिवं व्रजेत् ।
अन्यत्र सागरे देवि स्नानं पर्वणि शस्यते ।। 15

दूरतः शिखरं दृष्ट्वा नमस्कारं शिवालये ।
सप्तजन्मकृतैः पापैस्तत्क्षणादेव मुच्यते ।। 16

लिङ्गानां तु शतं साग्रं शिवक्षेत्रं शिवे विदुः ।
देहिनां तत्र पञ्चत्वं शिवसायुज्यकारकम् ।। 17

मनुष्यस्थापिते लिङ्गे क्रोशमानं शिवे सदा ।
स्वयंभूते सहस्रं स्यादार्षे पुण्यं तदर्धकम् ।। 18

पापाचारोऽपि मनुजो मृतस्तत्र परां गतिम् ।
प्राप्नोति परमां देवि बाणलिङ्गे स्थिते गृहे ।। 19

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तस्मादावसथं कुर्याच्छिवक्षेत्रसमीपतः ।
शिवे पूजां शिवे होमं शिवे दानं शिवे जपः ।। 20

अक्षयानि फलान्याहुःशिवाग्रे चेत्कृतं बहु ।
कुरुक्षेत्रे निवसतो यत्फलं नैमिशे शिवे ।। 21

प्रयागे च प्रभासे च गङ्गासागरसङ्गमे ।
रुद्रकोट्यां गयायां च सालग्रामेऽमरेश्वरे ।। 22

पुष्करे भारभूमेशे गोकर्णे मण्डलेश्वरे ।
श्रीशैले त्रियम्बके देविं महाकाले जटेश्वरे ।। 23

वाराणस्यां तु केदारे ओङ्कारे वैद्यनाथके ।
कालांतरे([1]कालञ्जरे)तथा देवि दृष्ट्वा मां परमेश्वरम् ।।24

सम्पूज्य भक्तानपि च यथा शक्त्याऽन्नपानदः ।
गोदायां यमुनायां वा [2]वेणा [3]चर्मण्वतीषु च ।। 25

[4]तापापयोष्ण्यां कावेर्यां तुङ्गाताम्रासु नित्यशः ।
तत्तत्तीरस्थितक्षेत्रे लिङ्गं दृष्ट्वापि नाकिनः ।। 26

---

1. कालाञ्जर Name of a mountain and adjacent county Modern Kallinjar (An epithat of Siva)
2. वेणा Name of a river (Joining the Krishna river)
3. चर्मण्वती Name of a river flowing in the Ganga, the modern Chambal.
4. Name of a river rising in the Vidhya Mountain identified by same with the Modern TAPTI river. But move correctly with PURNA a feeder of the river.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

श्रीकण्ठे रत्नभूताद्रौ जम्बुके चाक्षमातृके ।
जाप्ये कुम्भेश्वरे देवि अर्जुने श्वेतकानने ।। 27

छायावने वेदवने वल्मीके पुण्डरीकके ।
वृद्धाचले गोनगे च कालहस्तेऽरुणाचले ।। 28

काश्यां हालास्यसदने पुण्ये वै गन्धमादने ।
छित्वा पादद्वयं वापि शिवक्षेत्रे वसेत् तु यः ।। 29

स याति शिवसायुज्यं क्षेत्रसन्यासकारणात् ।
क्षेत्राणां दर्शनं पुण्यं प्रवेशस्तच्छताधिकः ।। 30

तस्माच्छते(त)गुणं लिङ्गदर्शनं च प्रदक्षिणा ।
तस्माच्छतगुणं पुण्यं जलस्नानमतः परम् ।। 31

क्षीरस्नानमतो देवि शताधिकमनुत्तमम् ।
दध्ना सहस्रमाख्यातं मधुना सितया शतम् ।। 32

घृतस्नाने तु चानन्त्यं भक्तपूजा ततोऽधिका ।
नास्ति लिङ्गार्चनात्पुण्यमधिकं भुवि निश्चितम् ।। 33

लिङ्गेऽर्चितेऽखिलं विश्वमर्चितं तन्न संशयः ।
यः पूजितं शिवं दृष्ट्वा प्रणमेत् भुवि शङ्करि ।। 34

यस्तु लिङ्गार्चनं त्यक्त्वा देवानन्यांश्च पूजयेत् ।
रत्नं विहाय मूढात्मा यथा काचमपेक्षते ।। 35

चतुर्दश्यामथाष्टम्यां पूर्णिमायां च पूजयेत् ।
पूर्वकालेषु शर्वार्चा विशिष्टा सर्वकर्मणः ।। 36

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ग्रहणे सोमरव्योश्च पूजाऽनन्तफलप्रदा ।
शिवमाल्यापनयनं पूजान्तेषु प्रमार्जनम् ।। 37

एकैकमेव तुल्यं स्यात् चान्द्रायणफलं शिवे ।
यः कुर्याद्रुद्रहोमं च चरुणा सघृतेन च ।। 38

सकृत्तत्राग्निकार्येण रुद्रसायुज्यमाप्नुयात् ।
शिवालयाग्रे यः कुर्यात् दशमण्डलकानि तु ।। 39

सर्वान्नबलिदानं च कृत्वा पुण्यायुतं लभेत् ।
पञ्चाक्षरं जपेत्क्षेत्रे नास्त्यन्यत्पापशोधनम् ।। 40

रुद्राणां प्रणवस्यापि सर्वपापविशोधने ।
न हि पञ्चाक्षरजपात् श्रेयोऽन्यद्भुवनेश्वरि ।। 41

एवं ज्ञात्वा जपेद्विद्वान् पञ्चाक्षरमतन्द्रितः ।
वृक्षान् पुष्पफलार्थाय रोपयित्वा शिवार्चने ।। 42

धेनूश्चैव शिवश्रेष्ठाः प्रयान्ति परमां गतिम् ।
शिवार्थं सततं कार्या पुष्पहिंसा महेश्वरि ।। 43

यज्ञार्थे पशुहिंसा च नास्ति दोषस्य कारणम् ।
पूजितं वा महादेवं पूज्यमानमथापि वा ।। 44

श्रुत्वाऽनुमोदयेद्वापि स गच्छेदैश्वरं पदम् ।
अर्चितं परमेशानं भवं शर्वमुमापतिम् ।। 45

सकृत्प्रसङ्गात् दृष्ट्वापि सर्वपापैः प्रमुच्यते ।
आवाहनं च सान्निध्यं स्थापनं पूजनं तथा ।। 46

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पञ्चभिः स्नपनं देवि रुद्राद्यैश्च विमुच्यते ।
पञ्चाक्षरेण मन्त्रेण बिल्वपत्रैः शिवार्चनम् ।। 47

करोति श्रद्धया युक्तः स गच्छेदैश्वरं पदम् ।
दर्शनाद्बिल्ववृक्षस्य स्पर्शनाद्वन्दनादपि ।। 48

अहोरात्रकृतं पापं नश्यत्येव महेश्वरि ।
सेकेन बिल्वमूलस्य तोयेनाघनिवारणम् ।। 49

शिवक्षेत्रे भक्तमेकं बिल्वमूलेऽपि वा शिवे ।
भोजयित्वा घृतान्नेन सक्षीरेण स पुण्यभाक् ।। 50

बिल्वमूलं समाश्रित्य यस्त्रिरात्रमुपोषितः ।
हरनाम जपेल्लक्षं सर्वपापैः प्रमुच्यते ।। 51

योऽन्तकाले बिल्वमूले मृतो याति परां गतिम् ।
बिल्वपत्रैरखण्डैस्तु चन्द्रचूडं समर्चयेत् ।। 52

कालाष्टम्यां सोमवारे प्रदोषे पूजयेन्नरः ।
पञ्चभिः पातकैर्देवि मुच्यते नात्र संशयः ।। 53

शुष्कैः पर्युषितैर्वापि बिल्वपत्रैः प्रपूजयेत् ।
युगानामयुतं साग्रं शिवलोके वसेन्नरः ।। 54

स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः ।
शिवलोकमवाप्नोति देहान्ते स सुदर्लभम् ।। 55

शिवार्चनरतो नित्यं महापातकसम्भवैः ।
दोषैः कृतैर्न लिप्येत पद्मपत्रमिवाम्भसा ।। 56

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

दर्शनाच्छिवभक्तानां सकृत्सम्भाषणादपि ।
वाजपेयस्य यज्ञस्य फलं प्राप्नोति शङ्करि ।। 57

ब्राह्मणः क्षत्रियो वैश्यः शूद्रोवाप्यन्त्यजन्मजः ।
शिवभक्तः सदा पूज्यः सर्वावस्थासु शङ्करि ।। 58

नास्याचारं परीक्षेत न कुलं न व्रतं तथा ।
भस्मरुद्राक्षधारी यः पूज्य एव हि शङ्करि ।। 59

कर्मणा मनसा वाचा यस्तु भक्तान् न विन्दति ।
निरयन्निष्कृतिर्नास्य यावदाभूतसमूलवम् ।। 60

शिवभक्तान् वर्जयित्वा सर्वेषां शासकोऽन्तकः ।
किम्पुनर्ममभक्तानां अहमेव हि शासकः ।। 61

न शिवाश्रमिणो मौञ्जी न दण्डो न कमण्डलुः ।
नैव काषायवासांसि भक्तिरेवात्र कारणम् ।। 62

यदि भक्ताः पशुपतौ पापकर्मसु ये रताः ।
यमस्य वदनं देवि नैव पश्यन्ति सर्वथा ।। 63

ये पुनः शान्तमनसः शिवभक्ताजितेन्द्रियाः ।
मर्त्यधर्मगताश्चापि विज्ञेयास्ते गणेश्वराः ।। 64

मृतस्य जीवतो वापि शिवभक्तस्य शङ्करि ।
यमाद्भयं न तस्यास्ति अन्येषां का कथा शिवे ।। 65

तस्माद्भक्ताः सदा पूज्या रुद्रक्षेत्रे विशेषतः ।
यतीनां शाम्भवानां ये कुर्युः शुश्रूषणं मुदा ।। 66

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मठोपकरणैरन्नैरभ्यङ्गैः पादधावनैः ।
शिवयोगिष्वपि शिवे सुपुण्यं महदाप्नुयात् ।। 67

यः कुर्यात्पर्वकालेषु विचित्रकुसुमोज्ज्वलम् ।
वितानमालाविततं धूपदीपविराजितम् ।। 68

मण्टपं च सुगन्धाढ्यं विततं शिवपूजने ।
त्रिसप्तकुलसंयुक्तः शिवलोके महीयते ।। 69

पापकञ्चुकमुत्सृज्य जीर्णां त्वचमिवोरगः ।
याति तत्सदनं गौरि मदनान्तकरस्य मे ।। 70

यः कुर्यात्तु शिवाराममाम्रबिल्वादिशोभितम् ।
जाजीविजयमन्दारकुन्दमल्लिकयान्वितम् ।। 71

पुन्नागनागवकुलैरशोकोत्पलचम्पकैः ।
कदलीपूगहोमाद्यैर्नारिकेलेक्षुखण्डकैः ।। 72

यावत्तत्पत्रकुसुमबीजमूलफलानि च ।
तावद्वर्षसहस्राणि शिवलोके महीयते ।। 73

स्वयमुत्पाद्य पुष्पाणि यः शिवं पूजयेत्सकृत् ।
तानि साक्षात्प्रगृह्णाति महादेवो घृणानिधिः ।। 74

न भूमौ पतितान्येव गृह्णीयादशुचिर्नरः ।
कुड्मलैर्नार्चयेदीशं नापि पर्युषितैरपि ।। 75

न शिवार्चनतुल्योऽस्ति धर्मोऽन्यो भुवनत्रये ।
सर्वमन्यत्परित्यज्य शिवैकाहितमानसः ।। 76

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शिवपूजाविधिं कुर्याद्यदीच्छेच्छिवमात्मनः ।
त्वरितं व्याधिरभ्येति तस्मात्पूज्यः सदाशिवः ।। 77

यावन्नायाति मरणं यावन्नाक्रमते जरा ।
यावन्नेन्द्रियदौर्बल्यं तावत्पूजय शङ्करम् ।। 78

सूत उवाच -

यः पूजयेत् त्रिणयनं शशिखण्डचूडं
बिल्वैर्दलैश्च कुसुमैः शिवलिङ्गमौलौ ।
सोऽत्यर्कराजित विमानवरेण याति
प्रोद्यत्सुधांशुधवलं रजताद्रिमौलिम् ।। 79

।। इति श्रीशिवरहस्ये एकादशाम्शे
शिवगौरीसंवादे नाम
द्वादशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। त्रयोदशोऽध्यायः ।।

ईश्वर उवाच -

मासि मासि महादेवि पूजया मे सदाशिवे ।
किं फलं को विधिस्तस्य समासेन वदामि ते ।। 1

शृणुष्व सावधानेन चेतसा मासि पूजनम् ।
यत्कृत्वा मनुजः सद्यो विद्यां हृद्यां समश्नुते ।। 2

आसमाप्तेर्व्रतस्यास्य भूशय्या नक्तभोजनम् ।
शिवे त्रिषवणं स्नानं भस्मरुद्राक्षधारणम् ।। 3

क्षमा दानमहिंसा च सत्यार्जवपरायणः ।
ब्रह्मचर्यादिनिरतो विरतो विषयेषु च ।। 4

पाषण्डपतितोदक्या सूतकान्त्यजपूर्वकान् ।
वर्जयेत्सर्वयत्नेन मनसा कर्मणा गिरा ।। 5

सन्तुष्टश्च प्रशान्तश्च शिवध्यानरतो भवेत् ।
सम्पूज्य च गणेशानं नान्दीश्राद्धं विधाय च ।। 6

गोदानं च वृषेत्सर्गं कुर्याद्ब्राह्मणभोजनम् ।
शान्तानां शाम्भवानां च शतं दश वरं शिवे ।। 7

तेषामनुज्ञामासाद्य स्वयं नक्ताशनो भवेत् ।
सामान्यमेतत्कथितं व्रतस्यास्य सदाशिवे ।। 8

प्रतिमासं विशेषं च शिवपूजाविधिं शृणु ।
यत्कृत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पद्मरोद्भवं चैत्रे पूजयेल्लिङ्गमैश्वरम् ।
वैशाखे वज्रलिङ्गं च ज्येष्ठे मरतकोद्भवम् ।। 10

आषाढे मौक्तिकं विद्यात् श्रावणे नीलनिर्मितम् ।
मासि भाद्रपदे गौरि गोमेदमणिकक्षितम् (कल्पितम्)।। 11

आश्वयुज्यां च विधिवत् माणिक्योद्भवमुत्तमम् ।
कार्तिक्यां वैद्रुमं लिङ्गं वैडूर्यं मार्गशीर्षके ।। 12

पुष्परागमयं पुष्ये माधे सूर्यस्य कान्तिजम् ।
फाल्गुने चन्द्रकान्तोत्थं लिङ्गं सम्पूज्य शैलजे ।। 13

समुच्चयमिदं स्तोत्रम् स्तुवीत परमेश्वरम् ।
सर्वमासेषु पूजापि बिल्वपत्रैः सदैव माम् ।। 14

शिवं शिवकरं शान्तं शिवात्मानं शिवोत्तमम् ।
शिवमार्गप्रणेतारं प्रणतोऽस्मि सदाशिवम् ।। 15

शाश्वतं शोभनं शुद्धं शश्वद्दोषप्रमोचकम् ।
विश्वं विश्वेश्वरं देवं शङ्करं प्रणमाम्यहम् ।। 16

सर्वपापहरं नाथं सर्वरोगहरं शिवम् ।
सर्वपापप्रशमनं नमाम्यार्तिनिवारकम् ।। 17

अस्थानस्थानसंस्थानसंस्थिति स्थितिकारणम् ।
स्थिर स्थानस्थयोगस्थं स्थाणुमीशं नमाम्यहम् ।। 18

ईशानं पुरुषं घोरं वामं सद्यं महेश्वरम् ।
ईशानं सर्वभूतानामीश्वरं प्रणमाम्यहम् ।। 19

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ईशानं वरदं देवमीश्वरं मन्त्रनायकम् ।
इत्थं मासस्तुतिं देवि स्तुत्वा नत्वा महेश्वरम् ।। 20

स मुक्तः सर्वपापेभ्यो मम लोके भवेद्‌गणः ।
मासार्चनसमो धर्मो नास्त्यन्यो भुवनत्रये ।। 21

इति विज्ञाय यत्नेन पूजनीयो महेश्वरः ।
ये भक्ता देवदेवेशि शिवं शान्तमजं विभुम् ।। 22

पूजयन्ति सदा भक्त्या मद्‌भक्तास्तपसि स्थिताः ।
सम्पूज्य पशुभर्तारं विशुद्धेनान्तरात्मना ।। 23

इह लोके सुखं प्राप्य ते यान्ति परमं पदम् ।
मासि मास्यर्चने देवि नामान्यन्यानि मे सदा ।। 24

प्रवक्ष्यामि मुदा तुभ्यं हृष्टा त्वमवधारय ।
सर्वमासेषुरत्नानामलाभे हैममेव वा ।। 25

हेमालाभे राजतं वा ताम्रजं शैलमेव वा ।
मृन्मयं वा यथालाभं क्षणिकं वान्यदेव वा ।। 26

सर्वगन्धमयं वापि लिङ्गं कुर्याद्यथारुचि ।
व्रतावसानसमये समाचरितनित्यकः ।। 27

कृत्वा वैशेषिकीं पूजां हुत्वा पायसमीश्वरि ।
रुद्रमन्त्रैर्मासि मासि स्वयमाचार्य एव वा ।। 28

पञ्चामृताज्यमिश्रेण बिल्वानां समिधः शुभाः ।
स्वस्वशाखोक्तमार्गेण प्रतिष्ठाप्य हुताशनम् ।। 29

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पूर्वमाघारमाघार्य पश्चादष्टशतं हुनेत् ।
भवायेत्यष्टनाम्नादौ स्विष्टान्तं होममाचरेत् ।। 30

दद्याद्गोमिथुनं देवि मासान्ते शाम्भवाय तु ।
व्रतमेवं शिवप्रीत्यै कुर्वन्मुक्तिमवाप्नुयात् ।। 31

स एव तपतां श्रेष्ठः स एव च महाव्रती ।
न तेन सदृशः कश्चित् कृतकृत्यो ममुक्षुषु ।। 32

दिवा नाश्नन् शिवे नक्तं भुक्त्वा मासार्चनाविधौ ।
मुक्त एव भवेत्सत्यं व्रतं द्वादशमासिकम् ।। 33

पुराणगेन्द्रैश्च कृतं मम प्रीत्यर्थमीश्वरि ।
मुनीश्वरैर्देवगणैर्ब्रह्मविष्णवीश्वरादिभिः ।। 34

तेनैव स्वपदं प्राप्ताः शिवतुल्यबलाः शिवे ।
भस्मधारणसम्पन्नास्त्रिपुण्ड्रपरिचिह्निताः ।। 35

नोक्तपूर्वं मयेशानि मासार्चनमिदं शिवे ।
स यत्फलमवाप्नोति तदेकाग्रमनाः शृणु ।। 36

कल्पकोटिशतं दिव्यं कल्पकोटिशतानि च ।
वसेच्छिवपुरे देवि शिवतुल्यबलो युवा ।। 37

रुद्राणीगणसाहस्त्रैर्वासोभरण* भूषितैः ।(?)
स विमानैर्महाभोगैर्वंशवीणादिभिः सह ।। 38

---

* वस्त्राभरणभूषितैरित्ययं सुगमः पाठः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

दुन्दुभीनां च निर्घोषैनिर्जिताम्बुदनिःस्वनैः ।
युगायुतशतं साग्रं शिवलोके महीयते ।। 39

तस्यान्ते धर्मशेषेण त्रैलोक्याधिपतिर्भवेत् ।
त्वङ्गत्तुङ्गतुरङ्गौघमातङ्गगणसंवृतः ।। 40

सशाङ्गवारितारातिमण्डलोच्चलिताण्डभूः ।
कोदण्डखण्डितोद्दण्डदण्डितारातिमण्डलः ।। 41

विधिं वक्ष्ये समासेन मासार्चनविधौ शिवे ।
चैत्रादिषु च मासेषु स्नात्वा प्रातः समाहितः ।। 42

कृतनित्यक्रियो मौनी प्रतिष्ठाप्य महेश्वरम् ।
उक्तलिङ्गे विशेषेण शद्धोदं स्नाप्य भक्तितः ।। 43

उपलिप्य शुभं देशं गोमयेन नवाम्भसा ।
रङ्गवल्लीभिरापूर्य पद्मस्वस्तिकचिह्नितैः ।। 44

मण्टपं पुष्पमालाढ्यं कृत्वा दर्पणचित्रितम् ।
कुसुमैः *सुसुगन्धैश्च फलैश्च विविधैस्तथा ।। 45

भक्ष्यभोज्यैरनेकैश्च घृतदीपैश्च संयुतम् ।
तस्य दक्षिणपार्श्वे तु विन्यसेदगरुं शिवे ।। 46

दद्यात्पश्चिमपार्श्वे तु शोभनार्थे मनः शिलाम् ।
उत्तरं(रे)चन्दनं दद्याद्धरितालं सुपूजितम् ।। 47

---

* पादपूरणाय सूपसर्गस्याम्रेडनापेक्षया कुसुमैश्चेति कथनमुचितं भाति ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पञ्चामृतैः फलरसैः पञ्चगव्यसुपात्रकैः ।
सामान्यार्घ्य विशेषार्घ्यौ प्राक्स्थाप्यौ पुष्पपूजितौ ।। 48

पाद्यार्घ्याचमनैः पात्रैः शोभितैर्नीरपूरितैः ।
पाटलोत्पलकल्हारकरवीर उशीरकैः (?)।। 44

संयुक्तैः स्थापयेद्देवि मण्टपाग्रे शिवस्य हि ।
दूर्वापामार्गदर्भाग्रपूजितैः कलशोदकैः ।। 50

शङ्खैश्च दक्षिणावर्तै रत्नगर्भैर्महेश्वरि ।
सव्यावर्तैर्यथायोग्यं शङ्खपात्रोपरि स्थितैः ।। 51

सुपुष्पगर्भैः कुम्भैश्च पञ्चपल्लववक्त्रकैः ।
क्षीरं पलशतं प्रोक्तं दधि तद्द्विगुणं भवेत् ।। 52

घृतं तत्त्रिगुणं प्रोक्तं मधु तत्र चतुर्गुणम् ।
सिता पञ्चगुणा तत्र प्रोक्ता मासार्चना विधौ ।। 53

सुश्वेतनारिकेलाम्बुघटैर्दशसुपूरितैः ।
कदलीफलसाहस्रैः पानसैः शतकोशकैः ।। 54

पक्वाम्रजालसुरसैर्जम्बीररससद्घटैः ।
गन्धोदकैश्चन्द्रमिश्रैः सकस्तूरीसमान्वितैः ।। 55

कुशरत्नोदकैर्देवि स्वर्णाद्यैर्वासितैर्जलैः ।
भक्त्या वित्तनुसारेण फलमाढ्यदरिद्रयोः ।। 56

त्वरितैः पावमानैश्च शतरुद्रैर्महेश्वरम् ।
भूतशुद्धिं विहा(धा)यादौ धृतभस्मत्रिपुण्ड्रवान् (?)।। 57

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

रुद्राक्षमालाभरणश्चन्द्राभरणमीश्वरम् ।
कुशचेलाजिने स्थित्वा स्वाचान्तः शिवभावनः ।। 58

प्रागुदङ्मुख एवायमर्चकः शिवपूजने ।
संस्थितः सुस्थिरो मौनी जपेत्पञ्चाक्षरं मनुम् ।। 59

सहस्रमुत्तमं देवि शताष्टोत्तरमध्यमम् ।
अङ्गन्यासकरन्यासैर्न्यसेद्देहं स्वकं शिवे ।। 60

शिवात्मिकां तनुं कृत्वा भावं प्राकृतमुत्सृजेत् ।
तत्तन्मासेषु पुष्पाणि नामान्यपि महेशितुः ।। 61

प्रवक्ष्यामि महादेवि सामान्यं बिल्वपल्लवम् ।
पद्मानि करवीराणि उत्पलानि महेश्वरि ।। 62

उत्फुल्लानि च ग्राह्याणि तत्तन्मासोद्भवान्यपि ।
चरुं सघृतमेवेह प्रशस्तं सार्वमासिके ।। 63

तत्तन्मासान्तपौर्णम्यां होमः कार्यो महेश्वरि ।
स्वस्वशाखोक्तमार्गेण प्रतिष्ठाप्य हुताशनम् ।। 64

परिस्तीर्य हुताशं तमाघाराद्यं ततश्चरेत् ।
पायसं सघृतं देवि जुह्वा च जुहुयाद् द्विजैः ।। 65

स्वयं दशावरैर्विप्रैः शाम्भवैर्भस्मभूषितैः ।
भवाष्टनामभिस्तत्र स्वाहान्तैर्जुहुयात्तदा ।। 66

शतमन्त्रैस्तथा मन्त्रैःशतं सघृतपायसम् (?) ।
ततः स्विष्टकृदन्तो हि होमः कार्यो विजानता ।। 67

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

[1]गावश्च दक्षिणा देया वृषैकादशवत्सकाः (?) ।
सवस्त्रकाञ्चनखुरा रौप्य शृङ्गोरुकांस्यकाः ।। 68

शाम्भवेभ्यो ब्राह्मणेभ्यो मंथवा [3]द्रोणमात्रकं (?) ।
दद्याद्वित्तानुसारेण वाग्यतो भक्तितत्परः ।। 69

विविधं तत्र मासान्ते स्तोत्रैः स्तुत्वा महेश्वरम् ।
प्रसादयेत्स नक्ताशी हविष्यं लवणोज्झितम् ।। 70

नित्यं द्वादशमासं वै त्रिकालस्नानतत्परः ।
धौतवासाः शुचिर्दान्तो भस्मरुद्राक्षभूषणः ।। 71

अग्निरित्यादिभिर्मन्त्रैः शिवसात्कृतमानसः ।
मासार्चनव्रतं ह्येतत्कृत्वा च विधिपूर्वकम् ।। 72

शतं वाथ सहस्रं वा मासान्ते ब्राह्मणार्चनम् ।
द्वादशावरमेवेशि भोजयेद्भक्ष्यभोजनैः ।। 73

वाचयेत्स्वस्ति तान् सर्वान् ताम्बूलैर्दक्षिणादिभिः ।
सयत्फलमवाप्नोति तच्च नान्यमहामखैः ।। 74

आह्वो(अह्नो)ऽन्ते वा द्विजा भोज्याः सायाह्ने वा महेश्वरि।
विमानैः सूर्यसङ्काशैर्याति शम्भोर्वरालयम् ।। 75

---

1. एकादश गावः दक्षिणात्वेन देयाः । ताश्च गावः वृषवत्सकाः भवितव्याः ।
2. सवस्त्राः काञ्चनपट्टावृत (काञ्चनवलयावृत) खुराः, रौप्य-वर्मोज्जवल-च्छृङ्गाः सुयौवनाः इति कथनं युक्तं भवेत् ।
3. अत्रत्याक्षर सङ्घातेन नार्थस्फूर्तिर्भवति ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मातृतः पितृतश्चैव शतवंशसमन्वितः ।। 76

स्कन्द उवाच -

मासार्चनव्रतविधिस्तव विश्रुतोऽयं
पुण्यायुतार्जितगतिप्रदएष धर्मः ।
ज्ञानप्रदोऽयममलः शिवभक्तवर्यै
कार्योऽधुना गिरिसुते शिवतुष्टिसिध्यै ।।
क्षेत्रेषु वा गिरिनदीवरपुण्यदेशे
श्रद्धान्वितोऽथ मनुजो द्विज एव मुख्यः ।
मासेषु शार्वार्चनमेव मुख्यं
सर्वेषु मन्त्र सहितो विधिरेव सिद्धः ।। 78

।। इति श्रीशिवरहस्ये एकादशाम्शे
मासार्चनविधिर्नाम
त्रयोदशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। चतुर्दशोऽध्यायः ।।

ईश्वर उवाच -

चैत्रे त्रिणेत्रमभ्यर्च्य अग्निष्टोमायुतं लभेत् ।
आवाह्य मण्टपे तस्मिन् लिङ्गं माणिक्यसम्भवम् ।। 1

पञ्चपल्लवसंयुक्तं कुम्भमव्रणमुत्तमम् ।
विलिप्य गोमयेन क्ष्मां रङ्गवल्याद्यलङ्कृताम् ।। 2

रम्भास्तम्भयुतं दिव्यं मणितोरणमण्डितम् ।
गन्धपुष्पाक्षतैर्युक्तं पञ्चगव्यपवित्रितम् ।। 3

पञ्चामृतादिसम्भारभृतं फलरसं शिवे ।
कुशदूर्वाक्षतामिश्रैः पाद्यार्घ्याचमनाम्बुभिः ।। 4

गन्धचन्दनपात्रैश्च दीपस्तम्भदशोज्ज्वलम् ।
धूपैर्गुग्गुलुमिश्रैश्च सघृतैः सुमपात्रकैः ।। 5

कल्पयित्वाऽथ सम्भारमर्चको ब्राह्मणैः सह ।
शाम्भवैर्भस्मरुद्राक्षधारिभिः संयुतोऽम्बिके ।। 6

अग्निरित्यादिभिर्मन्त्रैः स्वयमुद्धूलयेत्तनुम् ।
नद्यां वा देवखातादौ वापीकूपोदकैः शुभैः ।। 7

स्नास्यामीत्यथ सङ्कल्प्य चैत्रस्नानेन शङ्करः ।
प्रीयतामिति देवेशि त्रियायुषत्रिपुण्ड्रकः ।। 8

रुद्राक्षहारवलयः कृतनित्यक्रियः शुचिः ।
धौतवस्त्रधरः शान्तः सपवित्रकरस्तथा ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

चेलाजिनास्तृते वापि शिवे कुशमयासने ।
स्थित्वा शिवार्चनस्थाने शिवैकगतमानसः ।। 10

आगमं वैदिकं वापि पूजाक्रमयुतः शिवे ।
मृगटङ्कधरं सौम्यं वस्त्राभरणभूषितम् ।। 11

उमया सहितं ध्यात्वा जपेन्मन्त्रं मुदा युतः ।
पञ्चाक्षरं सहस्त्रं च शतमष्टाधिकं शिवे ।। 12

सङ्कल्प्य मासपूजादौ यजेद्देवममन्यधीः ।
अपनीयाथ निर्माल्यं लिङ्गमौलिगतं शिवे ।। 13

संशोध्य च शुभैर्वस्त्रैः लिङ्गमापीठमम्बिके ।
अद्भिः पूते तथा पीठे देवमावाह्य भक्तितः ।। 14

दृष्ट्वा लिङ्गं तदा प्रोक्तमन्त्रैः शाम्भवसत्तमः ।
पञ्चाक्षरेण तत्सर्वमुपचारं प्रकल्पयेत् ।। 15

गायत्र्या वा समभ्यर्च्य शिवलोकमवाप्नुयात् ।
कल्पिते चासने स्थाप्य धर्मज्ञानमये शुभे ।। 16

वैराग्यैश्वर्यसम्पन्ने [1]दारवे धातुजेऽपि वा ।
ओङ्कारं मध्यपद्मे तु सोमसूर्याग्निसम्भवे ।। 17

[2]पाद्यमाचमनार्थं च दत्वा रुद्राय शम्भवे ।
स्नापयेत्पञ्चगव्येन मधुपर्केण वै शिवे ।। 18

---

1. दारवे बिल्वादिवृक्षगतदारु प्रकल्पिते लिङ्गे ।
2. आचमानाय योऽर्थः समुचितः तमिध्यर्थः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

क्षीरेण दध्नाज्येनापि क्षौद्रेण सितया शिवे ।
फलोदकैस्ततः शुद्धैरम्बुभिः स्वर्णमध्यगैः ।। 19

शोधितैर्वासितैर्देवि पाटलागरुमिश्रितैः ।
गोशृङ्गेनाथ(णाथ)शङ्खेन वर्धन्या वाऽभिषेचयेत् ।। 20

धारां प्रकल्पयेल्लिङ्गे ह्यविच्छिन्नां गिरिन्द्रजे ।
धूपैश्च धूपयेत्तत्र दीपानुद्बोध्य तत्र हि ।। 21

ब्राह्मणैः शाम्भवैः सार्धं लिङ्गं तदभिषेचयेत् ।
एकवारं त्रिवारं वा जप्यो रुद्रः सशान्तिकः ।। 22

एकादशगुणं रुद्रं जप्यं चमकशान्तिकम् ।
तर्पयेदभिषेकान्ते भवायेत्यष्टनामभिः ।। 23

उद्वर्तयेच्छुभैर्वस्त्रैः स्थाप्य(?) पीठे महेश्वरम् ।
चन्दनेनोपलिप्येत वस्त्रयज्ञोपवीतकम् ।। 24

दद्यात्त्रिशाखाबिल्वैश्च पूजयेन्मल्लिकासुमैः।
दमनैश्च शुभैः पद्मैः पुण्डरीकोत्पलादिभिः ।। 25

नीलोत्पलानां मालाभिर्नन्द्यावर्तशमीभवैः ।
चम्पकैर्जातिपुष्पैश्च वकुलैः करवीरकैः ।। 26

दत्वा सौगन्धिकं धूपं पायसं च निवेदयेत् ।
सशर्करास्बुसम्मिश्रमेलाचूर्णविमिश्रितम् ।। 27

---

1. गवयमृगशृङ्गेत्येव वक्तव्ये अत्रेव बहुत्र गो शृङ्गेणेति कथ्यते । सास्नावद्गो शृङ्गेण शिवाभिषेकः कार्योवेति विषये साधव एव प्रमाणम् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पानकं दधिभक्तं च सोपदंशं निवेदयेत् ।
कृत्वा प्रदक्षिणं देवि नमस्कारादिपञ्चकम् ।। 28

शताष्टनामभिः पूजां कुर्याद्बिल्वैर्महेश्वरि ।
नामभिश्छान्दसैर्देवि पूजयेत स्तुवीत च (?) ।। 29

तानि नामानि वक्ष्यामि समाहितमनाः शृणु ।
नमोऽस्तु तुभ्यं देवाय(शुद्धाया)शिवायानन्ततेजसे[1] ।। 30

नमः क्षत्राधिपतये [2]वीजिने(?)शूलिने नमः ।
ह्रस्वायोर्ध्वाय धूम्राय दण्डिने रुक्मतेजसे ।। 31

नमो ज्येष्ठाय श्रेष्ठाय बलप्रमथनाय च ।
नमो वन्याय पूज्याय सद्योजाताय वै नमः ।। 32

गह्वरायाध्वरेशाय हव्यवाहाय चारिणे ।
भूतानामुद्भवायाथ प्रभवे विभवे नमः ।। 33

देवाय द्योतमानाय मानातीताय शम्भवे ।
वेदाङ्गाय प्रधानाय योगसाङ्ख्य विहारिणे ।। 34

ध्रुवाध्रुवाय शान्ताय विश्वाय सुमहर्षये ।
ग्रहाय ग्राह्यरूपाय गृहस्थाय यतात्मने ।। 35

अहोरात्राय मासाय ऋतवे क्रतवे नमः ।
संवत्सराय पतये युगकालात्मने नमः ।। 36

---

1. सुव्रतानन्ततेजसे ।
2. वीजिने इति नामद्वयस्य विषये विमर्शः कार्यः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

परार्धाय प्रसन्नाय शुष्काय हरिताय च ।
धर्माधर्मस्वरूपाय पराय विभवे नमः ।। 37

पुरान्तकाय भीमाय वर्गाय धृतये नमः ।
मन्वन्तराय काव्याय विश्वाप्यायविधायिने ।। 38

विश्वसर्गाय भर्गाय ज्योतिषे दिव्यचक्षुषे ।
कल्पाद्याय निवद्धाय शुद्धबुद्धाय रंहसे ।। 39

ब्रह्मणे ब्रह्मभूताय ब्रह्मादि (धि)पतये नमः ।
विद्येशायादिदेवाय विद्याधिपतये नमः ।। 40

नमो व्रताधिपतये मन्त्राधिपतये नमः ।
पितॄणां पतये चैव पशूनां पतये नमः ।। 41

शेषभूपाय तुष्टाय पुष्टाय च नमो नमः ।
वृषभाय पुराणाय पत्तीनां पतये नमः ।। 42

प्रजापतीनां पतये व्योमकेशाय ते नमः ।
सिद्धाय बृहते चैव परघोषाय ते नमः ।। 43

दैत्यदानवपूज्याय पायवे दक्षघातिने ।
यक्षाय भिक्षुरूपाय कक्षवासाय ते नमः ।। 44

पक्षिवाहप्रपूज्याय गुह्यलिङ्गाय ते नमः ।
पूर्वाय पर्वमध्याय शर्वरीशविधारिणे ।। 45

भव्याय भवरूपाय मखाध्यक्षाय धातवे ।
भववैद्याय घोराय वामदेवाय ते नमः ।। 46

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सद्योजाताय पूर्वाय ईशानाय नमो नमः ।
एवं नामाष्टकेनेशं शतेनैव प्रपूजयेत् ।। 47

स्तुवीतैतं महादेवं चैत्रे वै लिङ्गरूपिणम् ।। 48

सद्योजातादिविद्या प्रभवविधिकृते शूलिने गोत्रिणे ते
मत्तेभाजिनवाससे विधिमहामुण्डोरुसद्वक्षसे ।
ज्वालाकूटविशोषिताखिलमहाकालाय फालोज्ज्वल
भीमालोलविषोरुकण्ठरभसे पूर्षाय तुभ्यं नमः ।। 49

मासस्तोत्रनुताय वेदवचसां सीमान्तसञ्चारिणे
वामार्धाकृतये सदा सुकृतये कामाङ्गनाशाय ते ।
व्योमाकारशरीरधूमपटलीकेशाय पाशावृत
पारावार विकारसंसृति भवोत्ताराय तुभ्यं नमः ।। 50

भस्माङ्गाय भवाय भावुक हृदोत्तुङ्गाय गङ्गारय-
स्फाराघोरमहोत्तमाङ्ग विलसल्लिङ्गाय शाङ्गाय ते ।
कामाद्यङ्गविभङ्गकाय सुमहादित्याङ्गसङ्गस्फुर-
जालाङ्गाय कुरङ्गबालविलसद्धस्ताय तुभ्यं नमः ।। 51

ईशाय शाश्वत जगत्स्थितिनाशकेश
व्योमावकाश शशिधाम विभासि धाम्ने ।
भूम्ने विधूततमसे रभसे विशोक-
सीम्ने भवाय विभवाय नमोनमस्ते ।। 52

सूत उवाच -

स्तुत्वैवं देवमीशानं पुनः सम्पूज्य शङ्करम् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ईशानं पुरुषं देवं वामदेवमघोरकम् ।
सद्योजातं च देवेशि नामभिः संस्तुवीत च ।। 53

ततो नीराजनं दद्यात् वादित्राणां निदानतः ।
शङ्खकाहलनिर्घोषैर्भेरीभाङ्कारमद्दलैः ।। 54

वेणुवीणामृदङ्गैश्च जयशब्दैः सुमङ्गलैः ।
पूजां समाप्य नियतःकरतालसुनर्तनैः ।। 55

प्रसादयेन्महादेवं पूजान्ते शाम्भवैः सह ।
निवेदितैश्च ताम्बूलैः पूजयेद्दक्षिणादिभिः ।। 56

एकवारं त्रिवारं वा पूजयेद्गिरिजापतिम् ।
छत्रैश्च चामरैर्दिव्यव्यजनादर्शकैरपि ।। 57

चैत्रत्रिणेत्रपूजातः क्षिप्रं नश्यति पातकम् ।
चित्रायामथ पौर्णम्यां होमं कुर्याच्च शाम्भवैः ।। 58

दद्याद्गोमिथुनं तत्र मासि मासि विशेषतः ।
प्रसङ्गाच्चैव सम्पूज्यो भक्तिहीनैरपि द्विजैः ।। 59

भावानुरूपफलदो भगवानगजापतिः ।
उच्छिष्टः पूजयन्याति पैशाचं तु द्विजाधमः ।। 60

सङ्क्रुद्धो रक्षसां योनिम भक्ष्यः पक्षरोगवान् ।
गानशीलश्च गान्धर्वं नृत्तशीलश्च पूरुषः ।। 61

स्वधर्मख्यापको यस्तु कुहकः प्रोच्यते द्विजः ।
तस्माच्छीलवता भाव्यमर्चकेन विशेषतः ।। 62

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

विशोषयेत्तनुं देवि नक्ताशी क्षारवर्जितम् ।
एवं चैत्रादिमासस्य पूजनं ते प्रकीर्तितम् ।। 63

यत्कृत्वा मनुजः सद्यो लभेद्रुद्रगणत्वताम् ।(?)
पितामहैः सहैवाथ नरकस्थैरपि द्विजः ।। 64

याति शम्भोर्वरस्थानं विमानैः सार्वगामिकैः ।। 65

स्कन्द उवाच -

चैत्रे त्रिणेत्रपदपूजनकृद्वरिष्ठ-
श्चित्रैश्चपातकवरैः स हि मुक्त एव ।
सत्रातिरात्रशतकादपि पुण्यभाक् स्या-
त्पुत्रादिमित्रसुकलत्रयुतो भुविस्थः ।। 66

।। इति श्रीशिवरहस्ये एकादशाम्शे
चैत्रमासार्चनं नाम
चतुर्दशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। पञ्चदशोऽध्यायः ।।

ईश्वर उवाच -

वैशाखार्चनंजं देवि विधिं वक्ष्यामि तच्छृणु ।
सरित्सरस्तटाकेषु देवखातोदकूपके ।। 1

स्नायान्नित्यं च तन्मासि शिवं हृदि समर्च्य च ।
धौतवस्त्रधरः शान्तो ह्याचान्तः कृतनित्यकः ।। 2

पूजास्थानं शुभं देशं गोमयेनोपलिप्य च ।
त्रिशूलवज्रपद्मादि स्वस्तिकाद्यैरलङ्कृतम् ।। 3

रङ्गवल्लीलसन्मध्यं मण्टपं तोरणान्वितम् ।
वितानपुष्पमालाभिः शोभितं कदलीदलैः ।। 4

तन्मध्ये च महापीठे स्थापयेल्लिङ्गमुत्तमम् ।
वज्रजं हेमजं वापि मृन्मयं वा महेश्वरि ।। 5

तदग्रे कुम्भमव्यंग्रंःस्थापयेत्पल्लवैर्वृतम् ।
नदीनदाहृतैस्तोयैः शीतलैः शोधितैः शिवे ।। 6

समान्यार्घ्यविशेषार्घ्यौ देवाग्रे स्थापयेत्ततः ।
दर्भदूर्वाग्रपुष्पाद्यैः कल्पनीयौ विशेषतः ।। 7

पञ्चगव्यं च पात्रं च पूरयेत्पञ्चगव्यकैः ।
तत्तन्मन्त्रैर्मेलयित्वा गन्धपुष्पाद्यलङ्कृतम् ।। 8

ततः पञ्चामृतं शुद्धं गव्यमेव प्रसादयेत् ।
फलानां च रसं देवि गन्धरत्नोदकं ततः ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अक्षापा धवलास्तत्र साधयेत्तिलमिश्रिताः ।
सुदिने शुभनक्षत्रे चन्द्रताराबलान्विते ।। 10

गन्धपुष्पफलोपेतं धूपदीपैरलङ्कृतम् ।
पूजास्थानं समाविश्य संस्थितः प्राङ्मुखस्तदा ।। 11

कुशचेलाजिने वापि शाम्भवै- सह सुव्रतः ।
अग्निरित्यादिबिर्मन्त्रैर्भस्मनोद्धूलयेत्तनुम् ।। 12

त्रियायुषा त्रिपुण्ड्राङ्को दिव्यरुद्राक्षभूषणः ।
शिवाभिषेके वरयेत् सङ्कल्प्यैव च तान् द्विजान् ।। 13

भस्मरुद्राक्षसम्पन्नान् त्रिपुण्ड्रपरिमण्डितान् ।
निर्माल्यमपनोद्यैवं शिवं परमकारणम् ।। 14

मन्त्रं पञ्चाक्षरं धीमान् जपेच्छतसहस्रकम् ।
ईशान्यां चण्डमाराध्य निर्माल्यं तत्र दापयेत् ।। 15

कल्पयेदासनं भक्त्या ह्याधारादि यथाक्रमम् ।
आधारशक्तिं तत्रत्यां इमां सम्पूज्य देशिकः ।। 16

अनन्तं धवलं नागं मासनाथं प्रपूजयेत् ।
भूभूतशुद्धिं कृत्वैव शङ्खं तत्र प्रसाधयेत् ।। 17

न भूमिलग्नं पात्रस्थं पुष्पाम्बुपरिपूरितम् ।
धर्मं ज्ञानं च वैराग्यमधर्मांश्च ततो यजेत् ।। 18

तस्योर्ध्वछदनं पद्ममासनं परिकल्पयेत् ।
अष्टपत्राणि तस्याहुरणिमादिगुणान्वितम् ।। 19

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

केसराणि च दिव्यानि रुद्रवामादिशक्तिभिः ।
बीजादिशक्तिपर्यन्तमासने परिपूजयेत् ।। 20

आवाहनं स्थापनं च सन्निरोधनिरीक्षणम् ।
पाद्यमाचमनं चार्घ्यं गन्धपुष्पमनन्तरम् ।। 21

धूपं दीपं च ताम्बूलं दत्वा संस्नापयेत्ततः ।
ध्यायेदीशानमव्यग्र उग्रं देवं पिनाकिनम् ।। 22

त्रिलोचनं नीलकण्ठं वरदाभयपाणिनम् (?) ।
उमासहायं विश्वेशं विश्वाधारं सनातनम् ।। 23

सर्वाभरणशोभाढ्यं गन्धवासाद्यलङ्कृतम् ।
त्रिपुण्ड्रचन्द्रार्धधरं भूतिभूषितविग्रहम् ।। 24

मन्दस्मितमुखाम्भोजं सुन्दराननपङ्कजम् ।
ध्यायेद्देवं विरूपाक्षं निर्जित्याक्षाणि सुव्रतः ।। 25

ततः संस्थाप्य तल्लिङ्गं पीठे वै स्नानकर्मणे ।
विशोध्य लिङ्गं शुद्धोदैः पञ्चगव्यैः प्रसेचयेत् ।। 26

मधुपर्कं ततो दद्यात्क्षीरेणादौ प्रसेचयेत् ।
पावमानेन रुद्रेण दध्ना वा त्वरितेन च ।। 27

लिङ्गसूक्तेन च घृतमधुना स्नापयेच्छिवम् ।
कद्रुद्रायेति गौरीशं सितया स्नापयेच्छिवे ।। 28

इमा रुद्रायमन्त्रेण नारिकेलाम्बुना ततः ।
त्रियम्बकेन देवेशि कदलीफलसारतः ।। 29

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

योो वै रुद्रेति मन्त्रेण पानसैरीशमन्त्रतः ।
रसालसारतोऽपीशं याः फलानि(?) च मन्त्रतः ।। 30

जम्बीरसारैः सुरसैर्लिङ्गसूक्तक्रमेण हि ।
संस्नाप्यालिप्य पिष्टेन स्नापयेदुष्णवारिणा ।। 31

तिलतैलैरपि शिवमभिषिच्य विशोधयेत् ।
उद्वर्तनान्तरं स्नाप्य घर्षयेद्‌बिल्वपत्रकैः ।। 32

स्नापयेद्‌गन्धतोयेन कुशरत्नहिरण्यजैः ।
तोयैः संस्नापयेदीशं नानावादित्रनिःस्वनैः ।। 33

असम्भवे तु द्रव्याणां यथाविभवसंभृतैः ।
केवलैर्मन्त्रतोयैर्वा भक्तिपूज्यो महेश्वरः ।। 34

आढ्यो वापि महास्नानं कारयेन्मध्यमोऽपि वा ।
अभ्यङ्गं वा महादेवि द्रव्यैरेतैर्यथाबलम् ।। 35

कृत्वा निवेद्य पश्चात्तु हविः किञ्चिन्महेश्वरे ।
गोशृङ्गैर्वा तथा शङ्खैर्धारापात्रेण वा शिवे ।। 36

अविच्छिन्नां तत्र धारां लिङ्गमौलौ प्रकल्पयेत् ।
अत्वारम्भणकं सूत्रं बध्वा उष्टेऽभिषेचयेत् (?)।। 37

एकवारं त्रिवारं वा रुद्रैकादशकं द्विजैः ।
सशान्तिकं सचमकं जपेद्वै शाम्भवैर्द्विजैः ।। 38

भवायेति तथैवान्ते तर्पयेदष्टनामभिः ।
प्रक्षाल्य वासः संशोध्य पीठे स्थाप्य महेश्वरम् ।। 39

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

देवायाचमनं गन्धमुपवीतं च साक्षतम् ।
सुवस्त्राभरणं गौरि भस्म पाण्डरमुत्तमम् ।। 40

अगरूद्भवमेवेशि दद्याद्वैशाखिमासिकम् ।
धूपं घृतोद्भवं दीपं हरिद्राकुसरं शिवे ।। 41

गुडखण्डकृतं भक्ष्यं दध्यन्नं सोपदंशकम् ।
वकुलैर्बिल्वपत्रैश्च त्रिशाखैश्च प्रपूजयेत् ।। 42

भवायेत्यष्टनाम्नैव निधनेत्यादिमन्त्रतः ।
ताम्बूलं मुखवासार्थं दद्याद्देवाय शूलिने ।। 43

नीराजयंस्ततो लिङ्गं शतवर्तिसुपूरितम् ।
घृतैरेतैरपि वरै रथाकारैर्मनोहरैः ।। 44

नीराजयन् सुपात्रैश्च वेणुवीणादिनिःस्वनैः ।
शङ्खकाहलिभेरीणां जयशब्दैः सुपूरितैः ।। 45

नीराज्य प्राज्यधूपैश्च दीपैः कर्पूरखण्डजैः ।
छत्रं च चामरं देवि व्यजनं दर्पणं तथा ।। 46

निवेदयेद्यथाजोषमुपचारं पृथक् पृथक् ।
वैशाखे नामभिर्देवः पूजनीयो यथाबलम् ।। 47

प्रदक्षिणं नमस्कारं नर्तनस्तोत्रकल्पनम् ।
नाम्नां च ते प्रवक्ष्यामि शताष्टोत्तरमुत्तमम् ।। 48

स्तोत्रं च ते विशालाक्षि वैशाखप्रीतिदायकम् ।
यस्त्वेभिर्नामभिर्देवि तस्य मुक्तिः करे स्थिता ।। 49

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ओं भर्गाय भूतभव्याय भवरोगहराय च ।
शर्वायाखर्वरूपाय दूर्वापूज्याय शम्भवे ।। 50

गोकर्णाय च गोप्त्रे च शङ्कुकर्णाय ते नमः ।
वराहमथनायैव रूक्षाय द्विरदाय च ।। 51

नमो दग्धस्मराङ्गाय गणानां पतये नमः ।
अंहसां पतयेचैव ओजसां पतये नमः ।। 52

नमोऽस्त्वपर्णापतये हेमवर्णाय वर्णिने ।
बलाबलसमूहाय अक्षोभ्यक्षोभणाय च ।। 53

चन्द्राभरणभूषाय नमः शेषाहिधारिणे ।
दीप्तशृङ्गैकशृङ्गाय वृषभाय ककुद्मते ।। 54

बिल्मिने बिल्वपूज्याय विशाखासुप्रियाय च ।
उग्राय रुद्ररूपाय धन्वने धावते नमः ।। 55

ज्योतिर्गणानां पतये ग्रहाधाराय ते नमः ।
अतीताय भविष्याय वर्तमानाय ते नमः ।। 56

अजराय नमस्तुभ्यं तपसे वरदाय च ।
सुवर्चसे सुवीर्याय स्मरगर्वहराय च ।। 57

वरदाय वरेण्याय स्वर्णवर्णायं ते नमः ।
अर्णवान्तर्निवासाय दीप्तशूलधराय च ।। 58

पुरुषायाप्रमेयाय अघोरायोर्ध्वकेशिने ।
ज्वालामालावृताङ्गाय भुजङ्गाभरणाय च ।। 59

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नमो वाह्याय गुह्याय स्वर्गाय नरकाय च ।
हऽाय परमेशाय [1]स्कन्द गोप्त्रेषुधन्वने ।। 60

कनिष्ठायाथ ज्येष्ठाय गह्वरेष्ठाय वर्णिने ।
मुण्डाय शितिकण्ठाय जटिलाय भगाय च ।। 61

बन्धवे नागकर्णाय बालन्यङ्कुधराय च ।
भूधरायादिमध्याय ज्ञानज्ञेयागमाय च ।। 62

निगमान्तैकवेद्याय अभेद्याय वपुष्मते ।
भद्रदाय शरण्याय वरेण्याय नमो नमः ।। 63

अरण्यानां च पतये भूताधिपतये नमः ।
यक्षाधिपतये चैव रक्षकाय कपर्दिने ।। 64

एवं नामाष्टशतकैः पूजयेद्बिल्वपल्लवैः ।
वैशाखे देवदेवेशं स्तुवीतैवं महेश्वरि ।। 65

शम्भो भर्ग भवेन्दुशेखर महागङ्गातरङ्गोज्ज्वल-
ल्लीलाभङ्गतरङ्गसुन्दरजटाजूटोत्तमाङ्गोज्ज्वल ।
पाहीश प्रमथाधिनाथ गिरिजानाथाव मां शङ्कर
त्रस्तं भो वरकालहस्तसुमहापाशावबद्धं हर ।। 66

हे शम्बरान्तकहर प्रवरामरेश
काशीपुरीश्वर जगत्परमावकाश ।
चर्माम्बरान्तकहर त्रिपुरावमर्द-
मूर्धन्य पाहि भगवन् हृतशम्बरारे ।। 67

---

1. स्कन्द गोप्त्रिषुधन्वने ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

हे कालकाल धृतशूल वराहिमाल
कालोज्ज्वलानलविशोषितलोकजाल ।
नीलाभकण्ठकलनानिलपापतूल
दावाग्निजाल भगवन्नव मां नमस्ते ।। 68

यक्षाधिपार्चितपदाम्बुज त्र्यक्ष दक्ष-
शिक्षाविनोद भगवन् सुमहोक्षवाह ।
वीक्षाविदग्धसुमचापवरोरुकाय
रक्षाऽधुना पशुपते हर मां हिताक्ष ।। 69

एवं संस्तुत्य वैशाखे देवदेवं महेश्वरम् ।
एककालं त्रिकालं वा पूजयेल्लिङ्गमैश्वरम् ।। 70

दद्याद्गोमियुनं देवि मासान्ते शाम्भवेषु च ।
सदक्षिणं सवत्सं च वस्त्रालङ्कारभूषितम्* ।। 71

होमः कार्योऽत्रवैशाख्यां प्रागुक्तक्रमतः शिवे ।
नक्ताशी भस्मनिष्ठोऽथ भवेन्मासान्तमीश्वरि ।। 72

वैशाख्यामथ पौर्णम्यां कुर्याच्च दधिकम्बलम् ।
घृतकम्बलदानेन विधिः प्रोक्तः पुरा मया ।। 73

एतत्तेऽभिहितं गौरि वैशाखार्चनजं फलम् ।
स्नानपूजनमीशानि गन्धुपुष्पफलार्ण(म्बर)म् ।। 74

पानीयं पानकं तस्मिन् मसि विप्रेषु दापयेत् ।
मम प्रीत्यर्थमेवेशि तस्य पुण्यफलं फलं शृणु ।। 75

---

* सदाक्षिणमितित्रयमपि क्रियाविशेषणतयान्वेयम् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

काञ्चनेन विमानेन वंशलक्षसमन्वितः ।
याति शम्भोः परं धाम सर्वभोगसमन्वितः ।। 76

ईश्वर उवाच -

विशाखे वैशाखे शिखिविशिखनेत्रार्चनपरो
मखानां सर्वेषां किल सुख(फल)मवाप्योन्नतमुखः ।
विशाखर्क्षे यो मां भजति वरदुःखोऽपि च नरो
ऽवरो भूयात्सत्यं गिरिवरसुते मय्यभिमुखः ।। 77

विशाखे वैशाख्यां यदि सुकृतभाजोऽपि मनुजा
द्विजा ये शाखान्तप्रथितपदपूजासु निरताः .
परं भस्मछन्नाः शिवतस्महाधामकलनाः
शिवेदघ्नः पुण्यं त्वघहरमहाकम्बलमुमे
*मम प्रीत्यै दद्युः प्रकटतरभक्त्यैव सुजनाः ।। 78

।। इति श्रीशिवरहस्ये एकादशाम्शे
वैशाखमासार्चनकथनं नाम
पञ्चदशोऽध्यायः ।।

---

* पादपञ्चकात्मकं पद्यमिदम् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। षोडशोऽध्यायः ।।

ईश्वर उवाच -

ज्येष्ठमासार्चनं वक्ष्ये मत्तस्त्वं गिरिजे शृणु
यत्कृत्वा मनुजः सद्यो सद्योजातप्रियो भवेत् ।। 1

ज्येष्ठे ज्येष्ठं समभ्यर्च्य विशिष्टो जायते शिवे ।
स्नानात्सरसि नद्यां वा मासादौ स शिवं स्मरन् ।। 2

अरजे वाससी बिभ्रत्सङ्कल्प्य विधिपूर्वकम् .
कृतनित्यक्रियो धीमान् भस्मधारणपूर्वकम् ।। 3

अग्निरित्यादिभिर्मन्त्रैः त्रिपुण्ड्रपरिमण्डितः ।
रुद्राक्षधारणं कुर्यात्सर्वाङ्गेषु विधानतः ।। 4

पूजास्थानं शुभं देवि गोमयेनोपलेपितम् ।
पिष्टचूर्णैः पञ्चवर्णे रङ्गवल्लीविराजितम् ।। 5

मण्टपं कारयेत्तत्र पुष्पगन्धविचित्रितम् ।
कदलीस्तम्भविहितं विज्ञानमणितोरणम् ।। 6

तन्मध्ये च शिवे पीठे पट्टवासः प्रसाधिते ।
लिङ्गं मरकतं तत्र स्थापयेदन्यदेव वा ।। 7

[1]त्रासादि दोषरहितं यदि तुङ्गं न दुष्यति ।
तदग्रे स्थापयेत्कुम्भं हेमताम्रजमृन्मयम् ।। 8

---

* त्रास A flaw or defect in a Jewal.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नदीतोयेन सम्पूर्णधौतपल्लव सङ्कुलम् ।
तदग्रे स्थापयेदर्घ्यं गन्धपुष्पाम्बुपूरितम् ।। 9

पाद्यार्घ्याचमनं पात्रं कल्पयेच्च तदग्रतः ।
पञ्चगव्योज्ज्वलं पात्रं शोधितं मन्त्रसंयुतम् ।। 10

कापिलं वा यथा जोषं* गव्यं पाद्यं प्रयत्नतः ।
दधिक्षीराज्यकुम्भांश्च क्षौद्रं चापि सुशर्कराम् ।। 11

फलानां च रसं देवि यथासम्भवमुत्तमम् ।
सम्पादयेच्च स्नानार्थमभ्यङ्गं वापि कारयेत् ।। 12

यवतण्डुलजा वापि सतिलाश्चाक्षताः शिवे ।
गन्धपुष्पफलैः पूर्णं धूपदीपाद्यलङ्कृतम् ।। 13

मनः प्रसादजनकं पूजास्थानं प्रविश्य च ।
सुदिने शुभनक्षत्रे चन्द्रताराबलान्विते ।। 14

प्राङ्मुखोदङ्मुखो वापि कुशचेलाजिनासने ।
आचम्य उपविश्यैव सङ्कल्प्य विधिपूर्वकम् ।। 15

मासानाम्ना शिवं स्मृत्वा शाम्भवान्भस्म भूषितान् ।
शिवाभिषेके वरयेत् शिवमभ्यर्च्य मन्त्रतः ।। 16

निर्माल्यमपनोद्यैव चण्डाय गिरिजे तदा ।
कल्पयेदासने तत्र शिवाय वरमन्त्रतः ।। 17

धर्माधर्म सुवैराग्यमनन्तासनमेव हि ।
आधार शक्तिसहितं भूतशुद्धिं विधाय च ।। 18

---

* यथालाभम् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

उद्बोध्य प्रणवेनेशं विद्याहृत्पद्मकेसरे ।
पञ्चकोशोपरिष्टाच्च ध्यायेदेवमुमासखम् ।। 19

चारुचामीकरप्रख्यं नीलग्रीवं त्रिशूलिनम् ।
बालेन्दुमकुटं सोमं सर्वाभरणभूषितम् ।। 20

ध्यात्वैवं स जपेद्धीमान् मन्त्रवर्यं षडक्षरम् ।
शताष्टं(?) सहस्रं वा नान्यचित्ताऽद्भुतं शिवे ।। 21

आधारपात्रमध्यस्थं शङ्खं वै [1]दक्षिणावृतम् ।
सव्यावर्तात्कोटिगुणं शिवार्चनविधौ विदुः ।। 22

पूजयेच्च घटं तं च शङ्खं पुण्योदकावृतम् ।
आवाहयेन्महादेवं हृदयाल्लिङ्ग संस्थितम् ।। 23

प्रसादयेत्ततो लिङ्गे निषीदेति महेश्वरम् ।
निरीक्षणं सन्निरोधं[2] तदा कुर्याद्विचक्षणः ।। 24

पीठे स्थाप्य शिवं लिङ्गे पुष्पच्छन्ने सुधूपते ।
पाद्यार्घ्याचमनं तत्र देयं देवि षडक्षरैः ।। 25

विशोध्य लिङ्गं शुद्धोदैस्तैलेन स्नापयेच्छिवे ।
गन्धावसिक्तेन तदा मधुपर्कं तु दापयेत् ।। 26

पञ्चगव्यैस्ततः स्नाप्य तृणैः सूक्ष्मैश्च घर्षयेत् ।
क्षीरेण सेचयेल्लिङ्गं कुम्भमानं यथारुचि ।। 27

---

1. दक्षिणवृतं दक्षिणावर्तमित्यर्थे ।
2. आवाहन्यादिमुद्राप्रदर्शनस्य कर्तव्यत्वमुच्यते ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

आवो राजेति मन्त्रेण दधिक्राव्णेति वै दधि ।
घृतं मिमिक्षेति घृतं मधुवातेति वै मधु ।। 28

पञ्चाक्षरेण च सितां याः फलीति फलोदकम् ।
नारिकेलजलं पुण्यं कदलीफलमण्डलम् ।। 29

पानसोरुमहाकोशान् तथाम्ररसमुत्तमम् ।
जम्बीरेक्षुभवं सारं करयन्त्रप्रपीडितम् ।। 30

गन्धकर्पूरकस्तूरी पाटीरागरुजं फलम् ।
हेमरत्नजलं देवि देयं लिङ्गस्य मूर्धनि ।। 31

सकूर्चकैश्च दर्भाग्रैर्भर्गसंप्रोक्ष्य वारिभिः ।
ब्रह्मकूर्चं हि तद्देवि स्नानं शतगुणाधिकम् ।। 32

उद्वर्तनान्तरे स्नानं कारयेदुष्णवारिणा ।
यथासम्भवमेतेषां कार्यं स्नपनमीश्वरे ।। 33

दीपान्प्रज्वालयेद्देवि घृताक्तान्धूपगन्धितान् ।
हविस्तत्र शिवे किञ्चिन्निवेद्य प्रणवेन च ।। 34

धारापात्रस्थतोयेन कलशस्थेन सेचयेत् ।
रुद्रैरेकादशगुणैरेकद्वित्रिक्रमाद् द्विजैः ।। 35

नानावादित्रघोषेण सेचयेल्लिङ्गमैश्वरम् ।
भवायेति तदैवान्ते तर्पयेदष्टनामभिः ।। 36

विशोध्य वाससा लिङ्गं मल्लिङ्गं च सुपीठके ।
वस्त्रोपवीतगन्धाद्यं भस्म पाण्डुरमुत्तमम् ।। 37

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अक्षताभरणानीशे समर्प्य परमेश्वरे ।
बिल्वमन्दारकल्हारपुण्डरीकैः प्रपूजयेत् ।। 38

कृष्णागरूद्भवं(:)धूपं(धूपः) देयं (यः) ज्येष्ठे विशेषतः ।
घृत दीपास्ततो देया सोज्ज्वलास्तत्र शङ्करि ।। 39

त्रिशाखैर्वरबिल्वैश्च भवायेत्यष्टनामभिः ।
निधनेत्यादिमन्त्रैश्च पूजयेत्परमेश्वम् ।। 40

क्षीरान्नं घृतसंयुक्तं गोधूमापूपसंयुतम् ।
ज्येष्ठे देयं विशेषेण ज्येष्ठदेवाय सादरम् ।। 41

शाकोपदंशताम्बूलमष्टकल्पसमन्वितम् ।
जातीपत्रफलेलाढ्य*शुण्ठिक्रमुकखादिरम् ।। 42

नागवल्लीदलोपेतं शुद्धं चूर्णं च साष्टकम् ।
नीराजयेत्ततो लिङ्गे शतदीपैर्मनोहरैः ।। 43

वेणुवीणादिनिनदैः दुन्दुभीकाहलादिभिः ।
कर्पूरखण्डजैर्दीपैर्नीराज्य परमेश्वरम् ।। 44

छत्रं च चामरं देवि व्यजनं दर्पणं तथा ।
उपचारमशेषं च कृत्वा चैव प्रदक्षिणाः ।। 45

नमस्कारादिदशकं नर्तनं स्तुतिपूर्वकम् ।
नामभिः पूजयेदेवं देवदेवं उमापतिम् ।। 46

स्तुत्या नत्या स्तुवीतै(तेतैः) ज्येष्ठे चाष्टगुणान्विते ।
नमोज्येष्ठाय हृष्टाय शिपिविष्टाय धावते ।। 47

---

* शुण्ठि-शुण्ठ्य Dry ginger

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नमः पुष्टिप्रसादाय गोवृषाय ककुद्मिने ।
अभ्युदीर्णाय शान्ताय वज्रहस्ताय शस्त्रिणे ।। 48

नम आशावसानाय सहमानाय हेतवे ।
ध्वजिने दण्डिने चैव बम्भराय प्रसादिने ।। 49

उरुगव्याय काव्याय बभ्रवे भ्रमते नमः ।
नमः स्विष्टाय पूर्ताय हुताय प्रहुताय च ।। 50

सभ्याय च सदस्याय सभायाः पतये नमः ।
अहिंसायाप्यलोभाय पञ्चास्याय सुधन्वने ।। 51

त्रिणेत्राय सुपार्श्वाय तुष्टाय उदराय च ।
शिवाय शान्तरूपाय शतावर्ताय ते नमः ।। 52

अन्नायासन्नपालाय आत्तमालाय ते नमः ।
नमो भवाय रुद्राय कद्रुद्राय प्रचेतसे ।। 53

नमस्तेन्द्रिय हीनाय लेलिहानाय सृक्विणे ।
विश्वाय विश्वरूपाय विश्वस्मै शिरसे नमः ।। 54

सर्वतः पाणिपादाय सर्वेन्द्रियविहारिणे ।
रुद्राय प्रतिरूपाय खण्डचन्द्रधराय च ।। 55

विश्वोत्पत्तिविनाशाय षडूर्मिरहिताय च ।
नमः सिद्धाय साध्याय यमानां पतये नमः ।। 56

मयोभुवे शम्भवे च विभवे प्रभवे नमः ।
दुन्दुभ्यायाहनन्याय शङ्गायाथ प्रमाय च ।। 57

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सुवीराय सुघोराय अक्षोभ्यक्षोभणाय च ।
सुप्रजाय सुमेध्याय सुधाम्नेऽनन्तचक्षुषे ।। 58

नमो बुद्धाय शुद्धाय बन्ध(द्ध)मोक्षाय ते नमः ।
नमस्ते भूतभव्याय वर्तमानाय दम्यते ।। 59

नमो भवाय भद्राय घनघोषाय ते नमः ।
प्रपन्नजनरक्षाय भक्तपापहराय च ।। 60

साकेतवासगोप्याय यममार्गहराय च ।
भद्राय रुद्ररूपाय तन्द्राय च नमो नमः ।
नमः स्थूलाय सूक्ष्माय दृश्यादृश्याय गोप्त्रिणे ।। 61

वर्षते ज्वलते चैव ग्रसते ह्रसते नमः ।
नमः सुचारुकोशाय उरुवक्षशिखाय च ।। 62

नमो नमः सुवर्णाय तपनीयनिभायते ।
विरूपाय प्रसन्नाय सर्वरूपाय ते नमः ।। 63

देवि नामशताष्टेन पूजयेज्जयेष्ठमासके ।
स्तुवीतैवं महादेवं सव्येनानेन सर्वदा ।। 64

तस्याहं परमप्रीतो दिशामि परमां गतिम् ।। 65

शम्भो भूमिशताङ्ग सङ्गरहितानङ्गाङ्गफालानल-
ज्वालाऽपाङ्गपतङ्गवत्कृतमहानेत्रेश नागप्रभो ।
भस्माभ्यङ्ग कुरङ्ग सङ्गसुकर स्फारस्फुरद्गाङ्गस-
ल्लीलालोलमहोत्तमाङ्ग भगवञ्छङ्कागाव मां सर्वदा ।। 66

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

विश्वेशान दयानिधान भगवन् पाहीश पञ्चानन
स्वामिन् पैतृककाननप्रिय शिव व्याघ्राजिनालङ्कृत ।
दीनानामवनाय कालकलनाहीनापदानादिक-
दानाय स्तुवतेऽस्तु ते दृशि सदा कारुण्यवारांनिधिः ।।67

मयस्कर सुतस्करप्रवर पाहि विश्वेश्वर
प्रसीद परमेश्वर त्रिपुरमारदेहोद्धर ।
जलन्धरगरन्धरप्रमथ देव शम्भो हर
प्रसीद दययाऽधुना शिवद पाहि गङ्गाधर ।। 68

शर्व सर्वद सुपूर्वपूजित
पर्वतेशतनयाप्रिय प्रभो ।
कालगर्वहर खर्वविष्णुहृ-
त्कञ्जवास भगवन् प्रसीद माम् ।। 69

भव भवभयहर भीम भवात्मक
भावहृदन्तरसुन्दरविग्रह ।
पाहि शिवाव्यय देव दयाकर
शङ्कर सुखकर शं कुरु मे सदा ।। 70

स्तवेनानेन देवेशि स्तुवीत परमेश्वरम् ।
ज्येष्ठे मासि विशेषेण नक्तभक्तोऽथ हव्यभुक् ।। 71

एकवारं द्विवारं वा त्रिवारं वा यजेच्छिवम् ।
ज्येष्ठायामथ पौर्णम्यां होमः कार्यो यथाविधि ।। 72

दद्याद्गोमिथुनं तेभ्यः सवत्सं च सदक्षिणम् ।
दीनानाथान् भोजयित्वा स्वयं भुञ्जीत बन्धुभिः ।। 73

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ज्येष्ठमासार्चनं देवि कथितं ते समासतः ।
यत्कृत्वा मनुजः सद्यो लभेत्फलमनुत्तमम् ।। 74

शिवालये लिङ्गमौलौ ग्रीष्मे हृद्यां गलन्तिकाम्* ।
मासद्वयं तु शीतेन गन्धितेन जलेन च ।। 75

सच्छिद्रं कारयेत्कुम्भं धारयेत्तदहर्निशम् ।
कृत्वैवं याति सदनं मदनान्तस्य मे शिवे ।। 76

वंशसाहस्रसहितो विमानेनार्करोचिषा ।। 77

ईश्वर उवाच -

सदा कालकालं हृदा भावयन्तः
कृतान्ताद्भयं सन्त्यजन्त्येव सन्तः ।
मुदा बिल्वपत्रैः शिवं पूजयन्तः
भिदा नैव पश्यन्ति लोकं प्रशान्ताः ।। 80

ज्येष्ठे विशिष्टशिपिविष्टसदिष्टलिङ्ग
सम्पूजकोऽष्टाकृतिवल्लभः स्यात् ।
दुष्टः कनिष्ठोऽपि च कुष्ठिताङ्गो
रुष्टश्च मद्भक्तवरो विशिष्टः ।।

।। इति श्रीशिवरहस्ये एकादशाम्शे ज्येष्ठमासार्चनं नाम षोडशोऽध्यायः ।।

---

* गलन्तिका –A small water-jor with a hole in the bottom from which water drops upon the object of worship (an image, Linga) placed below.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। सप्तदशोऽध्यायः ।।

ईश्वर उवाच -

आषाढार्चनमाषाढे प्रवक्ष्यामि शृणुष्व तत् ।
यत्कृत्वा मनुजः सद्यो ममेष्टगणपो भवेत् ।। 1

मुनिभिर्गणपैश्चैव पुरा चीर्णं व्रतादिकम् ।
स्नात्वा नद्यां बहिर्देशे सरस्यपि च पावने ।। 2

हृदि ध्यात्वा महादेवं मामीशमुमया त्वया ।
प्राणानायम्य सङ्कल्प्य भैरवाननुमान्य च ।। 3

अप्सु संस्थान् शिवे रुद्रान् अनुज्ञाप्य मृदं ततः ।
तटे संस्थाप्य संस्नायेत्त्रिराचम्य शिवं स्मरन् ।। 4

अब्लिङ्गैर्वारुणैर्मन्त्रैः सपवित्रकरः शुचिः ।
बिभृयाद्धौतवसने पादौ प्रक्षालयेत्ततः ।। 5

अग्निरित्यादिभिर्मन्त्रैर्विमृज्याङ्गानि भस्मधृक् ।
त्रियायुषेण मन्त्रेण त्रिपुण्ड्रपरिशोभितः ।। 6

त्रियम्बकेन मन्त्रेण रुद्राक्षान्धारयेत्तनौ ।
शिरोललाटहृदये कण्ठे बाह्वोश्च कर्णयोः ।। 7

द्वात्रिंशत्कण्ठमूले च चत्वारिंशतिमस्तके(?) ।
भ्रुवोरेकं शिखायां च कर्णयोः परिकीर्तितम् ।। 8

बाह्वोः षोडश देवेशि हस्तयोर्द्वादशैव हि ।
पुण्यामलकमानेन मालां वक्षसि धारयेत् ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शताष्टकलिता पुण्या तदूर्ध्वं च प्रशस्यते ।
जपमालां तथा कुर्यात्समास्यां लक्षणैर्युताम् ।। 10

स्वर्णेन राजतेनापि सूत्रेण ग्रथितां शुभाम् ।
अष्टोत्तरशतं कुर्यात् चतुःपञ्चाशदेव वा ।। 11

पञ्चविंशतिमालां वा ततो हीनाऽधमा स्मृता ।
मोक्षार्थी पञ्चविंशत्या धनार्थी त्रिंशता जपेत् ।। 12

पुष्ट्यर्थी पञ्चविंशत्या पञ्चदश्याऽऽभिचारके ।
सप्तविंशतिरुद्राक्षमालया(ला/तु)स्त्रीवशङ्करी ।। 13

एवं कुर्यात्सदामालां आस्यमास्येन योजयेत् ।
एक वक्त्रः शिवः साक्षात् ब्रह्महत्यां व्यपोहति ।। 14

अवध्यत्वं प्रति स्रोतं वह्निस्तम्भं करोति च ।
द्विवक्त्रो(ह)रगौरी *स्यात्स्वर्णस्तेयवधापहृत् ।। 15

त्रिवक्त्रो ह्यग्निजन्मास्यात् पापराशिं विनाशयेत् ।
चतुर्वक्त्रः स्वयं ब्रह्मा नरहत्यां व्यपोहति ।। 16

पञ्चवक्त्रस्तु कालाग्निरगम्याऽभक्ष्यपापहृत् ।
षड्वक्त्रस्तु गुहो ज्ञेयः भ्रूणहत्यादि नाशयेत् ।। 17

सप्तवक्त्रस्त्वनन्तः स्याच्स्वर्णस्तेयादिपापहृत् ।
विनायकोऽष्टवक्त्रः स्यात्सर्वानृतविनाशकृत् ।। 18

---

* गोवधजन्यपापहरः भवति ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

भैरवो नववक्त्रःस्याच्छिवसायुज्यकारकः ।
दशवक्त्रः स्मृतो विष्णुर्भूतप्रेतभयापहः ।। 19

एकादशमुखो रुद्रो नानायज्ञफलप्रदः ।
द्वादशास्यो द्वादशार्कदैवतो निन्दकापहृत् ।। 20

त्रयोदशास्यः श्रीकण्ठः शीघ्रं सङ्कुण्ठयेदयम् ।
चतुर्दशास्यो लोकात्मा लोकदानफलप्रदः ।। 21

एवं ज्ञात्वाऽस्यमाहात्म्यं धारयेद्भुवि मानवः ।
विना* मन्त्रेण यो धत्ते रुद्राक्षं भुवि सन्मुखम् ।। 22

तस्य प्रीतो भवेद्रुद्रः स्वपदं सम्प्रयच्छति ।
इत्थं रुद्राक्षधारीस्यात्कृतकृत्यक्रियो द्विजः ।। 23

क्षत्रियो वाऽथ वैश्यो वा धनाढ्यो भक्तितत्परः ।
पूजास्थानं ततो गत्वा उपलिप्य विचित्रितम् ।। 24

रङ्गवल्लीविलासाढ्यं पद्मस्वस्तिकचित्रितम् ।
मण्टपं पुष्पमालाढ्यमारचय्य सपीठकम् ।। 25

वितानशोभितं तं च कदलीस्तम्भशोभितम् ।
तोरणेन सुविस्तीर्णं धूपदीपादिराजितम् ।। 26

आषाढे मौक्तिकं लिङ्गं पूजयेदन्यदेव वा ।
हैमरौप्यंताम्रजं वा पौत्तलं मार्तिकं शिवे ।। 27

---

* मन्त्रेण विनापि यो धत्ते .... ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कुम्भं संस्थापयेदग्रे नदीतोयैः प्रपूरितम् ।
पाद्यार्घ्याचमनं पात्रं पुष्पाम्बुपरिपूरितम् ।। 28

दापयेदर्घ्यपात्रं च शिवस्याग्रे महेश्वरि ।
पञ्चगव्यं तथा तैलं दधिक्षीरयुतं मधु ।। 29

सिता चैवैक्षवी पुण्या फलसारो विशेषतः ।
गन्धपुष्पाणि दिव्यानि सम्पाद्योत्पलपाटलम् ।। 30

बिल्वपत्राणि दिव्यानि संस्थाप्यानि विशेषतः ।
नारिकेलजलं चैव कदलीफलमण्डलम् ।। 31

पानसं चाम्रसुरसं सुजम्बीररसं शिवे ।
गन्धचन्दनतोयं च रत्नस्वर्ण कुशोदकम् ।। 32

कूर्चोदकं तथा देवि पात्रेषु स्थापयेत्पृथक् ।
सङ्कल्प्य शाम्भवैः सार्धं मासादौ शिवपूजनम् ।। 33

दशवारं शताष्टं(?)वा सहस्रं वा जपेत्सुधीः ।
पञ्चाक्षरं परं मन्त्रं प्रणवेन षडक्षरम् ।। 34

श्यामाकाश्चाक्षता ग्राह्यास्तास्मिन्मासे विशेषतः ।
आधारपीठपूजान्तं कृत्वा संस्थाप्य पीठके ।। 35

स्नापयेदेव देवेशं त्रिणेत्रं नीलसद्गलम् ।
चारुचन्द्रकलामौलिं सोमं ध्यात्वा महेश्वरम् ।। 36

स्थाप्य प्रोक्ष्यावकुण्ठ्यैव सन्निरोध निरीक्षणैः ।
पाद्यार्घ्याचमनं दत्वा मधुपर्कं च निर्मलम् ।। 37

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पञ्चगव्यैः(स्)ततः स्नाप्य स्नानं पञ्चामृतं ततः ।
गव्यमेव प्रयुञ्जीत मासि मासि शिवे शुभम् ।। 38

स्नानाशक्तस्तथाऽभ्यङ्गमेतेषां देवि कारयेत् ।
स्नानं शतफलं ज्ञेयमभ्यङ्गः पञ्चविंशतिः ।। 39

शिवस्य सर्पिषास्नानं महापापक्षयङ्करम् ।
तावता मधुना दध्ना क्षीरेण सितयापि च ।। 40

स्नाने फलानां प्रमितिः सहस्रं परमं शिवे ।
अभ्यङ्गेषु शतान्येव फलानिह्यभिषेचने ।। 41

नानावादित्रघोषैश्च स्नापयेत्परमेश्वरम् ।
तत्तन्मन्त्रैश्च रुद्रेण श्रीमत्पञ्चाक्षरेण वा ।। 42

उद्वर्तनान्तरे स्नानं कारयेद्घर्षयेत्तृणैः ।
सवाससा ततश्छन्ने पीठे स्थाप्य महेश्वरम् ।। 43

धूपं दीपं ततो दत्वा निवेद्य हविरेव हि ।
सशर्कराघृतं देवि सताम्बूलमुमापतिम् ।। 44

ब्राह्मणैः सेचयेल्लिङ्गमविच्छिन्नाम्बुधारया ।
शङ्खैःशृङ्गैस्तथाकुम्भैर्वर्धन्या वा यथा सुखम् ।।45

शतरुद्रावृत्तिपर एकद्वित्रिसशान्तिकम् ।
एकादशगुणं वापि सशान्तिचमकान्वितम् ।। 46

रुद्रान्ते च निवेद्येशि पुनपुनरतन्द्रितः ।
भवायेत्यष्टनाम्नेशं तर्पयेत महेश्वरम् ।। 47

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

विशोध्य वाससा लिङ्गं पीठे संस्थाप्य पूजयेत् ।
उपवीतं तथा भस्म वासो गन्धं च साक्षतम् ।। 48

दत्वाऽऽभरणपुष्पाणां मालिकां बिल्वनिर्मिताम् ।
बिल्वपाटलकल्हारैः कुसुमैः पूजयेच्छिवम् ।। 49

आढकान्नं घृताक्तं च सगुडं विनिवेदयेत् ।
माषापूपाः प्रदेया वै ताम्बूलं च ततः परम् ।। 50

नीराजयेत्ततो लिङ्गं त्रिवारं शतदीपकैः ।
कर्पूरखण्डजैर्देवि दीपानुद्बोधयेच्छिवम् ।। 51

वेणुवीणामृदङ्गैश्च दुन्दुभीकाहलादिभिः ।
हंसाभे चामरे चैव छत्रं शशिनिभं शिवे ।। 52

पताकाव्यजने दर्शं देयं देवाय शूलिने ।
प्रदक्षिणात्रयं कुर्यान्नमस्कारादिपञ्चकम् ।। 53

पूजयेन्नामभिर्देवं बिल्वपाटलपङ्कजैः ।
स्तुवीतैवं महादेवमाषाढे शृणु पार्वति ।। 54

नम इज्याय पूज्याय उपजीव्याय ते नमः ।
नमः क्षेत्राय वृद्धाय वत्सलाय नमो नमः ।। 55

नमो भूताय भव्याय नमःसत्याय बभ्रवे ।
नमो वै पद्मवर्णाय मृत्युघ्नाय च मृत्यवे ।। 56

नमो गौरशरीराय श्यामायाऽऽरोहिताय च ।
महासन्ध्याभ्रवर्णाय चारुरूपाय धीमते ।। 57

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नमः कमलहस्ताय विश्वग्रासाय शम्भवे ।
प्रमाणाय सुरेशाय अवध्यायामराय च ।। 58

नमो रूपाय रूप्याय शाश्वतायाक्षताय च ।
बृह्मणे महते चैव विभ्रान्ताय कुशाय च ।। 59

दुर्गमाय महेशाय रोधाय कपिलाय च ।
अप्रतर्क्यशरीराय बिल्मिने रसगाय च ।। 60

सिकत्याय प्रवाह्याय रेश्मियाय नमोनमः ।
प्रसृताय पुराणाय वामदेवाय दण्डिने ।। 61

सुमेधसे कुलालाय नमस्तेऽस्तु शिखण्डिने ।
चित्राय चित्रवर्माय त्रिणेत्राय त्रिशूलिने ।। 62

चेकितानाय कृष्णाय सुहिताय हिताय च ।
नमः क्षान्ताय दान्ताय वज्रसंहननाय च ।। 63

रक्षोघ्नाय विषघ्नाय शितिकण्ठाय मन्यवे ।
नमः सोमाय रुद्राय सुताम्रायारुणाय च ।। 64

भर्गायोग्राय भीमाय तिग्मायुधधराय च ।
सुमोदाय प्रमोदाय मधुप्रीताय ते नमः ।। 65

प्राणाय प्रणवेशाय नमस्तेऽस्तु सुवाससे ।
भिषजे महते चैव दुर्गाध्यक्षाय लिङ्गिने ।। 66

नक्तञ्चराय मुक्ताय भक्तपापहराय च ।
अनामयाय शर्वाय महाकालाय घून्वते ।। 67

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पञ्चाक्षरप्रियायाथ मृगाजिनधराय च ।
आषाढाय विराधाय दूताय प्रहिताय च ।। 68

तमोघ्नाय हिमघ्नाय क्रतवे ऋतवे नमः ।
ज्योत्स्नाज्वालाय फालाय विशालाय नमोनमः ।। 69

ऊर्ध्वरोम्णे महारोम्णे कृत्तिवासाय (?)ते नमः ।
मृगव्याधाय दक्षाय दक्षशिक्षाय ते नमः ।। 70

इत्येतन्नामभिः पूज्यो ज्येष्ठदेवो महेश्वरः ।
स्तवेनानेन देवेशमाषाढे संस्तुवीत माम् ।। 71

देव सोमशकलामलमौले
सोम हेमनिभ दिव्य शुभाङ्ग ।
व्योमकेश जितकाश महेश
पाहि मामखिलदुःखसमूहात् ।। 72

वामदेव वरसामज चर्म-
स्फारशोभिकुसुमाङ्ग महेश ।
धूमवाहवह शङ्कर शम्भो
व्योमधाम भगवन्नव मां त्वम् ।। 73

शम्भो बालमृगाङ्कशेखर महासर्पाङ्गमालोज्ज्वल
कन्दर्पान्तिक शर्व सर्वग विभो दूर्वादलाच्र्याङ्घ्रिक ।
वेदेशाखिलपाल फालशशभृत्पूताङ्गसङ्गातुल
लीलागाङ्गसुतुङ्गभङ्गपरमानन्दाङ्गसङ्गाव माम् ।।74

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

विश्वोत्पत्तिविपत्तिसंस्थितिजगत्कार्यं च तत्कारणं
जीवेशाश्रयभेदभानमखिलं यन्नामरूपात्मकम् ।
कालानल्पविकल्पशिल्प सुमहासङ्कल्पकल्पान्तक
त्वय्यानन्दपयोधिवारिलहरी विद्योतते केवलम् ।। 75

विष्णुब्रह्ममुखाःसुरासुरवरा ये भासुरा भूसुराः
सञ्जाताःस्थितिनाशमध्यपतिता भ्रान्ताश्च संसारिणः ।
विश्वाधीश्वर शङ्कर त्रिभुवनापारोरुदुःखार्तिहन्
कालातीत महेश्वराव भगवन् विश्वेश विश्वाधिक ।। 76

इति स्तुत्वा त्रिकालं वा पूजान्ते वा महेश्वरम् ।
आषाढ्यामथ पौर्णम्यां होमः कार्यो द्विजैःसह ।। 77

दत्वा गोमिथुनं देवि सवत्सं च सदाक्षिणम् ।
नक्ताशनो भवेन्मासं ब्राह्मणैः पारणं ततः ।। 78

एवमाषाढपूजात आषाढप्रतिमो भवेत् ।
चन्द्राभयानैर्यात्यन्ते मम लोकं सनातनम् ।। 79

।। इति श्रीशिवरहस्ये एकादशाम्शे
आषाढार्चनं नाम
सप्तदशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। अष्टादशोऽध्यायः ।।

ईश्वर उवाच -

श्रवणार्चनमीशानि शृणु श्रावणपारणम् ।
यस्मिन् सम्पूजितो देवि भगवानिन्दुभूषणः ।। 1

ददाति कामान् विपुलान् तद्विधिं शृणु सादरम् ।
विष्णुब्रह्मादयो देवाः श्रावणेऽर्च्य महेश्वरम् ।। 2

लेभिरे परमां सिद्धिं मुनयो गणपा मम ।
पुण्यपुण्यो ह्ययं मासोऽगण्य पुण्यो महेश्वरि ।। 3

मासादौ श्रावणे देवि नद्यां सरसि वा शिवे ।
ध्यात्वा मां प्रयतः स्नात्वा चिरिराचम्य शुचिः स्वयम् ।। 4

सपवित्रकरः शान्तः सङ्कल्प्य विधिपूर्वकम् ।
पट्टांशुकपरीधानो भस्मरुद्राक्षभूषणः ।। 5

कृतनित्यक्रियो देवि प्रातर्हुतहुताशनः ।
वैतानं वा तथा ग्राह्यं वितनालङ्कृतं शुभम् ।। 6

वरिवस्यागृहं शम्भोरुपलिप्य सुशोभनम् ।
पञ्चवर्णैः पद्मदलैः स्वस्तिकादिविचित्रितम् ।। 7

पुण्यगन्धाधिवसितं तोरणाद्यैरलङ्कृतम् ।
तन्मध्ये संस्थिते पीठे लिङ्गं नीलविनिर्मितम् ।। 8

हैमं वा राजतं देवि स्फाटिकं वा यथारुचि ।
नदीतोयेन सम्पूर्णधौतकुम्भे निवेशयेत् ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पाद्यार्घ्याचमनीयानि पात्राण्यग्रे विधाय च ।
पुष्पाण्यम्बूनि देवेशि पञ्चगव्यानि सादरम् ।। 10

पञ्चामृतानि सर्वाणि सम्पाद्य च यथाबलम् ।
गन्धपुष्पफलादीनि धूपदीपांश्च शङ्करि ।। 11

बिल्वद्रोणार्कमन्दारकुटजानि प्रसाधयेत् ।
वरयेच्छाम्भवांस्तत्र भस्मरुद्राक्षभूषणान् ।। 12

श्रावणे शिवपूजार्थं स्वयमाचम्य वाग्यतः ।
प्राङ्मुखोदङ्मुखो वापि चेलाजिनकुशासने ।। 13

पञ्चाक्षरं जपेत्तत्र शताष्टं च [1]सहस्रकम् ।
ध्यायेद्देवं विरूपाक्षं नीलकण्ठमुमासखम् ।। 14

वरदाभयहस्तं च मृगटङ्कधरं शिवम् ।
त्रिपुण्ड्रविलसत्फालं चन्द्ररेखाविराजितम् ।। 15

अङ्गादिन्यासमारभ्य पीठपूजां [2]प्रकारयेत् ।
भूतशुद्धिं विधायादौ पाणी संशोध्य च क्रमात् ।। 16

सपल्लवं कुम्भमुखं शङ्खं च तदनन्तरम् ।
पुष्पाम्बुपूरितं देवि मातृकाक्षरविद्यया ।। 17

गन्धपुष्पफलादीनां दृष्टिदोषनिवारणे ।
भस्म त्रियम्बकेनेशि देयं पात्रेषु [3]शोधनम् ।। 18

---

1. वार्थे च शब्दः । 2. समाचरेत् । 3. शुद्धये ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कृमिकेशादिदुष्टानां शोधनी तत्क्रिया शिवे ।
आवाहयेत्ततो लिङ्गे देवं वै मूलमन्त्रतः ।। 19

गायत्र्या वा महेशस्य स्थाप्य पीठे समन्त्रकम् ।
निरोधं चैव सान्निध्यं प्रसादननिरीक्षणम् ।। 20

कुर्याल्लिङ्गे ततो देयं पाद्यार्घ्याचमनं क्रमात् ।
मधुपर्कं ततो देवि पञ्चगव्यमतः परम् ।। 21

क्षीरेण स्नापयेद्देवं दध्ना चाज्येन वै शिवे ।
मधुना सितया वापि द्रोणमानेन सेचयेत् ।। 22

नारिकेलजलैश्चैव रम्भापनससम्भवैः ।
इक्षुजम्बीरसारेण हिरण्यकुशतोयतः ।। 23

पुष्पाम्बुभिर्गन्धतोयैः कूर्चाद्यैः प्रणवेन च ।
स्नापयेद्देवदेवेशि नानावादित्रनिःस्वनैः ।। 24

धूपं चागरुसारोत्थं देवि तस्मिन् महेश्वरे
घृतदीपांस्ततो दद्याद्धविः किञ्चिन्निवेदयेत् ।
ताम्बूलं च ततो दत्वा स्नानवेद्यां निधाय च
सशान्तिचमकोपेतो जप्यो "रुद्रों"* द्विजैः सह ।। 26

एकादशवरो रुद्र एकद्वित्रिवरोऽथवा ।
भावयेदष्टनाम्नान्ते तर्पणं स्यात्सकूर्चकम् ।। 27

---

* रुद्राः श्रीरुद्रानुवाकाः इत्यर्थे ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

विमृज्य वाससा लिङ्गं पीठे संस्थाप्य मन्त्रतः ।
अशून्यमस्तकं लिङ्गं कुर्यात्पुष्पं तु संक्षिपेत् ।। 28

उपवीतं तथा वासो गन्धभस्म च साक्षताः ।
यवगोधूममिश्रा वां तण्डूलाखण्डसम्भवाः ।। 29

देयास्ततो महादेवि रत्नाभरणमुत्तमम् ।
स्वर्णबिल्वदलान्यष्टौ देयानि च विशेषतः ।। 30

न पर्युषितदोषो वै स्वर्णरत्नसुमेषु वै ।
पुनः प्रक्षाल्य सुजलैः *पाद्यानि वरबिल्ववत् ।। 31

बिल्वमन्दारकुसुमैः कुटजैः श्रावणैऽर्चयेत् ।
आगरुश्च ततो धूपो देयो दीपो धृताप्लुतः ।। 32

तिलानां कृसरं देवि अपूपं च घृताचितम् ।
गुडखण्डं च सधृतं सोपदंशं निवेदयेत् ।। 33

ताम्बूलं फलजालं च निवेद्येक्षु सखण्डकम् ।
दीपानामावलिं कुर्यात्सहस्त्रं शतमेव वा ।। 34

नीराजयेत्ततो लिङ्गे दीपैः कर्पूरखण्डजैः ।
प्रदक्षिणात्रयं कुर्यान्नमस्कारांश्च पञ्च च ।। 35

कुर्याद्भक्तिप्रवणधीः शिवाय विधिपूर्वकम् ।
पौराणैर्वैदिकैः स्तोत्रैः स्तवीतैवं महेश्वरम् ।। 36

---

* पाद्यानिः सम्पाद्यानि इत्यर्थे ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नाम्नां शताष्टकेनेशि पूजयेत स्तुवीत च ।
छत्रं च चामरं देवि व्यजनादर्शके शिवे ।। 37

सुरथाय सुमध्याय मन्मथान्तकराय च ।
महोमयाय तीक्ष्णाय आर्द्रचर्मधराय च ।। 38

स्मशानरतिनित्याय नमोऽस्तूलूकधारिणे ।
बर्हिबर्हवसानाय घनायं बहुगर्जते ।। 39

काव्यपूज्याय हृद्याय त्रिणेत्राय पिनाकिने ।
परावराय नित्याय सत्यधर्माय ते नमः ।। 40

नमो महाध्वरेशाय तण्डुनृत्तप्रियाय च ।
विभीषणाय भीमाय भगप्रमथनाय च ।। 41

सिद्धसङ्घातगीताय महाशेषाऽङ्गदाय च ।
नमो मुक्ताट्टहासाय क्ष्वेलस्फोटकराय च ।। 42

नर्दते कुर्दते चैव नमः प्रमुदितात्मने ।
नमो मृडाय देवाय धावते विष्टिताय च ।। 43

ध्यायते नन्दते चैव रुवते द्रवते नमः ।
वलते क्रीडते चैव लम्बोदरशरीरिणे ।। 44

पिशङ्गश्मश्रुकेशाय अरुणाय क्षयाय च ।
नमो विकृतवेषाय मुण्डमालाधराय च ।। 45

नम उन्मत्तवेषाय किङ्किणीकटये नमः ।
अमर्षणाय क्रूराय विष्णुबाणधराय च ।। 46

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नृसिह्मान्त्यावसानाय क्रोडदंष्ट्राविधारिणे ।
गजदन्तगदायाथ गोडजिनाम्बरवाससे ।। 47

तरुणाय शरण्याय अरण्यपतये नमः ।
अप्रमेयाय दीप्ताय निर्गुणाय गुणाय च ।। 48

वाद्यप्रियाय पाराय चूडामणिधराय च ।
नमस्तोकाय चिन्त्याय योगिध्येयाय शम्भवे ।। 49

नमो वेदान्तवेद्याय भववैद्याय भूतये ।
ओजसे तेजसे चैव भ्राजते ग्रसते नमः ।। 50

एवं वै श्रावणे पूज्यो बिल्वैर्नामशताष्टकैः ।
स्तवं पापहरं स्तुत्वा शिवं देवं प्रसादयेत् ।। 51

गङ्गाधरान्तकहर त्रिपुरावमर्द
वेदौघवेद्य भगवन् भवरोगवैद्य ।
आद्यस्त्वमेव शशिमौलिविशालशीर्ष
सृष्टिस्थितिप्रलयकारण पाहि दीनम् ।। 52

विश्वाधिक प्रमथनाथ उमासनाथ
मन्नाथ मन्मथहरान्तक कालकाल ।
शूल प्रभोज्ज्वल शरावरकार्मुकज्या-
पाणे भगाक्षिमथनाव पिनाकपाणे ।। 53

गौरिपते शशिकलामलचारुमौले
वन्दारुवृन्दमकुटार्पितपादपद्म ।
पद्माक्षपूजितपदाम्बुज कालमूल-
निर्वापणान्धकहराव सदैव मां त्वम् ।। 54

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शेषाहिभूष वरयोषकृतार्धकाय
दोषाधिराजवरचूड वृषाधिरूढ ।
वेषायिताखिलजगत्कलनाविशेष
काषायवस्त्रपरिधान नमो नमस्ते ।। 55

अलिङ्गस्त्वमात्मा कथं लिङ्गसंस्थः
स्फुलिङ्गोपमं त्वत्त एवं प्रसूतम् ।
जगन्नश्वरं शश्वदेतद्विचित्रं
प्रसीद प्रसीद प्रभो चन्द्रचूड ।। 56

एवं वैश्रवणे मासे पूज्य स्तुत्वा महेश्वरम् ।
दद्याद्गोमिथुनं श्वेतं सवत्सं दक्षिणान्वितम् ।। 57

शाम्भवेभ्यो हुनेद्धोमं पौर्णम्यां भोजयेद् द्विजान् ।
स्वयं भुञ्जीत चाप्यन्ते सूपापूपैर्मनोहरैः ।। 58

प्रसाद्य देवमीशानमामासं नक्तभोजनः ।
एवं यः श्रावणं मासं प्रापयेत्पूजया मम ।। 59

स किङ्किणीयुतैर्यानैः पुष्पगन्धसुशोभितैः ।
रुद्राणीरुद्रगणपैर्गीतवादित्रनिःस्वनैः ।। 60

याति वंशसहस्रेण देहान्ते शङ्करालयम् ।
नित्यनक्ताशनो भूत्वा कुर्यादस्मिन् विशेषतः ।। 61

सोमवारेषु वाऽशक्तः कुर्यान्मल्लिङ्गपूजनम् ।
स्वयं वा शाम्भवैः सार्धं भस्मरुद्राक्षधारिभिः ।। 62

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कृते रत्नमयं लिङ्गं त्रेतायां हेमसम्भवम् ।
द्वापरे पारदं श्रेष्ठं पार्थिवं तु कलौ युगे ।। 63

नित्यं पार्थिवलिङ्गार्चा विशिष्टा सर्वकामदा ।
किम्पुनः श्रावणे मासि सोमवारेषु किम्पुनः ।। 64

तत्रापि पार्थिवं देवि क्षिप्रसिद्धिप्रदायकम् ।
पार्थिवेन तु लिङ्गेन बहवः सिद्धिमागताः ।। 65

चतुरङ्गुलमानेन कार्यं लिङ्गं महेश्वरि ।
मृदाहरणसङ्घट्टप्रतिष्ठार्चाविसर्जनम् ।। 66

क्रमोऽयं पार्थिवे देवि भवायेत्यष्टनामभिः ।
शाम्भवैरेव तत्कार्यं भस्मरुद्राक्षधारिभिः ।। 67

पञ्चाक्षरजपासक्तैर्विप्रैर्वेदविदां वरैः ।
अन्यपुण्ड्रधरैर्देवि पूजनं चेत्कृतं मम ।। 68

कर्ता कारयिता वापि न फलं सम्यगाप्नुयात् ।
विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया ।। 69

पूजितोऽपि महादेवः प्रसादं न करिष्यति ।
तस्माल्लिङ्गार्चनं देवि वैदिकैरेव कारयेत् ।। 70

मल्लिङ्गं पार्थिवं लोके भुक्तिमुक्तिकरं परम् ।
राज्यार्थी च जयार्थी च कारयेदयुतत्रयम् ।। 71

कान्तार्थी पञ्चसाहस्रं द्रव्यार्थी च तदर्धकम् ।
मोक्षार्थी कोटिसङ्ख्यातः विना ज्ञानेन तल्लभेत् ।। 72

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

भूमिकामः सहस्राणि रूपार्थी त्रिसहस्रकम् ।
सुहृत्कामस्त्रिसाहस्रं वस्त्रार्थी च शताधिकम् ।। 73

मरणार्थी च शत्रूणां सप्तसाहस्रमुत्तमम् ।
नीलपुष्पैर्यजेल्लिङ्गं श्वेतैर्मोक्षमवाप्नुयात् ।। 74

सर्वकामे तु रक्तानि बन्धूकादीनि पूजयेत् ।
वश्याकरण विद्वेषे सहस्रं क्रमतोऽर्चयेत् ।। 75

देशं कालं बलं ज्ञात्वा कुर्यान्मृल्लिङ्गपूजनम् ।
श्रावणे तु महादेवि क्षिप्रं सिद्धिप्रदायकम् ।। 76

निष्कं निष्कार्धमेवेशि दद्याद्ब्रह्मणदक्षिणाम् ।
दरिद्रोऽपि तथाढ्यो वा गावो देयाः सवत्सकाः ।। 77

तत्तन्मासानुसारेण तर्पणं होमभोजनम् ।
ब्राह्मणानां विशेषेण एष प्रोक्तो विधिः शिवे ।। 78

पवित्रारोपणं कुर्यात् श्रावण्यां कार्तिकेऽथवा ।
हैमरौप्यैस्तथा क्षौमैः कार्पासैः शतग्रन्थिलैः ।। 79

प्रलम्बतो जानुमात्रं कुर्याल्लिङ्गे शिवे सदा ।
सम्पूज्य च पवित्राणि रोपयेच्छ्रावणे शिवे ।। 80

पवित्राणि शिवे दत्वा पवित्रो जायते भुवि ।
त्रिणेत्रप्रिय एव स्याच्छ्रावण्यां शङ्करार्चनात् ।। 81

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

स्कन्द उवाच -

यः श्रावणेऽनिलसुपारणपूरणस्य
लिङ्गांनि पार्थिवमयानि च सोमवारे ।
त्र्यक्षं क्षणप्रथितदोषहरेऽपि मासि
नक्ताशनो यदि भवेत्तपसा स मुक्तः ।। 82

पवित्राणि चित्राणि दत्वा त्रिणेत्रे
विचित्राणि पापानि नाशं प्रयान्ति ।
सुपुत्रैः कलत्रैर्युतः सर्वसत्रैः
फलं यच्च तच्चाप्नुयाद्देवि सत्यम् ।। 83

यः श्रावणे शशिविभूषणतुङ्गलिङ्गं
त्यक्तेषणोऽर्चितनरो धिषणोपमानः ।
स्नात्वाशिवे त्रिषवणं निशि सोमवारे
तन्मासि शङ्करगणो भविताग्रगण्यः ।। 84

।। इति श्रीशिवरहस्ये एकादशाम्शे
श्रावणार्चनं नाम
अष्टादशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। एकोनविंशोऽध्यायः ।।

ईश्वर उवाच -

रुद्रं भाद्रपदे पूज्य भद्राणि लभते शिवे ।
न दरिद्रो भवेज्जातु विभवे सति स क्वचित् । 1

मासादौ देवि सङ्कल्प्य स्नायात्तीर्थे बहिर्जले ।
नदीनदतटाकेषु वापीकुल्यासु वा शिवे ।। 2

त्रिराचम्य शुचिः शान्तो ह्युमाकान्तं हृदि स्मरन् ।
सपवित्रकरो मौनी प्राणानायम्य वाग्यतः ।। 3

अग्निरित्यादिभिर्मन्त्रैर्भस्मोद्धूलनतत्परः ।
त्रिपुण्ड्रं रचयेद्भक्त्या शिरोबाहुललाटके ।। 4

रुद्राक्षान्धारयेद्भक्त्या कण्ठकर्णगलोरसि ।
नित्यकर्म विधायादौ सङ्कल्प्य नियतव्रती ।। 5

मासार्चनार्थे वरयेत् ब्राह्मणान् शाम्भवान् शिवे ।
वेदागमपुराणज्ञान् शान्तान् दन्ताञ्जितेन्द्रियान् ।। 6

भस्मरुद्राक्षमालाढ्यान् वरयेद्वेदपारगान् ।
तैः साकं मण्टपं शम्भोः कुर्यात्पुष्पविराजितम् ।। 7

वितानास्तरणोपेतं धूपदीपविराजितम् ।
भूमौ चैवोपलिप्तायां रङ्गवल्लीश्च कारयेत् ।। 8

कदलीस्तम्भसंयुक्ते रम्यादर्शवितचित्रितम् ।
तदग्रे स्थापयेत्कुम्भं सौवर्णं मृन्मयं तु वा ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ताम्रं वा पैत्तलं देवि आम्रपल्लववक्त्रकम् ।
नदीनदाहृतैस्तोयैःपूरितं शोधितं नवम् ।। 10

सामान्यार्घ्ययविशेषार्घ्यौ फलपुष्पांम्बुपूरितौ ।
पाद्यार्घ्याचमने पात्रं कल्पयेच्च तदग्रतः ।। 11

पुष्पाम्बुपूरितान्येव गन्धयुक्तानि तान्यपि ।
पञ्चगव्यं च गन्धोदं मधुपर्कं तथैव च ।। 12

पिधानपात्रसहितं पञ्चगव्यानि सादरम् ।
क्षीरं दधि घृतं शुद्धं क्षौद्रं शर्करयान्वितम् ।। 13

नारिकेलाम्बु रम्भादिफलं पनसमेव च ।
इक्षुजम्बीरसारांश्च कल्पयेच्च पृथक् पृथक् ।। 14

कुशरत्नोद हेमोदं गन्धकर्पूरजं जलम् ।
पाटलोत्पलमिश्राम्बुपूरितं कलशं शिवे ।। 15

कुर्याच्छिवाभिषेकार्थे शोधितं गन्धवासितम् ।
ब्रह्मकूर्चोदकं ग्राह्यं शङ्खमध्याम्बु शङ्करि ।। 16

गोमेदसम्भवं लिङ्गं स्थापयेदन्यदेव वा ।
मण्टपे स्थाप्य तल्लिङ्गं प्राणायामेन शोधयेत् ।। 17

स्वदेहं च ततो मन्त्रं जपित्वाथ(?)षडक्षरम् ।
शतं सहस्रं देवेशि ध्यायेद्देवं महेश्वरि ।। 18

चारुचन्द्रोज्ज्वलत्कान्तिजटामकुटशोभितम् ।
गङ्गाचन्द्रकलामौलिं त्रिणेत्रं नीलकन्धरम् ।। 19

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सोमास्कन्दयुतं ध्यायेद्देवदेवं महेश्वरम् ।
पश्चादाधारपीठान्तं कृत्वार्चनमुमे तदा ।। 20

भूशुद्धिं भूतशुद्धिं च कृत्वा स्वात्मतनुं शिवे ।
शैवीमेव ततो ध्यायेत्षडूर्मिरहितां तदा ।। 21

हृत्पद्मकोशादुत्थाप्य ज्ञाननालेन शङ्करि ।
सव्यनासापुटेनेशि सपुष्पाम्बुकरेण हि ।। 22

लिङ्गमौलौ न्यसेत्पुष्पं प्रणवेनैव केवलम् ।
अवकुण्ठ्याथ सान्निध्यसन्निरीक्षणपूर्वकम् ।। 23

पीठे स्नानोचिते लिङ्गं स्नाप्य पञ्चाक्षरेण हि ।
आवाह्य देवं पञ्चार्घ्यं दापयेन्मधुपर्ककम् ।। 24

पाद्यमाचमनं चार्घ्यमावाहननिरीक्षणम् ।
एतत्पञ्चार्घ्यमित्याहुश्चन्द्रचूडागमोदितम् ।। 25

मधुपर्कं ततो दद्यात्पञ्चगव्यमनन्तरम् ।
क्षीराभिषेकं च ततो दध्ना चैवाथ सर्पिषा ।। 26

मधुना च ततो देवि सितया च ततः परम् ।
नारिकेलाम्बुभिश्चैव कदलीफलमण्डलैः ।। 27

पानसैश्च महाकोशै रसालरसकैस्ततः ।
जम्बीरसारैश्च ततो गन्धोदककुशोदकैः ।। 28

स्वर्णरत्नोदकैर्देवि सेचयेद्रुद्रसङ्ख्यया ।
मध्ये निवेद्य हविषं धूपं दीपं प्रदापयेत् ।। 29

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सशान्तिकः सचमको जप्यो रुद्राख्यसङ्ख्यया ।
एकावृत्त्या द्विरावृत्त्या त्रिरावृत्त्या च शङ्करि ।। 30

ब्राह्मणैः शाम्भवैः सार्धं स्वयं भक्त्या महेश्वरि ।
घृतदीपान् समुद्‌बोध्य धूपैरथमनोहरैः ।। 31

नानावादित्रनिर्घोषैर्गीतवीणारवैः शिवे ।
भवायेत्यष्टनाम्नाऽन्ते तर्पयेत्सकुशं ततः ।। 32

उद्वर्तयेत्सुवस्त्रेण पीठे स्थाप्य महेश्वरम् ।
यज्ञोपवीतं गन्धं च पाण्डरं भस्म केवलम् ।। 33

तण्डुलं चणकैर्युक्तं तस्मिन्मास्यर्चयेच्छिवम् ।
वस्त्राभरणजालानि प्रणवेनैव दापयेत् ।। 34

बिल्वपत्रं पद्‌मपुष्पं करवीराणि चार्पयेत् ।
कनकं च कदम्बं च पूजयेन्निधनाख्यया ।। 35

भवायेति महादेवि धूपं दद्यान्मनः शिलाम् ।
घृताक्तं च ततो दीपं दद्यान्मन्त्रेण केवलम् ।। 36

आढकान्नं च सघृतं सशर्करमुमापतेः ।
अपूपान्यपि देयानि पाचितानि घृतेन तु ।। 37

गुडखण्डयुतानीशे सोपदंशयुतं तथा ।
ताम्बूलं च ततो दद्यान्मुखवासं ततः परम् ।। 38

नीराजयेत्ततो लिङ्गे वेदघोषपुरःसरम् ।
आर्तिक्यामादिपुरुषराजवाजिवृषाकृतिम् ।। 39

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

रथाकृतिशतैर्दीपैर्नीराज्य घटदीपतः ।
बृहत्सोमेति मन्त्रेण रक्षान्तं च विधाय च ।। 40

पञ्चार्तिक्यं च ऋक्षार्तिं कृत्वा कर्पूरखण्डजाम् ।
पश्चाच्छत्रं चामरं च व्यजनादर्शकं शिवे ।। 41

देयं शिवाय वादित्रनिनदं (?)शङ्खकाहलम् ।
दुन्दुभीवेणुवीणाढ्यं स्त्रीणां नाट्यं ततःपरम् ।। 42

प्रदक्षिणाप्रणामादि ततः स्तवमुमे तथा ।
एवं कुर्यात्सदा देवि मकुटागमचोदितम् ।। 43

वक्ष्यामि नामाष्टकशतं तेनैवाच्यों महेश्वरः ।
पुण्ये भाद्रपदे मासि स्तवं चापि वदामि ते ।। 44

रुद्राय रुद्ररूपाय क्रद्धुद्राय प्रचेतसे ।
हिरण्याय शरण्याय अरण्याय नमोनमः ।। 45

वरेण्यायादिमध्यान्तरहिताय गणाय च ।
प्रभासाय सुभासाय गन्धगर्भाय भूतये ।। 46

लोकधात्रे विधात्रे च पात्रे नेत्रे पवित्रिणे ।
कुण्डलीशफणारत्नकुण्डलाय नमो नमः ।। 47

चण्डताण्डवरूपाय खण्डाखण्डाय मुण्डिने ।
दण्डिने खण्डिने चैव खड्गमांसादनाय च ।। (?)48

*भूमिपादादधोमूर्ध्ने सिद्धरूपाय शूलिने ।
भस्माभ्यक्ताय भद्राय भीमाय भयहेतवे ।। 49

---

* भूपादायाप्यधोमूर्ध्ने इति सङ्गतः पाठः स्यात् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

वैशन्ताय च शान्ताय शमीपुष्पप्रियाय च ।
नमः काट्याय नीप्याय पार्याय परमात्मने ।। 50

अधिष्ठानाय ज्येष्ठाय कनिष्ठाय प्रथयिष्णवे ।
नक्तञ्चराय कुप्याय कुलालपतये नमः ।। 51

सङ्ग्रहीत्रे प्रसादाय पद्ममालाधराय च ।
पुराणाय वरेण्याय करुणाय नमो नमः ।। 52

तारानाथधरायाथ गजकृत्तिधराय च ।
पादुकापद्मपादाय नागहंसकधारिणे ।। 53

गिरिशाय गिरीशाय महाकैलासवासिने ।
श्वसते ग्रसतेचैव धावते वसते नमः ।। 54

नमो दंष्ट्राकरालाय करवालकराय च ।
व्यक्ताव्यक्ताय मुक्ताय भुक्तिमुक्तिप्रदायिने ।। 55

पशूनां पतये चैव वैद्युताय बलाय च ।
बलप्रमथनायैव बालपालाय शूलिने ।। 56

काव्याय भव्यरूपाय भावाभावरताय च ।
एवं नामशताष्टेन पूज्यो भाद्रपदे शिवः ।। 57

बिल्वपत्रैः कोकनदैः पुण्डरीकैर्विशेषतः ।
स्तवमेतं प्रयुञ्जीत भावो भक्तियुतो भवेत् ।। 58

सुपर्वगन्धर्वसुपूजिताय
विसर्ग निरर्ग सर्गादिविधानकारिणे ।
भर्गाय शर्वाय च सर्वगाय
नमो नमस्तेऽन्तकगर्वहारिणे ।। 59

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

गुहवहभोजन मौलिमणिप्रिय
शङ्कर पुरहर शं कुरु मे ।
तुङ्गवृषाधिपलिङ्ग सदोज्जवल
भव भवभयहर कुरु करुणाम् ।। 60

कालकाल सुतमालकण्ठ
ज्वालकील गरलाशन शम्भो ।
व्यालमाल सुकपालकपाणे
कोलदन्तहरणाय नमस्ते ।। 61

फालनेत्र सुपवित्रवराङ्गो (ङ्ग)
द्वारपात्र धृतगाङ्गरयश्च ।
पद्ममित्रकृतनेत्र कलत्रा-
धीङ्गपात्र परिपाहि गिरित्र ।। 62

अण्ड खण्डविधिमुण्डवराण्डो-
द्भाण्डषण्डविधिमुण्डकरण्ड ।
कुण्डलीशकृतकुण्डलगण्ड-
*खाण्डकोशकलिताखिलपाल ।। 63

एवं स्तुवन्भाद्रपदे भद्राणि लभते नरः ।
दत्वा शाम्भववर्याणां कृष्णगोमिथुनं शिवे ।। 64

सदक्षिणं सवत्सं च हुत्वा होमं विधानतः ।
मासं नक्ताशनो भूयाद्भवभक्तो जितेन्द्रियः ।। 65

मासान्ते भाद्रपौर्णम्यामेवं पूज्य महेश्वरम् ।
स्वयं भुञ्जीत सहितो बान्धवैर्बन्धमुक्तये ।। 66

---

* ख + अण्डकोश

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

एवं भाद्रपदे मासे सम्पूज्य परमेश्वरम् ।
यात्यन्ते वंशसाहस्त्रैर्वरैर्यानैर्मनोहरैः ।। 67

गीतवादित्रनिनदैर्विरजोऽम्बरवाससा ।
गन्धचन्दनमाल्यादि दिव्यस्त्रगनुलेपनः ।। 68

दोधूयमानश्चमरैर्वीजितो व्यजनादिभिः ।
विहार्यैव पदादूर्ध्वं याति मत्सदनं शिवे ।। 69

तत्र मे गणपैः सार्धं मोदते कालमक्षयम् ।। 70

स्कन्द उवाच -

भाद्रे पदे भद्रपदं समर्च्य(र्चयन्)
रुद्रं दरिद्रो न स जातु भूयात् ।
सुवीरभद्रादिसमर्चितः स्या-
द्भद्राणि सर्वाणि लभेदतन्द्रः ।। 71

उमाकान्तं शान्तो भजति भवतान्तो द्विजगणः
कृतान्ताद्वा भीतः श्रुतिशिरसिभातं यमधनः ।
वसन्ते हेमन्ते कुसुमितदिनान्तेऽर्चति शिवं
अहोवर्षास्विष्टं भजति वरभाग्यैश्च निपुणः ।। 72

।। इति श्रीशिवरहस्ये एकादशाम्शे भाद्रपदार्चन नाम
एकोनविंशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। विंशोऽध्यायः ।।

ईश्वर उवाच -

शिवेऽश्वयुजमासस्य वक्ष्ये पूजाविधिं शृणु ।
यं कृत्वा मनुजः सिद्धिं गाणपत्यं स विन्दति ।। 1

शिवे स्नानविधिं वक्ष्ये ब्राह्मणानां विधाय च ।
सर्वपापहरं साक्षान्मयैव कथितं पुरा ।। 2

अनेन विधिना स्नात्वा पूजयित्वा च शङ्करम् ।
ब्रह्मकूर्चं च पीत्वा तु सर्वपापैः प्रमुच्यते ।। 3

त्रिधा स्नानं समाख्यातं स्मृतिभिः श्रुतिभिः शिवे ।
हिताय शाम्भवानां च तथैवाश्रमिणां शिवे ।। 4

वारुणं पुरतः कृत्वा नदीनदमथापि वा ।
अब्लिङ्गैर्वारुणैर्मन्त्रैरौद्रैर्वा शिवतत्परः ।। 5

अग्निरित्यादिना देहं परिमृज्य सुभस्मना ।
तदाग्नेयं समाख्यातं सर्वपापविशोधकम् ।। 6

धृतत्रिपुण्ड्ररुद्राक्षस्तत्तन्मन्त्रेण मन्त्रवित् ।
मासनाम च सङ्कल्प्य(सङ्कीर्त्य)सकुशाञ्जलिरीश्वरि ।।7

भावयुक्तो भवं स्मृत्वा सर्वपापैः प्रमुच्यते ।
स्नात्वापि भावदुष्टश्चेन्न स शुध्यति सर्वदा ।। 8

भावशुद्धश्चरेत्सर्वं कर्म नित्यं च कामिकम् ।
नृणां हि चित्तकमलं अप्रबुद्धं भवेद्यदा ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

प्रसुप्तं तमसा ज्ञानं भानोर्भासा तदा शुचि ।
मृच्छकृत्तिलपुष्पं च स्नार्थभसितं सितम् । 10

आनीय तीरे निक्षिप्य स्नानतीर्थे कुशांस्तथा ।
प्रक्षाल्य हस्तपादौ च त्रिराचम्य शुचिर्द्विजः ।।

पञ्चगव्यैस्ततः स्नात्वा कूर्चोदेनापि शङ्करि ।
उद्धृताग्नीति मन्त्रेण पुनर्देहं विशोधयेत् ।। 12

गन्धद्वारेतिमन्त्रेण कापिलं गोमयं शुभम् ।
लेपयेत्सर्वगात्रेषु अङ्गादङ्गदृचा शिवे ।। 13

पुनराचम्य विधिवद् अभिमन्त्र्य नदीजलम् ।
तीर्थपालांस्ततो रुद्राननुज्ञाप्याघमर्षणम् ।। 14

ये तीर्थानीति मन्त्रेण स्नातः पूतो भवेच्छिवे ।
एवं स्नात्वा यथान्यायं कृतनित्यक्रियो द्विजः ।। 15

भस्म धृत्वा च जप्त्वा च हुत्वा देवान् पितॄंस्तथा ।
तर्पयित्वा प्रविश्यान्तर्गृहे मण्टपमुत्तमम् ।। 16

कारयेत्पुष्पमालाढ्यं भूलेपनपुरः सरम् ।
रङ्गवल्लीविचित्राढ्यं पद्मतोरणमण्डितम् ।। 17

ब्राह्मणान्वरयेद्देवि शाम्भवान् वेदपारगान् ।
प्राणायामत्रयं कृत्वा ध्यायेद्देवं त्रियम्बकम् ।। 18

पञ्चवक्त्रं दशभुजं शुद्धस्फटिकसन्निभम् ।
सर्वाभरणसंयुक्तं चित्राम्बरविभूषितम् ।। 19

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सोमं सोमवतंसं च त्रिणेत्रं नीलकन्धरम् ।
शिवसारूप्यमाप्याथावाहनाप्लावनादिभिः ।। 20

शैवीं तनुं समास्थाय पूजयेल्लिङ्गमैश्वरम् ।
देहशुद्धिं च कृत्वैवं कलान्यासं न्यसेत्क्रमात् ।। 21

सर्वदा प्रणवो मन्त्रः शिवरूपप्रकाशकः ।
तेनाद्येन शिवायेति जप्यो मन्त्रः षडक्षरः ।। 22

सहस्रपरमो नित्यं शताष्टकृतसङ्ख्यया ।
पञ्चविंशतिधाक्षेण कृता माला जपे वरा ।। 23

जप्त्वा मन्त्री यथान्यायं ध्यात्वा देवं महेश्वरम् ।
सेचयेदर्चनास्थाने गन्धचन्दनवारिणा ।। 24

द्रव्याणि साधयेत्पश्चात् क्षालनप्रोक्षणादिभिः ।
स्थापयेद्विधिना धीमान् अवकुण्ठ्य यथाविधि ।। 25

शृङ्ग शङ्खानि खड्गानि पर्णपद्मपुटानि च ।
*हैमरौप्यादिताम्राणि कांस्यपैत्तलकान्यपि ।। 26

प्रशस्तानि शिवार्चादौ क्षालितान्यथ कल्कतः ।
दर्भैराच्छादितभुवि स्थाप्य पात्राणि सर्वतः ।। 27

क्षालनं प्रोक्षणं चैव प्रणवेन विधीयते ।
प्रोक्षणीं चार्घ्यपात्रं च पाद्यपात्रमनुक्रमात् ।। 28

---

* हैमरौप्यताम्रदीनि इत्यर्थे ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तथैवाचमनार्थाय पात्रमेकं प्रसाधयेत् ।
तेषु तेष्वथ सर्वेषु क्षिपेत्तोयं सपुष्पकम् ।। 29

प्रणवेन क्षिपेत्तेषु द्रव्याना(ण्या) लोक्य बुद्धिमान् ।
उशीरं चन्दनं चैव पाद्ये तु परिकल्पयेत् ।। 30

जातीतक्कोलकर्पूर बहुमूल तमालकान् ।
चूर्णयित्वाऽथ संशोध्य क्षिपेदाचमनीयके ।। 31

एवं सर्वेषु पात्रेषु शङ्खे चापि विशेषतः ।
सकुङ्कुमं च कर्पूरपाटलोत्पलकानि च ।। 32

आभिषेचनिके कुम्भे दापयेच्छोधिते जले ।
कुशाग्राण्यक्षतांश्चैव यवव्रीहितिलानि च ।। 33

आज्यसिद्धार्थपुष्पाणीत्यर्घ्योऽष्टाङ्गः प्रकीर्तितः ।
गन्धपुष्पाक्षतादीनि नवान्येव प्रसाधयेत् ।। 34

सर्वपात्रेषु भसितं दापयेत् प्रणवेन तु ।
पञ्चगव्यमयं पात्रं शोधयेत्पञ्चमन्त्रकैः ।। 35

सद्यादिभिः समभ्यर्च्य कुम्भं पूज्य सशङ्करम् ।
मधुपर्ककपात्रं च सेचयेद्दधिक्षौद्रतः ।। 36

पिधानमपि चोद्धृत्य देयं लिङ्गे विशेषतः
आश्वयुज्यां शिवे लिङ्गं माणिक्यं हेमसम्भवम् ।
तत्पीठे स्थाप्य विधिवत् पीठपूजाक्रमेण तु
पाद्यमाचमनीयं च दत्वा चैव यथाक्रमम् ।। 38

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मधुपर्कं पञ्चगव्यं गायत्र्या प्रतिपादयेत् ।
क्षीरेण दध्ना चाज्येन मधुना सितया तथा ।। 39

नारिकेलाम्बुभिश्चैव कदलीपनसेक्षुजैः ।
जम्बीरनीरगन्धैश्च हेमरत्नजलैस्तथा ।। 40

सद्योजातादि मन्त्रैश्च यद्वा गायत्रितोऽपि वा ।
दद्याल्लिङ्गे ततो धूपं दीपनैवेद्यमुत्तमम् ।। 41

ऋग्युद्रैः वारुणैर्मन्त्रैस्तथावोराजसामभिः ।
स्नापयेद्रुद्रसङ्ख्यातस्त्रिरावृत्त्यापि वा द्विजैः ।। 42

तूर्यघोषैर्वेदघोषै रुद्रं स्नाप्य जलादिभिः ।
भवायेत्यष्टनाम्नैव तर्पयेच्च सकूर्चकम् ।। 43

वाससा परिमृज्येशं पीठे स्थाप्य महेश्वरम् ।
उपवीतं च गन्धं च दद्यान्मुद्राक्षतं नवम् ।। 44

वस्त्राभरणमुख्यानि पुष्पाणि सुरभीणि च ।
सुश्वेतपुण्डरीकाणि बिल्वपत्राणि पूजयेत् ।। 45

सौगन्धिकानि देयानि भवाय निधनेत्यपि ।
देवदारुमयं धूपं दद्यात्सघृतमीश्वरि ।। 46

दीपावलिं ततो दद्यात् गोघृताक्तां सुशोभनाम् ।
गोधूमान्नं पायसं च सापूपं विनिवेदयेत् ।। 47

सशर्करं घृताक्तं च नामैरेतैः (?) प्रपूजयेत् ।
नीराजयेत्ततो लिङ्गं सुचन्द्रवरखण्डकैः ।। 48

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

छत्रं च चामरं देवि व्यजनादर्शकं ततः ।
प्रदक्षिणाप्रणामादि कारयेत्स्तवमीश्वरि ।। 49

नामानि ते प्रवक्ष्यामि दत्वा ताम्बूलमुत्तमम् ।
पूजयेद्बिल्वकुसुमैः स्तवमेनमुदीरयेत् ।। 50

त्र्यम्बकायाम्बिकाभर्त्रे शम्बराङ्कधराय च ।
नमो वन्याय फेन्याय मान्याय च नमोनमः ।। 51

नमो भवाय भव्याय भावनायोद्भवाय च ।
अनन्तबलवीर्याय भूतानां पतये नमः ।। 52

संहर्त्रे चाथ शर्वाय अव्यथाय व्यथाय च ।
गङ्गासलिलधाराय आधाराय गुणात्मने ।। 53

कन्दर्पदर्पघाताय मेध्याय च सुशिल्पिने ।
वातचक्र प्रवृत्ताय क्रतूनां प्रभवे नमः ।। 54

क्रतुपूज्याय ईड्याय सज्जमानाय ते नमः ।
शङ्कराय वृषाङ्काय गणानां पतये नमः ।। 55

दण्डहस्ताय कालाय पाशहस्ताय ते नमः ।
सहमानाय शान्ताय चक्रप्रहरणाय च ।। 56

त्रयीमयाय सत्राय सुहोत्राय कपर्दिने ।
वेदतन्त्रप्रधानाय शतजिह्वाय वेधसे ।। 57

गानप्रियाय तुष्टाय वैद्युताय प्रभावते ।
धाराधराय पाराय सुपाराय रणाय च ।। 58

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

[1]जञ्जपूकाय धर्माय दंष्ट्रिणे घोषिणे नमः ।
विचाराय हरायाथ घोराय पशुपाय च ।। 59

उरगाभरणायाथ दूरगायामराय च ।
करन्धमाय धौम्याय शर्मवर्मकराय च ।। 60

गह्वरेष्टाय शिष्टाय विशिष्टायाक्षताय च ।
उरुगव्याय सेव्याय उर्वर्याय गराय च ।। 61

[2]स्तवाय स्तवमानाय स्तवप्रीताय ते नमः ।
भर्गाय भजमानाय यजमानात्मने नमः ।। 62

सोमाय सोमचूडाय सोमास्कन्दाय ते नमः ।
भूतये स्वस्तये(?) चैव भूतये हेतये नमः ।। 63

शताष्टनामभिर्देवि पूजयेदाश्विने शिवे ।
स्तवमेतत्(म्) प्रयुञ्जीत यदीच्छेत्सिद्धिमात्मनः ।। 64

जय जय विजितारिसङ्घभूम्ने
श्रुतिसीम्नेऽन्तकहारिपादधाम्ने ।
जय जयं करवीरपुष्पमाला-
धर हर शङ्कर दिव्यदेहधाम्ने ।। 65

जय जय [3]तुरगांरिवाहपूज्य
जय जय त्रिपुरारये हराय
धृतसोमाय वराय ते नमोऽस्तु ।। 66

---

1. जञ्चपूक Mutturing Prayers respeatedly. An ascetic, Devotee (who mutters Prayers) जञ्जपूकोऽक्षमालावान् ।
2. स्तव्याय स्तूयमानाय ।
3. तुरगारिः महिष, तद्वाहः यमः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

हर हर भगवन् पिनाकपाणे
गरधर शङ्कर चारुदेहमूर्ते ।। 67

पुरहर भवहर शिवतर सुखकर
पुरहर शम्भोहर गङ्गाधर साम्ब रुद्रपाहि ।। 68

शश्वत्प्रसीद परमेश्वर पञ्चवक्त्र
रुद्र त्रिणेत्र शशिखण्डकलाललाम ।
विश्वाधिकान्तकहर प्रमथेश शम्भो
पाहि प्रपन्नजनतां सुनतां महेश ।। 69

असमकुसुमायुधतातबाणपाणे
हर भीमामर पूज्यपादपद्म ।
श्रुति वाजिवराङ्गहेषगीतकीर्ते
प्रसभं शङ्कर पाहिमां दयाक्ष्णा ।। 70

एवं स्तवं प्रयुञ्जीत तस्मिन् मासि महेश्वरि ।
ब्राह्मणान्दापयेद् गौरं सवत्सं गोद्वयं शिवे ।। 71

दक्षिणादिभिरभ्यर्च्य मासान्ते भोक्तुमर्हसि ।
नित्यं नक्तशनो भक्तो मुक्त एव भवेद्ध्रुवम् ।। 72

आश्वयुज्यां च पौर्णम्यां होमः कार्यो विशेषतः ।
दीनानाथान् भोजयित्वा स्वयं भुञ्जीत बन्धुभिः । 73

आश्वयुज्यां पूर्णिमायां अश्विन्यां अन्नवारिभिः ।।

सायमभ्यर्चयन् लिङ्गं स्थिरं वा चरमेव वा ।
तावदन्नकणाब्दान्तं शिवलोके महीयते ।। 75

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

एवं यः कुरुते मासि सोऽश्वमेधायुतं लभेत् ।
सोऽत्यर्कराजसंराजद्विमानेन सवंशकम् ।। 76

याति मत्सदनं देवि गणैन्द्रैरनुमोदितः ।। 77

पूजितो ब्रह्मविष्ण्वाद्यैः शक्राद्यैर्मुनिभिः सह ।
मासे चाश्वयुजि प्रसन्नहृदयो यो मां समर्च्यादरात् ।
सोऽयं संलभते मदीयमगजे लोकं च भक्त्यादरात्
स यायान् भविता जनेषु सुमहान् इज्यायुतानां फलं
भूयस्तस्य भवन्ति भूमिपतयः प्राज्यं स राज्यं लभेत् ।।

।। इति श्रीशिवरहस्ये एकादशांशे
आश्वयुजार्चनं नाम
विंशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। एकविंशोऽध्यायः ।।

ईश्वर उवाच -

कार्तिकार्चनमीशस्य शृणु वक्ष्ये गिरीन्द्रजे
शिवार्चने विशिष्टोऽयं कार्तिकश्चार्तिनाशकः ।। 1

ऊर्जे गर्जन्ति पापानि स्नानदानार्चनादिभिः ।
पूयन्ते मनुजाः सर्वे इति तर्जन्ति ते भटाः ।। 2

याम्या यमस्य संदने मदनान्तकरार्चनम् ।
दृष्ट्वापि प्रपलायन्ते सिह्मं दृष्ट्वा मृगा यथा ।। 3

कार्तिके मासि सम्प्राप्ते स्नानं कूर्याद्बहिर्जले ।
नदीतटाक वापीषु कूपे वाऽभिरुचिर्यथा ।। 4

सङ्कल्पनियमोपेतो दूर्वामृच्छकृदम्भसा ।
स्व त्रिराचम्य शुचिः शान्तो दर्भपाणिः शिवं स्मरन् ।। 5

प्रविश्याप्सु समन्त्रेण वारुणेन निमृज्य च
देवानृषीन् पितृन् देवि सन्तर्प्य विधिपूर्वकम् ।। 6

तीरे वा सम्प्रगृह्यैव क्षालिताङ्घ्रिस्त्रिराचमेत् ।
धौतवासः परीधाय भस्म धृत्वा यथाविधि ।। 7

त्रिपुण्ड्ररुद्राक्षधरो कृतनित्यक्रियो द्विजः ।
नवं सुपूरितं कुम्भं शोधितैश्च नदीजलैः ।। 8

सुपल्लवमुखं देवि गृहीत्वा कुसुमं स्वयम् ।
स्वकरानीतपुष्पाम्बु साक्षाद् गृह्णाति शङ्करः ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

करानीतं परानीतं शूद्रेण भुवि चाहृतम् ।
क्रयक्रीतं भूमिलग्नं न प्रशस्तं ममार्चने ।। 10

तस्मात्स्वयं वै कुसुममाहरेच्च जलं कुशम् ।
पूजास्थानं प्रविश्याथ गोमयेनोपलेपयेत् ।। 11

पञ्चवर्णकपिष्टेन पद्मस्वस्तिकचिह्नितम् ।
कुर्याच्च पुष्पमालाढ्यं मण्टपं फलकैर्युतम् ।। 12

वितानप्रच्छदपटैरलङ्कुर्याद्यथाबलम् ।
वरयेद्ब्राह्मणान् देवि कोविदानभिषेचने ।। 13

शाम्भवानेव भस्माङ्कान् चन्द्राङ्कपदपूजकान् ।
पात्राणि क्षालितानीशे संस्थाप्य क्रमयोगतः ।। 14

पञ्चगव्यं घृतक्षीरं दधिक्षौद्रसितामपि ।
फलसाराणि सर्वाणि यथाजोषं प्रकल्पयेत् ।। 15

यथालब्धानि कालेन पुष्पाण्यपि महेश्वरि ।
धूपश्चागरुसारेण कल्पनीयो घृतान्वितः ।। 16

दीपमाला कल्पनीया घृताक्ताष्टशतोत्तरा ।
स्वयमाचम्य विधिवत्प्राणानायम्य मन्त्रवित् ।। 17

देशकालादि सङ्कीर्त्य विप्रैरूर्जैर्विशेषतः ।
कल्पयेदासनं पश्चात् आधारादि यथाक्रमम् ।। 18

अनन्तधर्मवैराग्यं ज्ञानं प्राशं त्रिशूलकम् ।
कार्तिके वैद्रुमं वापि हेमराजतसम्भवम् ।। 19

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

गृहीत्वा स्थापयेत्पीठे लिङ्गं संशोध्य चाम्बुभिः ।
लिङ्गमूर्ध्नि नयेत्पुष्पं प्रणवेनैव शङ्करि ।। 20

पश्चात्पञ्चाक्षरं मन्त्रं जपेच्छतसहस्रकम् ।
ध्यात्वैवं देवमीशानं नीलकण्ठं त्रियम्बकम् ।। 21

सोमास्कन्दं चन्द्रचूडं दिव्यस्रग्गन्ध भूषितम् ।
व्याघ्रचर्मपरीधानं नागाभरणभूषितम् ।। 22

भस्माङ्गरागसुभगं मन्दस्मेरमुखाम्बुजम् ।
ध्यात्वाऽऽवाह्य ततो लिङ्गे हृत्पद्मात्प्रणवेन हि ।। 23

स्नानवेद्यां ततो नीत्वा पाद्यमाचमनार्घ्यकम् ।
दद्याच्च मधुपर्कं च पञ्चगव्यं ततः परम् ।। 24

क्षीराज्य दधि सत्क्षौद्रसितया नारिलाम्बुभिः ।
अन्यैः फलरसैर्देवि स्नापयेच्छिवमम्बिके ।। 25

नानामङ्गलघोषेण वादित्रवरयोगतः ।
उद्वर्तनान्तरे स्नाप्य गन्धरत्नकुशोदकैः ।। 26

शातकुम्भाम्बुभिर्देवि धूपदीपनिवेदनम् ।
दत्वा पीठेऽन्त्यके स्थाप्य रुद्रा[illegible]भिषेचयेत् ।। 28

एकादशाऽनुवाकेन सरुद्रचमकेन च ।
एकद्वित्रिवरं वापि पंञ्चब्रह्मादिसे शिवे ।। 29

भवायेत्यष्टनाम्नाऽन्ते तर्पये[illegible]
शङ्खोदकेनाभिषिच्य प्रविमृज्य च वाससा ।। 30

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पीठे संस्थाप्य वस्त्रं च उपवीताक्षतादिभिः ।
यवगोधूमसहिता अक्षताः कार्तिके शुभे ।। 31

गन्धं चन्दन वृक्षोत्थं देयं शर्वाय भस्मयुक् ।
बिल्वपत्रं चम्पकं च नन्द्यावर्ताम्बुजं सिवे ।।। 32

देयं तन्निधनेत्यादि पूजयेत भवादिभिः ।
बिल्वत्वक्पत्रसंयुक्तं धूपं दद्याच्च कार्तिके ।। 33

घृतदीपाः प्रदातव्या दीपमालाः समुज्ज्वलाः .
सुशुक्लतिलसम्पूर्णं कृसरं घृतशर्करम् ।। 34

पूरिकापूपसहितं दद्यान्नैवेद्यमीशितुः ।
ताम्बूलं च ततो दद्यात्क्षीरं तत्र निवेदयेत् ।। 35

नीराजयेत्ततो लिङ्गं तौर्यत्रिकरवान्वितम् ।
शतामलकसम्पूर्णमार्तिक्यं च महेश्वरि ।। 36

आदर्शं वेणुवीणादि शङ्खकाहलदुन्दुभि ।
प्रदक्षिणाप्रणामादि नर्तनं च महेश्वरि ।। 37

कुर्याच्च नामभिर्देवि पूजयेत्तं स्तुवीत च ।
तत्र नाम्नां प्रवक्ष्यामि संङ्ख्यामन्त्रशताष्टकम् ।। 38

स्तुतिं च ते प्रवक्ष्यामि समाहितमनाः शृणु ।
विश्वाधिकाय वेद्याय वेदान्तनिरताय च ।। 39

परावराय वीर्याय शर्वायाथ कपर्दिने ।
उमाधवाय देवाय ताम्रायाथारुणाय च ।। 40

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

बभ्रवे नीलकण्ठाय घण्टाहस्ताय शम्भवे ।
रुद्रायामोघवीर्याय सर्वदाय पिनाकिने ।। 41

जातुकर्णाय सोमाय भवाय भवहेतवे ।
उग्राय घोररूपाय वामदेवाय मुण्डिने ।। 42

खगमाय शमायाथ सन्नगोर्ध्वविलासिने ।
आसन्नजनपालाय नीलग्रीवाय वेधसे ।। 43

अमोघबलवीर्याय शतावर्ताय रागिणे ।
हिरण्यवरवीर्याय रसेन्द्रवरवीजिने ।। 44

ध्वजिने गर्जमानाय हुङ्कारायोरुतेजसे ।
तिग्मायुधाय योधाय रथाधिपतये नमः ।। 45

बिल्मिने बिल्वपूज्याय प्रसन्नाय कपालिने ।
भिक्षवे यक्षपूज्याय त्र्यक्षाय प्रमथाय च ।। 46

उष्णीषिणे मकुटिने गदाहस्ताय वज्रिणे ।
खड्गखेटकरायाथ भिषग्वर्याय ते नमः ।। 47

भर्गाय सहमानाय युगावर्ताय भाविने ।
ज्वलज्ज्वालाय तुष्टाय हृष्टपूषाय धृष्णवे।। 48

गुणप्रियाय गद्याय पर्णशद्याय वैद्युते ।
वामदेवाय जाताय सद्योजाताय पांविने ।। 49

वर्षते ग्रसते चैव अवर्ष्यायार्वटाय* च ।
काट्याय च प्रपथ्याय वास्तुपाय गरादिने ।। 50

---

* अर्वट - Ashes

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

बलप्रमथनायाथ सर्वभूतदमाय च ।
कालनाशाय देवाय फालनेत्राय दन्तिने ।। 51

हनाहनाय पुण्याय पुण्यावासाय ते नमः ।
पुरुषाय पुराणाय ऋषये वेदमूर्तये ।। 52

अन्नाधिपतये चैव सर्वेषां पतये नमः ।
वीतिहोत्राय पात्राय सुत्राम्णे भूधराय च ।। 53

परमेशाय भिद्याय अखिद्याय सुराय च ।
ब्रह्मकन्धरमालाय वामनागधराय च ।। 54

विष्णुरक्तप्रपानाय नरसिह्महराय च ।
इत्येतद्देवि नाम्नां ये शताष्टेन(?)प्रपूजयेत् ।। 55

बिल्वपत्रैश्च कुसुमैः कार्तिके चार्तिनाशकृत् ।
स्तवेन संस्तवेदीशं(?) तस्मिन्मासि शृणुष्व मे ।। 56

पुण्येनायुष्यदेनेशि पुष्पेण परमेश्वरम् ।। 57

विवासनजनावनऽऽवसितभूधरोमापते
विवासनिगमान्तिमप्रथिमधाम सीमाय ते ।
अहीनमुखभूषणप्रियवराय वार्यायते
हराय पुरभेदिने गजहराय तुभ्यं नमः ।। 58

गवामधिप शङ्कर त्रिणयनाव पाहीश्वर
प्रसीद परमेश्वर प्रमथनाथ सोमाङ्कधृक् ।
शरावरकृताब्धिसद्धरिशिरोरुगर्वोन्नत
त्रिषुस्थितपुरावर प्रकटहारिनेत्रोज्ज्वल ।। 59

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मृगाजिनधरान्धकासुरनिबर्हणाऽऽशावस
समीकृतसुरासुरप्रसरणोरुवीर्याय ते ।
[1]भवार्णवनिवासिनोद्धृतकरावलम्बाय ते
वृषाङ्गवरचारिणे वासितचीरिणे (?) ते नमः ।। 60

समीरणसुपारणप्रवरधारिणे वीरिणे
धराधिपसुतामितप्रकटसामिसद्वर्ष्मणे ।
गुणातिगगजाननप्रथमसामगण्याय ते
शरण्यपदपङ्कजानतसुपर्वशर्वाय ते ।। 61

[2]उगणस्त्वं भगणाधिपोरुमौलि-
गणनाथोरुगुरुः पितासि शम्भो ।
शरणागतपालको महात्मा
वरुणाच्र्यो भवहा पुरत्रयारिः ।। 62

पतिरेको भुवनस्य विश्वगस्त्वं
मयि दृष्टिं वितराद्य सम्मुखीनाम् ।
अधुना मधुनाधिकां महेश
विधुना चारुदृशा धुनोतु पापम् ।। 63

इति स्तवेन मां स्तुत्वा नत्वा देवं महेश्वरम् ।
कार्तिक्यां पूर्णिमायां तु होमः कार्यो द्विजोत्तमः (?) 64

---

1. भवार्णव निमग्नसज्जनकृतावलम्बाय ते इति शब्दप्रयोगविषये रचयितुर्निरङ्कुशता बहुत्रेवात्रापि लक्ष्यते ।
2. उगणः Adj. consisting of troops with uplifted or ready weapons उदायुधगणोपेत ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कपिलागोद्वयं देयं सवत्सं च सदक्षिणम् ।
मासं नक्ताशनो भूयात्सोमवारे उपोषितः ।। 65

कार्तिके सोमवारे तु पूज्येत परमेश्वरः ।
चतुर्षु रात्रियामेषु पायसं च निवेदयेत् ।। 66

द्रोणधुत्तूरबिल्वैश्च पूजयेत्सोमवासरे ।
एकं वापि च धुत्तूरं मयि दत्वा विलीयते ।। 67

सर्वेष्वापि च मासेषु सोमवारो वरो वरः ।
तत्रापि श्रावणः पुण्यः कार्तिकस्तच्छतोत्तरः ।। 68

तस्मिन्नुपोषणं पूजा प्रशस्ता सोमवासरे ।
शक्तेनोपोषणं पूजा प्रशस्ता सोमवासरे ।। 69

शक्तेनोपोषणं कार्यमन्यथा निशि भोजनम् ।
धात्रीमूले विशेषेण नक्तं पूज्यो महेश्वरः ।। 70

शाम्भवान् भोजयन्देवि धरित्रीफलमश्नुते ।
ब्राह्मणैरेव कर्तव्यं वारव्रतमिदं शिवे ।। 71

सदा प्रियकरं देवि सोमवारं शिवे मम ।
ये सोमवासरे स्वेच्छं दिवा कुर्वन्ति भोजनम् ।। 72

ते विष्ठाभोजिनो देवि भवन्ति च परेतकाः ।
सोमार्द्रापातयुक्तश्च शिवयोगः स एव हि ।। 73

विशेषात्कार्तिके मासि तस्मिन्पूजा मतोत्तरा ।
सोमार्द्रापातयुक्तो यः सोमवारः शिवे तदा ।। 74

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सहस्त्रार्कग्रहैस्तुल्यः सर्वपापप्रणाशकृत् ।
तस्मिन्नभ्यर्चनं पुण्यं प्रशस्तं प्रीतिकृन्मम ।। 75

ईश्वरः उवाच -

एवं यः कार्तिकं मासं पूजयैव समापयेत् ।
तस्य पुण्यफलं वक्तुं नालं वेदाः सुरासुराः ।। 76

काञ्चनेन विमानेन वंश कोटिसमन्वितः ।
याति मत्सदनं देवि कैलासं दैवदुर्लभम् ।। 77

आर्तिक्यं कार्तिके यत्स्यात् कीर्तिदं तत्त्रिलोकके ।। 78

वर्तिं कुर्या द्योधृताक्तां प्रदीप्तां
पूजाकाले यः सकृच्छङ्करस्य ।
इष्टीरिष्ट्वा यत्फलं प्राप्नुयाद्वै
तल्लब्ध्वासौ याति शम्भौः पदं मे ।। 79

[1]ऊर्जे स्फूर्जद्धूर्जटेर्लिङ्गमीक्ष्य
सायं सोमे वासरे पापसङ्घम् .
गर्जन्त्येवं तर्जिता सोमदूता
वर्जन्त्येनं ते नरास्तूर्जिता[2] हि ।। 80

पर्वण्युमानाथमखर्वपुण्यदं
दूर्वाभिरेवार्च्य सुपर्ववन्द्यम् ।
और्वानलेद्धस्त्विव पापनीर-
शेषो भवेत्पर्वतराजपुत्रि ।। 81

1. ऊर्ज Name of the month Karthika. 2. ऊर्जितः Noble.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

धात्रीपत्रैः पूजनं तूर्जमासि
तद्वै धर्त्रीप्रीति दातुः फलं हि ।
ते सावित्रीजापिनां संसवित्री-
भावं प्राप्ता गुह्यमेतत् शृणुष्व ॥

॥ इति श्रीशिवरहस्ये एकादशाम्शे
कार्तिकमासार्चनं नाम
एकविंशोऽध्यायः ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। द्वाविंशोऽध्यायः ।।

स्कन्द उवाच -

मार्गशीर्षेऽर्चयेद्देवं विशेषेणान्तरात्मना ।
मासानां परमो मासो मार्गशीर्षो गिरीन्द्रजे ।। 1

अस्मिन्नभ्यर्चनं पुंसां विशिष्टफलदायकम् ।
मासादौ प्रथमं स्नायान्नदीनदतटाकके ।। 2

समन्त्रं सकुलाचारं कृतशौचो बहिर्जले ।
सङ्कल्प्य मासनामादि ह्यब्लिङ्गैर्वारुणैरपि ।। 3

परिधाय ततो वासो द्विराचम्य च भस्मधृक् ।
अग्निरित्यादिना देवि त्रिपुण्ड्रपरिभूषितः ।। 4

रुद्राक्षधारणं कृत्वा प्रातः सन्ध्यामुपास्य च ।
हुत्वा च विधिवद्वह्निं कुम्भमम्भःप्रपूरितम् ।। 5

फलपल्लवपुष्पादि सम्पाद्य विधिवत्तदा ।
*गोचर्ममात्रमालिप्य मण्डलं गोमयेन तु ।। 6

चतुरस्रं विधानेन चाद्भिरभ्युक्ष्य मन्त्रवत् ।
पञ्चाशद्दलसंयुक्तमालिखेत्पद्ममुत्तमम् ।। 7

तत्तद्वर्णैस्तथा पूर्णैः श्वेतचूर्णैरथापि वा ।
एकहस्त प्रमाणेन कृत्वा पद्मं सुदर्शनम् ।। 8

---

* गोचर्म - A particular measure of surface thus defined by VASISHTHA दशहस्तेन वंशेन दशवंशान् समन्ततः । पञ्च चाभ्यधिकान् दद्यादेतद्गोचर्मचोच्यते ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कर्णिकायां न्यसेत्पीठं तदूर्ध्वं मण्टपोज्ज्वलम् ।
अलङ्कृत्य वितानाद्यैः पुष्पमालावलम्बितम् ।। 9

पञ्चाशद्दीपमालाभिर्धूपैर्दीपैः समुज्ज्वलम् ।
सितैर्विकसितैः पद्मैर्बिल्वमूले फलैः शुभैः ।। 10

सेवन्तीपारिजातैश्च कुसुमैरन्वितं शिवे ।
कल्प(क)शोधितपात्राणि दर्भादिषु न्यसेत्क्रमात् ।। 11

कुम्भं स्थाप्याम्बुसंपूर्णं पल्लवाढ्यं तदग्रतः
पात्राण्यभ्युक्ष्य पुष्पाम्बुपूरितानि विधाय च ।। 12

सङ्कल्प्य शाम्भवांस्तत्र वरयेत्पूर्ववद् द्विजान् ।
तैरनुज्ञामवाप्याथ मासं *सङ्कल्प्य पूजनम् ।। 13

पञ्चामृतं पञ्चगव्यं मध्वाज्यं दधि दुग्धकम् ।
सिताफलरसानीशे सम्पाद्य सकुशोदकम् ।। 14

जपेत्पञ्चाक्षरं विद्वान् समाहितमनाः शुचिः ।
आपःपूता भवन्त्येते वस्त्रपूताः समुद्धृताः ।। 15

अद्भिः कार्याणि कुर्वीत पूताभिः सर्वसिद्धये ।
सहस्रं वा शताष्टं वा जपेन्मन्त्रं षडक्षरम् ।। 16

ध्यायेद्देवं विरूपाक्षं नीलकण्ठमुमायुतम् ।
मृगाङ्कशेखरं शान्तं सर्वाभरणभूषितम् ।। 17

---

* सङ्कल्प्याऽऽमासपूजनम् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ध्यात्वा देवं च हृत्पद्मे पठीपूजां विधाय च ।
भूतशुद्धिं च भूशुद्धिं आसनार्चनमाचरेत् ।। 18

कलशं शङ्खमावाह्य सोमामृतसुधारया ।
दहन ला(ऽऽप्ला)वनाद्यैस्तु कृत्वा देहं सुधामयम् ।। 19

निर्माल्यमपनोद्येशं लिङ्गं पीठे निवेशयेत् ।
वैडूर्यसम्भवं हैमं पञ्चसूत्रसमुज्ज्वलम् ।। 20

पाद्यमाचमनं चार्घ्यं सपुष्पं विनिवेदयेत् ।
पञ्चगव्ययुतं देवि मधुपर्कं निवेदयेत् ।। 21

पञ्चामृतं तथा क्षीरं दध्याज्यक्षौद्रसेचनम् ।
शर्करा नारीकेलाम्बुरम्भाभिर्गन्धवारिभिः ।। 22

कुशोदकहिरण्योद कूर्चाम्बु विनियोजयेत् ।
हविर्निवेद्य देवाय दत्वा धूपं च दीपकम् ।। 23

स्नानवेद्यां ततो लिङ्गं स्थाप्य संसेचयेच्छिवे ।
सहस्रधाराकलशैः शत धारैरपीश्वरम् ।। 24

नानावादित्रघोषैश्च पुष्पैः शुद्धाम्बुसेचनैः ।
सशान्तिकः सचमको रुद्रो(द्र) एकादशावृतः ।। 25

जप्यो वै शाम्भवैः सार्धमेकद्वित्रिक्रमादपि ।
धूपयेद्दीपयेदेवं तत्रैवाभ्युक्षणे शिवे ।। 26

भवायेति ततो देवं तर्पयेच्च कुशाम्बुभिः ।
उद्वर्तयेत्सूक्ष्मवस्त्रैः पीठे स्थाप्य शिवं शिवे ।। 27

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

वस्त्रोपवीतकं गन्धमसितं च तथाक्षताः ।
अखण्डतण्डुला धौता समुद्राः क्षालिताः शिवे ।। 28

दद्याल्लिङ्गे ततो भूमा भूषणैर्हेमरत्नजैः ।
शताष्टविल्वमालां वा हैमीं वा कारयेच्छिवे ।। 29

राजती वा यथा जोषं बिल्वपत्रेण केवला ।
कुटजं चम्पकं पद्मं सेवन्तीपारिजातकम् ।। 30

कुसुमैः पूजयेद्देवि अपामार्गं तु मार्गके ।
हविर्निवेद्य सापूपं भवायेति च पूजनम् ।। 31

निधनेत्यादिभिर्देवि बिल्वपत्रैश्चक्षालितैः ।
ताराद्यैः पूजयेदेवं शिवमौलौ महेश्वरि ।। 32

साम्राणिधूपैस्तत्रैव धूपयेद्दापयेच्छिवे ।
ताम्बूलं च ततो दद्यान्मुखवासं फलानि च ।। 33

निवेदयित्वा (?) नीराज्य शताष्टवरदीपतः ।
चन्द्रखण्डेन च ततो चन्द्रखण्डशिखामणिम् ।। 34

भेरीमद्दलवीणादि शङ्खकाहल निःस्वनैः ।
ऋक्सामयजुषाथर्वपौराणस्तुतिभिः शिवे ।। 35

छत्रं च चामरं शुभ्रं व्यजनादर्शकध्वजम् ।
निवेदयेत(च्च) देवाय प्रणामप्रक्रमं ततः ।। 36

नर्तनं च प्रसादं च ततो नाम्नां शतं मम ।
मार्गशीर्षे विशेषेण मुक्तिमार्गप्रदायिनि ।। 37

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

स्तवं च तत्र वक्ष्यामि समाहितमनाः शृणु ।
विश्वेशः खण्डपरशुः शिवः शीतांशुभूषणः ।। 38

अखण्डनगकोदण्डश्चण्डिकेशप्रियो हरः ।
गम्भीरो गगनान्तस्थः स्थाणुः सर्वशरीरगः ।। 39

ऊर्ध्वरेता महावीर्यो गणनाथोऽम्बिकाप्रियः ।
जटाधरोऽन्धकहरस्त्रिशूली नीललोहितः ।। 40

गरादनो विरूपाक्षो भवः संसाररोगहृत् ।
*वसनाशो भगाक्षिघ्नो वामनो मन्मथान्तकः ।। 41

भवामयहरो योगी कर्ता सर्वस्वतन्त्रवान् ।
अणोरणीयान्वरदो महतोऽपि महत्तरः ।। 42

सर्वर्तुकारको धन्वी कञ्जजातोत्तमाङ्गधृक् ।
विष्णुनेत्रप्रपूज्याङ्घ्रिर्मधुसूदनसूदनः ।। 43

विचाररहितो मानी मनस्वी कालनाशनः ।
सोमसूर्याग्निनयनो भीमो भव्यो युगान्तकृत् ।। 44

सरस्यो धूम्रकेशाङ्गो बभ्रुशो भयहारकः ।
वाताशनधरो गर्तो कैलासनिलयः स्वराट् ।। 45

तुराषाट्पूजितपदो वेदवाजि(जी)प्रियो युवा ।
सनातनो दीनदयो वसुषेणः प्रसादकृत् ।। 46

स्तुतिप्रियो वास्तुपोऽथ हव्यकव्यभुगीश्वरः ।
व्योमकेशो वामदेवः कृत्तिवासाः प्रभेदनः ।। 47

---

* आशावासाः इत्यर्थेऽयं प्रयोगः । वसनं आशाः यस्य सः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पशूनां पतिरातन्यो विघसाशी मखान्तकः ।
आषाढः पार्वतीनाथोऽघोररुद्रो महेश्वरः ।। 48

कपालपाणिर्मृगधृक् पादुकापादपद्मभूः ।
वेनो वैन्यो वैद्युतात्मा गतिदो मुक्तिदायकः ।। 49

विषाभरणभूषाढ्यो मृडो परिदृ(वृ)ढोऽन्तकः ।
पत्राविच्छेदको देवो वेदगीतः पुरान्तकः ।। 50

विरागो विकटो मुण्डस्तण्डुप्रीतो भयावहः ।
विशालवक्षा भक्ताढ्यस्त्रिपुण्ड्रललितालिकः ।। 51

चक्षुःश्रवोमहाहारो रुद्राक्षवलयोज्ज्वलः ।
गणाधिपो गणश्रेष्ठः शतधन्वा सहस्रधृक् ।। 52

एभिर्नामभिरेवेशि मासि बिल्वैः प्रपूजनम् ।
स्तवं च ते प्रवक्ष्यामि पुण्यं प्रियकरं मम ।। 53

शम्भो मयस्कर हरामर धीर वीर
गङ्गाधर प्रमथनाथ सनातनेश ।
विश्वेश विश्व मदनान्तक विश्वमूर्ते
विश्वाक्ष विश्वमुख पाहि नमो नमस्ते ।। 54

नमामि शशिशेखरं पुरहरं च गङ्गाधरं
विभूतिधरमीश्वरं फणधरेन्द्रहारं हरम् ।। 55

दीनावनप्रथितचारुदृशा महेश
श्रीव्योमकेश कुशकाशसमर्चिताङ्घ्रे ।
कोशावकाशमहिमन् वरशेषभूष
मामाशु वीक्षय सुशिक्षय कामवर्गम् ।। 56

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

स्तवेनानेन देवेशि स्तुवीत परमेस्वरम् ।
पौर्णम्यां शाम्भवैः सार्धं होमः कार्यो विधानतः ।। 57

चित्रं गोमिथुनं देवि सवत्सं च सुदक्षिणम् ।
स्वयं भुञ्जीत तस्यान्ते बान्धवैः शाम्भवैः सह ।। 58

मासं नक्ताशनो भूत्वा भवभक्तो जितेन्द्रियः ।
स च यत्फलमाप्नोति तदेकाग्रमनाः शृणु ।। 59

गीतवादित्रबहुलैरप्सरोगणनर्तनैः ।
गन्धस्रगनुलिप्ताङ्गो दिव्याभरणभूषितः ।। 60

काञ्चनेन विमानेन याति शम्भोर्वरालयम् ।
चापस्थिते दिवानाथे तस्मिन्नुषसि पूजनम् ।। 61

मम देवि प्रियकरं सदा लिङ्गार्चनं मम ।
समुद्गान्नं घृताक्तं च निवेद्य परमेश्वरे ।। 62

यावन्मासं विशेषेण पूजनं तत्र शस्यते ।
शतवर्षेषु या पूजा मोसेनोषसि सा ध्रुवम् ।। 63

तत्फलं लभते गौरि तस्मिन् मासि विशेषतः ।
चापे रौद्रर्क्षके देवि पौर्णम्यां शशिशेखरम् ।। 64

नर्तमानं त्रयीनेत्रं कृशानुवरहस्तकम् ।
त्वया युक्तं विशेषेण शशिभूषणमीश्वरम् ।। 65

सम्पूज्य स्नापयेद्देवमभिषेचनकक्रमैः ।
गन्धं सुगन्धमालिप्य धूपदीपसुमैः शिवे ।। 66

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नैवेद्यैः फलमूलैश्च हविषाऽपूपसंयुतम् ।
दृष्ट्वा प्रमुच्यते पापैर्बुद्धिपूर्वं कृतैरपि ।। 67

पुण्डरीकपुरे वापि पश्येन्नृत्यन्तमीश्वम् ।
रौद्रर्क्षे चापसंयुक्ते मास्यस्मिन् पूर्णिमातिथौ ।। 68

स्नात्वाऽथ शिवगङ्गायां पश्येद्देवं पिनाकिनम् ।
ब्रह्महत्यादिभिर्मुक्तो भक्तो मुक्तिं च विन्दति ।। 69

यो मार्गशीर्षे विधिशीर्षमाला-
चलल्लसद्वक्षसमार्द्रकर्क्षे ।
सम्पूज्य तन्मासि मुदा ममेशि
नृत्तं च संवीक्ष्य विमुक्तिमेति ।। 70

यो मार्गशीर्षेऽर्चनकृद्भवानि
स मुक्तिमार्गं लभते मनुष्यः ।
पुष्पैरपामार्गदलैर्मुदा युतो
न दुर्गमां याति गतिं मदाश्रयः ।। 71

।। इति श्रीशिवरहस्ये एकादशाम्शे मार्गशीर्षार्चनं नाम द्वाविंशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। त्रयोविंशोऽध्यायः ।।

ईश्वर उवाच -

पौषेऽपि शृणु मे मासि पूजनं सर्वकामदम् ।
पुष्ये चोषसि चोत्थाय ध्यात्वा देवं त्रियम्बकम् ।। 1

प्राङ्मुखोदङ्मुखो वापि बहिर्गच्छेन्नदीतटे ।
सकमण्डलुहस्तोऽथ सोदकं प्रावृतं शिरः ।। 2

कुर्याच्चतुष्पथे नद्यां गोष्ठे कृष्टेऽपि वा भुवि ।
गुरुदेवद्विजाग्नीनां स्त्रीणां चैव तु सन्निधौ ।। 3

नाप्सुमूत्रपुरीषाणि ततः शौचं यथारुचि ।
गन्धलेपक्षयं वापि मनः पूतमथापि वा ।। 4

सक्षीरवृक्षकाष्ठैश्च दन्तशोधनमाचरेत् ।
नदीह्रदनदे कूपे देवखाते तटाकके ।। 5

स्नायात्समन्त्रं सकुशं साक्षतं वारुणं जपेत् ।
त्रिवारमप्सु निष्ठावानघमर्षणकृद्भवेत् ।। 6

जपेद्रौद्राणि सूक्तानि अम्भोलिङ्गानि वा शिवे ।
त्रिराचम्य शुचिर्देवानृषीन्पितृगणांस्तथा ।। 7

संतर्प्य तीरमागत्य धौतवस्त्रधरस्तदा ।
भस्मनाङ्गानि सम्मृज्य अग्निरित्यादिमन्त्रतः ।। 8

त्रियायुषेण मन्त्रेण त्रिपुण्ड्रपरिधारणम् ।
शिरोवक्षोललाटे च बाह्वोरथ *पिचण्डके ।। 9

---

* BELLY

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

रेखासंसृष्टिरहितं कुर्वन् पापैः प्रमुच्यते ।
रुद्राक्षधारणं कुर्यात्ततः सन्ध्यामुपास्य च ।। 10

हुत्वाऽनले च वैताने स्मार्ते वापि यथाबलम् ।
नदीनदाहृतैस्तोयैः स्वयं कुम्भप्रपूरितैः ।। 11

वस्त्रपूतैस्तथा देवि कुर्यात्सम्मार्जनं भुवि ।
मार्जन्या सूक्ष्मया देवि लेपयेद्गोमयाम्भसा ।। 12

गन्धचन्दनतोयेन पूजास्थानं प्रसेचयेत् ।
पद्मस्वस्तिकगोपद्मैः कुर्याद्वर्णकमण्डलम् ।। 13

पुष्पमालादिरचितं वितानाद्यैरलङ्कृतम् ।
मण्टपं रचयेत्तत्र धूपदीपविराजितम् ।। 14

तस्मिन् पीठे पुष्परागलिङ्गं संस्थाप्य हेमजम् ।
यथाऽभिमतमीशानि तदग्रे कलशं नवम् ।। 15

नदीतोयेन सम्पूर्णं धौतं पल्लवशोभितम् ।
संस्थाप्य तत्र पात्राणि क्षालितानि प्रसेचयेत् ।। 16

गन्धपुष्पाम्बुभिर्देवि पञ्चगव्यादिकं ततः ।
सामान्यार्घ्यविशेषार्घ्यौ शङ्खं पुष्पाम्बुपूरितम् ।। 17

मधुपर्कं पिधानं च क्षीराज्यदधि शर्कराः ।
क्षौद्रं फलोदकं चैव गन्धं हेमकुशोदकम् ।। 18

स्थाप्य पात्रेषु पुष्पाणि गन्धधूपांश्च साक्षताः ।
स्वयं कुशासने स्थित्वा देवस्याग्रे महेश्वरि ।। 19

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

वरयेद्ब्राह्मणांस्तत्र सङ्कल्प्य शिवपूजनम् ।
मासनामार्चनं गौरि शिवं ध्यात्वा हृदम्बुजे ।। 20

चन्द्रगङ्गाधरं सौम्यं सोमं कुन्दद्युतिं शिवे ।
त्रिलोचनं नीलकण्ठं वरदाभयपाणिनम् ।। (?) 21

त्रिपुण्ड्रविलसत्फालं वासोऽलङ्कारभूषितम् ।
ब्रह्मविष्ण्वादिवन्द्याङ्घ्रिं तरुणं प्रियदर्शनम् ।। 22

ध्यात्वा हृत्पद्मनिलये देवदेवं पिनाकिनम् ।
पञ्चाक्षरं न्यसेद्देहे कृत्वा शैवीं तनुं शिवे ।। 23

स्मरेत्पूर्वमृषिच्छन्दोदेवताबीजमेव च ।
शक्तिं च परमात्मानं रुद्रं त्वां च वरानने ।। 24

मन्त्रेण पाणी संस्पृश्य तलयोः प्रणवं न्यसेत् ।
ओङ्कारं सम्पुटीकृत्य सर्वाङ्गेषु च विन्यसेत् ।। 25

करयोरुभयोश्चैव दशस्वङ्गुलिषु क्रमात् ।
अङ्गुलीनां च सर्वासां तथा चाद्यन्तपर्वसु ।। 26

सबिन्दुकत्रिबीजानि पञ्चमध्यमपर्वसु ।
उत्पत्यादिविभेदेन न्यसेदङ्गुष्ठतः क्रमात् ।। 27

उभाभ्यामथ पाणिभ्यामापादतलमस्तकम् ।
मन्त्रेण संस्पृशेद्देहं प्रणवेनैव सम्पुटम् ।। 28

मूर्ध्नि वक्त्रे च गुह्ये च हृदये हस्तपादयोः ।
कण्ठे चैव न्यसेदेवं प्रणवादिविभेदतः ।। 29

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कृत्वाङ्गन्यासमेवं हि मुखादिपरिकल्पयेत् ।
पूर्वादि चोर्ध्वपर्यन्तं नकारादि यथाक्रमम् ।। 30

षडङ्गानि न्यसेत्पश्चात् यथास्थानं विभेदतः ।
प्रणवं हृदयं विद्यान्नकारः शिव उच्यते ।। 31

शिखा मकार आख्यातः शिकारं कवचं विदुः ।
वकारो नेत्रमस्त्रं तु यकारः परिकीर्तितः ।। 32

इत्थमङ्गानि विन्यस्य ततो वै बन्धयेद्दिशः ।
विघ्नेशो मातरो दुर्गा क्षेत्रज्ञो मातरो दिशः ।। 33

आग्नेयादि भागेषु चतुर्ष्वपि यथाक्रमम् ।
अङ्गुष्ठेन च तर्जन्यानामया स्थाप्य शङ्करि ।। 34

एवं न्यासं परं प्रोक्तं सर्वपापहरं परम् ।
सर्वसिद्धिकरं देवि सर्वरक्षाकरं शिवे ।। 35

न्यस्तमात्रेण देहेऽथ शङ्करप्रतिमो भवेत् ।
न तं स्पृशन्ति पापानि न्यासानां च विधानतः ।। 36

जपेत्पञ्चाक्षरं मन्त्रं लब्ध्वाऽऽचार्यप्रसादतः ।
आज्ञाप्रदक्षिणाहीनं श्रद्धाहीनमनात्मकम् ।। 37

आज्ञाहीनं क्रियाहीनं मन्त्रं जप्त्वापि निष्फलम् ।
पञ्चाक्षरस्य मन्त्रस्य प्राणायाम उदाहृतः ।। 38

प्राणायामात् भवेत्क्षिप्रं सर्वपापपरिक्षयः ।
इन्द्रियाणां [1]वशित्वाच्च [2]तस्मात्प्राणांश्च संयमेत् ।। 39

---

1. Powerful. 2. शैवः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

गृहे जपः समो ज्ञेयो गोष्ठे शतगुणो भवेत् ।
नद्यां शतसहस्रं तु अनन्तं शिवसन्निधौ ।। 40

अङ्गुलीजपसङ्ख्यानमेकमेकं शुभानने ।
रेखाभिर्द्विगुणं जाप्यं पुत्रजीवे दशोत्तरम् ।। 41

शतं वै ढशङ्खमणिभिः प्रवालैश्च सहस्रकम् ।
स्फाटिकं दशसाहस्रं मौक्तिकैर्लक्षमुच्यते ।। 42

पद्माक्षैर्दशलक्षं तु सुवर्णैः कोटिंरुच्यते ।
कुशग्रन्थ्या च रुद्राक्षैरनन्तगुणितं भवेत् ।। 43

पञ्चविंशति मोक्षार्थी सप्तविंशति पौष्टिदम् ।
त्रिंशता धनसम्पत्तिः पञ्चदश्याभिचारके ।। 44

तत्पूर्वाभिमुखं वश्यं करोत्येषाह्यनामिका ।
कनिष्ठा रक्षणी या सा जपकर्मणि शोभना ।। 45

यदुच्चनीचस्वरितैः शब्दैः स्पष्टषडक्षरैः ।
मन्त्रमुच्चारयेद्वाचा जपयज्ञः स वाचिकः ।। 46

हिंस्रेभ्यः सर्वयज्ञेभ्यो जपयज्ञो ह्यहिंसकः ।
सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीम् ।। 47

उपगम्य गुरुं शान्तं मन्त्रतत्त्वार्थकोविदम् ।
तोषयेत्तं प्रयत्नेन भावेन च धनेन च ।। 48

आददीत गुरोर्मन्त्रं पुण्येऽहनि शुभर्क्षके ।
वित्तशाठ्यं न कुर्वीत यदीच्छेत्सिद्धिमात्मनः ।। 49

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पश्चान्निवेदयेद्देवि आत्मानं सपरिच्छदम् ।
एवं तुष्टोऽथ स गुरुःशिष्यं संवत्सरोषितम् ।। 50

परीक्ष्य दद्यान्मन्त्रं च गुरुर्मन्त्ररहस्यवित् ।
जपेन नित्यं सङ्कल्प्य पुरश्चरणसिद्धये ।। 51

यावज्जीवं जपेन्नित्यं अष्टोत्तरसहस्रकम् ।
जपेदक्षरलक्षं वै चतुर्गुणितमादरात् ।। 52

तद्दशांशं तर्पणं च हवनं विप्रभोजनम् ।
एवं षडक्षरं जप्त्वा तस्मिन् मासि शिवार्चकः ।। 53

यो गुरुः स शिवः साक्षान्न तं द्रुह्यात्कदाचन ।
पीठे लिङ्गं प्रतिष्ठाप्य स्नानवेद्यां शिवं जपेत् ।। 54

पाद्यमाचमनं चार्घ्यं दद्यात्पञ्चाक्षरेण तु ।
मधुपर्कं पञ्चगव्यं मधुक्षीराज्यकं दधि ।। 55

फलसाराणि देयानि *गन्धरत्नोदहेमजम् (?)
कूर्चोदकं ततो दद्यात् गन्धकर्पूरवासितम् ।। 56

हविर्निवेद्य देवाय धूपं दीपं च भावतः ।
रुद्रैकादशकं जप्त्वा अभिषिञ्चेन्महेश्वरम् ।। 57

शम्भवैः शुद्धनीरेण धारापात्रेण शङ्करि ।
भवायेत्यष्टभिर्देवि तर्पयेत कुशाम्बुना ।। 58

---

* प्रयोगस्यास्य साधुत्वे विद्वांस एव प्रमाणम् ।
एवं बहुत्रानन्वितशब्दप्रयोगाः दृश्यन्ते ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

वस्त्रेणावेष्ट्य पीठस्थं कृत्वा लिङ्गं च साक्षतम् ।
गन्धचन्दनमिश्रं च पुष्पाण्याभरणानि च ।। 59

दत्वा धूपं च दीपं च नैवेद्यं च महेश्वरि
ताम्बूलं फलजालानि बिल्वैः पद्मैरथार्चयेत् ।। 60

नीराजयेत्ततोलिङ्गं चन्द्रं दद्यान्मनः शिलाम्
छत्रं च चामरं देवि व्यजनादर्शकं तथा ।। 61

भेरीमद्दलशङ्खादि काहलादि विधाय च ।
नाट्यं च वरनारीणां दर्शयेत सरूपकम् ।। 62

नामभिः पूजयेद्देवं बिल्वपत्रैश्च पङ्कजैः ।
ओं पञ्चाशच्छक्तिरूपाय पञ्चाशच्छक्तिमूर्तये ।। 63

आत्मतत्ववरिष्ठाय विद्यातत्वाय ते नमः ।
शिवाय शिवतत्वाय अघोराय नमो नमः ।। 64

अघोराष्टाख्यतत्वाय द्वादशात्मस्वरूपिणे ।
षट्प्रकाराख्यतत्वाय स्वशक्तिविहितात्मने ।। 65

अनिर्देश्याय तत्वाय विद्युल्लयविरूपिणे ।
विद्युदुत्कृष्टरूपाय कामाय वरदाय च ।। 66

त्रिमात्रायामिताक्षाय अकाराय नमोनमः ।
द्वात्रिंशत्तत्वरूपाय उकाराय नमो नमः ।। 67

षोडशात्मस्वरूपाय उकाराय नमो नमः ।
अष्टधात्मस्वरूपाय यकाराय नमो नमः । 68

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अष्टक्षेत्राष्टरूपाय परापररताय च ।
सहस्त्रशिरसे तुभ्यं सहस्त्राक्षाय ते नमः ।। 69

सहस्त्रपादयुक्ताय शर्वाय परमेष्ठिने ।
नत्वात्म शक्तिं रूपाय त्विषीणां* पतये नमः ।। 70

पुनरष्टप्रकाराय तथाष्टाष्टकमूर्तये ।
चतुः षष्ट्यात्मतत्वाय पुनरष्टविधात्मने ।। 71

गुणाष्टकप्रधानाय गुणिने निर्गुणात्मने ।
मूलस्थाय नमस्तुभ्यं शाश्वतस्थानवासिने ।। 72

नाभिमण्डलसंस्थाप्य हृदि निःस्वनकारिणे ।
कण्ठदेशस्थितायैव तालषष्ठस्थिताय च ।। 73

भ्रूमध्ये संस्थितायैव नादमध्यस्थिताय च ।
चन्द्रबिम्बस्थितायैव शिवाय शिवदेहिने ।। 74

वह्निसोमार्करूपाय त्रिंशच्छक्तिस्वरूपिणे ।
त्रिमात्रप्रणवायाथ त्रिधामस्थितये नमः ।। 75

सदाशिवाय शान्ताय महेशाय पिनाकिने ।
सर्वज्ञाय शरण्याय सद्योजाताय ते नमः ।। 76

अघोरायन मस्तुभ्यं वामदेवाय ते नमः ।
तत्पूर्षाय नमस्तुभ्यं ईशानाय नमोनमः ।। 77

---

*त्विषि – Intellectual light, a rays of light

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अनन्तेशाय सूक्ष्माय उतपाय नमोनमः ।
एकाक्षाय नमस्तुभ्यं एकरुद्राय ते नमः ।। 78

नमस्त्रिमूर्तये तुभ्यं श्रीकण्ठाय शिखिण्डिने ।
अनन्तासनसंस्थाय सर्वदाय गदाभृते ।। 79

विमलाय विशालाय विमलाङ्गाय ते नमः ।
वेदागमार्थरूपाय योगसाङ्ख्यरताय च ।। 80

योगसंस्थाय दिव्याय योगिने योगदायिने ।
समस्तशोकसंहर्त्रे दृग्दृश्यातीततेजसे ।। 81

प्रत्याहाराय शुद्धाय यमाय नियमाय च ।
ध्यानध्येयाय दूराय निर्व्यापाराय ते नमः ।। 82

अलिङ्गिने च लिङ्गाय लिङ्गस्थानाय ते नमः ।
एतन्नामभिरेवेशि पौष्ये सम्पूजयेच्छिवम् ।। 83

स्तवं च ते प्रवक्ष्यामि पुण्यं पापनिवारकम् ।। 84

दुर्वारदुःखशमनाय भवौषधाय
संसारवारां निधितारकाय ।
सर्वेश्वरायैव दयामयाय
वेदान्तवेद्याय नमः शिवाय ।। 85

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

जाग्रत्सुषुप्त्याद्यविदूरकाय
सुखान्यदुःखान्यफलप्रदाय ।
वेदान्तवेद्याय बलाबलाय
वर्ष्याय रेषया(रेष्म्याय) नमःशिवाय ।। 86

उग्राय भीमाय सनातनाय
रुद्राय देवाय सदाशिवाय ।
शिवाय शर्वाय हराय शम्भवे
श्रीनीलकण्ठाय नमःशिवाय ।। 87

व्यालोरुमालाय पिताकपाणये
त्रिशूलहस्ताय कपालमालिने ।
भवाय भव्याय दयामयाय
भक्तानुरक्षाय नमःशिवाय ।। 88

सद्याय वामाय अघोरमूर्तये
तत्पूरुषाय च ईशमूर्तये ।
सर्वानु भावाय जगत्स्वरूपिणे
हिताय मेध्याय नमःशिवाय ।। 89

स्तवमेनं प्रयुञ्जीत पौष्ये पुष्टिप्रदं शिवे ।
दद्याद्गोमिथुनं रक्तं सवत्सं दक्षिणान्वितम् ।। 90

शाम्भवेभ्यस्तथा होमं कुर्यात्पर्वणि भोजनम् ।
ब्राह्मणैर्बान्धवैर्देवि भुञ्जीतैव स वाग्यतः ।। 91

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

राजतेन विमानेन यात्यन्ते मम सन्निधिम् ।
यस्त्वेतच्छृणुयान्नित्यं सोऽपि तत्फलमाप्नुयात् ।। 92

स्कन्द उवाच -

पौष्ये विशिष्य शिवलिङ्गसमर्चतेन
*तिष्योद्भवं भयमुमे न लभेन्मनुष्यः
आयुष्यमेति शतकं भुवि शम्भुनाम
घुष्यन् प्रयाति सदनं मदनान्कर्तुः ।। 93

।। इति श्रीशिवरहस्ये एकादशाम्शे
पौष्यमासार्चनं नाम
त्रयोविंशोऽध्यायः ।।

---

* तिष्योद्भवं भयं कलियुगीनं भयम् । महाभारते चोक्तम् - "चत्वारि भारते वर्षे युगानि भरतर्षभ । कृतं त्रेता द्वापरं च तिष्यं च कुरुवर्धन ।। "

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। चतुर्विंशोऽध्यायः ।।

ईश्वर उवाच -

माघमासार्चनं वक्ष्ये अघहारि महेश्वरि ।
तस्मिन् मासि शिवं पूज्य गाणपत्यमवाप्नुयात् ।। 1

स्नानाद्दानार्चनाद्देवि विशिष्टफलदायकः ।
अधहा माघमासोऽयं [1]विघसाशी भवेन्तिशि ।। 2

माघकृष्णचतुर्दश्यां मासि देवो महेश्वरि ।
शिवलिङ्ग तनुर्भूतः पूजनान्मुक्तिदो नृणाम् ।। 3

तदा प्रभृति देवेशि माघकृष्णचतुर्दशी ।
शिवरात्रिः समाख्याता [2]प्रियेयं त्रिपुरद्विषः ।। 4

मासार्चनं प्रवक्ष्यामि तत्रादौ सविशेषकम् ।
प्रातः स्नात्वा बहिर्देशे नद्यां वा देवखातके ।। 5

माघे गर्जन्ति पापानि स्नानदानार्चनान्नृषु ।
नद्यां स्नानं प्रकुर्वीत सन्तर्प्य च सुरान् पितॄन् ।। 6

अग्निरित्यादि मन्त्रश्च भस्म धृत्वा यथाबलम् ।
त्रिपुण्ड्रधारणं कुर्यात् ततो रुद्राक्षधारणम् ।। 7

पुष्पाणि बिल्वपत्राणि नदीजलसुपूरितम् ।
पल्लवाभिमुखं कुम्भं स्वयमेव समाहरेत् ।। 8

---

1. विघसः भुक्तशेषम् । One who eats the remains of an offering.
2. प्रिया इयं त्रिपुरद्विषः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कृतनित्यक्रियो धीमान् पूजास्थानं प्रविश्य च ।
गोमयेनोपलिप्याथ कृत्वा मण्डपकर्णिकम् ।। 9

अष्टपत्रं कर्णिकास्यं पञ्चवर्णैरलङ्कृतम् ।
वितानतोरणोपेतं मण्डपं पुष्पमण्डितम् 10

कदलीस्तम्भविहितं कुर्यात्तत्र सपीठकम् ।
क्षालितानि च पात्राणि स्थाप्यान्यग्रे शिवस्य तु ।। 11

पुष्पाम्बुपूरितान्येव कुम्भं शङ्खं न्यसेच्छिवे ।
पाद्याचमकार्घ्यं च पञ्चगव्यसुपात्रकम् ।। 12

मधुपर्ककृतं पात्रं पुण्यं पञ्चमृतानि च ।
क्षीराज्यदधिसुक्षौद्रशर्कराफलसारकम् ।। 13

नारिकेलाम्रपनसजम्बीरकदलीफलम् ।
स्नानानुगुणमीशानि कल्पयेद्गन्धपुष्पकम् ।। 14

कुशरत्नोदहेमाम्बु कूर्चोदं साधयेत्ततः ।
शाम्भवान् वरयेत्तत्र मासं सङ्कल्प्य पूजने ।। 15

सूर्यकान्तोद्भवं लिङ्गं स्थाप्य पीठे सवस्त्रकम् ।
पञ्चाक्षरं जपेद्धीमान् सहस्रं शतमेव च ।। 16

ध्यायेद्देवं च चन्द्रार्कं सोमस्कन्दं त्रिलोचनम् ।
सर्वाभरणसम्पन्नं मृगटङ्कधरं शिवे ।। 17

धूपदीपादिकं तत्र रचयेत्सेचयेच्छिवम् ।
पाद्याचमनमर्घ्यं च मधुपर्कं ततःपरम् ।। 18

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पञ्चामृतैः फलरसैर्गन्धपुष्पाम्बुभिः शिवम् ।
अभिषिच्य विधानेन निवेद्य हविरुत्तमम् ।। 19

दत्वा दीपं च धूपं च ताम्बूलं शम्भवे शिवे ।
स्नानवेद्यां महालिङ्गं स्थाप्यनीरसुधारया ।। 20

शाम्भवैः सेचयेत्तत्र तौर्यत्रिकसुवादनैः ।
सशान्तिकः सचमको रुद्रस्त्वेकादशावृतः ।। 21

जप्यो महान्यासयुत एकद्वित्रिक्रमं शिवे ।
भवायेति च तत्रान्ते तर्पयेत्सकुशाम्बुभिः ।। 22

परिमृज्य ततो वस्त्रैः पीठे संस्थाप्य शङ्करम् ।
यज्ञोपवीतं वस्त्रं च भस्म गन्धाक्षतैर्यजेत् ।। 23

रत्नाभरणहेमादिबिल्वमालां च गोलकम् ।
दत्वा सम्पूजयेद्बिल्वैर्मन्दारैः कर्णिकारकैः ।। 24

धूपं दद्यात्सुगन्धाढ्यं घृतदीपान् यथाविधिः ।
हविर्निवेद्य शर्वाय सापूपं सोपदंशकम् ।। 25

ताम्बूलं फलजालं च दद्यान्नीराजनं शिवे ।
कर्पूरखण्डदीपं च छत्रं व्यजनचामरे ।। 26

व्यजनं च तथादर्शं गीतं नाट्यं स्तुतिर्नतिः ।
प्रदक्षिणा नर्तनं च कृत्वा नामभिरीश्वरम् ।। 27

पूजयेद्बिल्वपत्राद्यैरेभिर्नामभिरेव हि ।
नमस्कार्याय विश्वाय विष्णवे ब्रह्मरूपिणे ।। 29

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

हिरण्यबाहवे साक्षाद्धिरण्यपतये नमः ।
शर्वाय शर्वरूपाय पुरुषाय नमो नमः ।। 30

रुद्राय नीलरुद्राय कद्रुद्राय प्रचेतसे ।
कालाय कालरूपाय तथा कालाङ्गहारिणे ।। 31

मीढुष्टमाय देवाय शिपिविष्टाय ते नमः ।
शम्भवे धातवे चैव मन्यवे रुद्रमूर्तये ।। 32

नमः कपर्दिने तुभ्यं नीलकम्ठाय ते नमः ।
श्रीकण्ठाय महेशाय बलाय च नमोनमः ।। 33

नमस्त्रिशूलहस्ताय उग्राय च नमो नमः
भीमाय च मृगेन्द्राय भीमरूपाय बन्धवे ।। 34

भस्मदिग्धशरीराय डिण्डिमुण्डीश्वराय च ।
नमो ह्रस्वाय दीर्घाय वामनायोरुमेधसे ।। 35

अग्रेवधाय देवाय नमो दूरे वधाय च ।
धन्विने शूलिने तुभ्यं गदिने हलिने नमः ।। 36

चक्रिणे चर्मिणे तुभ्यं दैत्यदानवभेदिने ।
सद्याय हृद्यरूपाय पर्णशद्याय ते नमः ।। 37

सद्योजाताय वामाय अघोराय नमो नमः ।
पुरुषाय परेशाय पुरुषार्थप्रदाय च ।। 38

गह्वरेष्टाय शिष्टाय विशिष्टाय नमो नमः ।
परमेष्ठिविरूपाय विश्वरूपाय ते नमः ।। 39

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

महाग्रासाय धाराय त्रिशुक्लाय सुवैद्युते ।
ईशानाय नमस्तुभ्यं ईश्वराय सुराय च ।। 40

ब्रह्मण्याय नमस्तेऽस्तु ब्रह्मण्येशाय ते नमः ।
ब्रह्मणे ब्रह्मरूपाय ब्रह्मण्यार्च्यपदाय च ।। 41

विश्वाधिकाय सूक्ष्माय पद्ममालाधराय च ।
श्वेताय हरिकेशाय नीलग्रीवाय हेतवे ।। 42

निषङ्गवरपृष्ठाय शरहेतिधराय च ।
महादंष्ट्राकरालाय श्मश्रवे जटिलाय च ।। 43

तानाय लयमध्याय महाडमरुवादिने ।
गरुडध्वजपूज्याय इज्याध्यक्षाय भाविने ।। 44

विष्णुरक्तप्रपानाय तस्मिन्मासि महेश्वरि ।
स्तुत्वानेन स्तवेनेशि रुद्रसारूप्यमाप्नुयात् ।। 45

वेदार्वाय महेश्वराय विधये शर्वाय सर्वेश्वरा-
याधाराय गदाभृते वसुधृते व्योमाय(?) सोमाय ते ।
सोमायाध्वरसम्भृते वरकृपापूर्णाय पूर्ण प्रभो-
ऽपर्णाहृत्कमलान्तराय महसे देवाय तुभ्यं नमः ।। 46

विश्वाय प्रभवे भवाय भवते भावैकभाव्याय ते
भामार्धाकृतये भवाब्धिबडवाज्वलाय कालाय ते ।
मूलाय प्रथिताय सोमशकलालङ्कारमस्ताय ते-
ऽविश्वस्ताश्वसनाय घोरभवहृत्कान्ताय शान्ताय ते
वेदान्तप्रथिताय तेऽद्य महसे घोरान्तकान्ताय ते ।। 47

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

रमारमणसायकारुणपतिग्रसन्नीक्षण[1]
क्षपापतिकलाधरक्षपितपापतापाय ते ।
विशिष्टजनरक्षणेक्षणविशिष्टतुष्टाय ते
सुकष्टमिदमद्य मे भवजदुष्टकष्टं हर ।।। 48

भवानभवदोऽरिहा[2] हर शरण्यगण्यो महान्
विगुण्यमपि मां विभो तव शरण्य पादे रतम् ।
सदा करुणयाऽनया शमनजातभीतिं हरन्
हराव विभवाधिकं कुरु महेश मामर्भकम् ।। 49

स्कन्द उवाच -

इत्थं स्तुत्वाऽथ मां माघे पौर्णम्यां होममाचरेत् ।
पूर्वोक्तक्रमयोगेन शाम्भवैः सह सादरम् ।। 50

दद्याद्गोमिथुनं देवि कपिलं च सवत्सकम् ।
पौर्णम्यां च प्रकुर्वीत महेशघृतकम्बलम् ।। 51

लिङ्गं त्रिवेदिपर्यन्तं गव्येन सुघृतेन च ।
संस्नाप्य मां विधिः प्रोक्तो महेशि घृतकम्बले ।। 52

विधिना तेन कुर्वीत महेशि घृत कम्बलम् ।
सर्वपापविनिर्मुक्तः शिवसायुज्यमाप्नुयात् ।। 53

शिवरात्रिव्रतं वक्ष्ये शिवप्रीतिकरं परम् ।
अहोरात्रं माघमासि घृतधारां प्रकल्पयेत् ।। 54

---

1. प्रसन्नेक्षण ।
2. अभयं अमङ्गलं द्यति खण्डयति इत्यभवदः तम् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

धारारूपाणि पापानि विनष्टानि न संशयः ।
दर्शनं स्पर्शनं लिङ्गे घृतस्नानं विशेषतः ।। 55

एवमेकगुणं ज्ञेयं गृहे क्षेत्रेष्वथाधिकम् ।
सर्वाघौघहरो मासो मासोऽयं पुण्यवर्धनः ।। 56

स्नानदानार्चनविधौ विशिष्टो भवतुष्टिदः ।
प्रयागे तु विशेषेण मकरस्थे दिवाकरे ।। 57

गङ्गायमुनयोर्मध्ये श्रीशैलाचल विन्ध्ययोः ।
स्नानदानार्चनं देवि श्राद्धेनानन्त्यमश्नुते ।।। 58

श्री ईश्वर उवाच -

प्राज्याज्यादिभिरीशलिङ्गमगजे यो वाऽभिषिच्यादरात्
साम्राज्यं लभते किलैष भवहृच्चेज्यायुतानां फलम् ।
माघे मासे मघर्क्षे त्वघशतभयतो मुक्त एवेह भक्तः
कुर्याद्यो घृतकम्बलं विधियुतं भुक्त्वैव भोगं भुवि
*प्राप्यान्ते प्रमथाधिपत्यमगजे शैलाधिनाथे मम ।।

।। इति श्रीशिवरहस्ये एकादशाम्शे माघमासार्चनं नाम
चतुर्विंशोऽध्यायः ।।

---

* प्रपन्न नवरै सदक्षिणमुमे नक्ताशशक्तीयुक् इति मातृकायां दृश्यमानानु-
पूर्वोस्थाने तुरीयः पदोऽयं कल्पितः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। पञ्चविंशोऽध्यायः ।।

ईश्वर उवाच -

फाल्गुने मासि सम्प्राप्ते शिवं भगवति स्मरन् ।
नदीनदतटाकेषु देवखातोदकेषु च ।। 1

सकुशं साक्षतं स्नायाद्वारुणैर्लिङ्गमन्त्रकैः ।
कुशासक्तकरो देवि सन्तर्प्य च सुरान् पितॄन् ।। 2

भस्म धृत्वा त्रिपुण्ड्रं च कृत्वारुद्राक्षधारणम् ।
होमं च हावयेद्देवि स्वयं वा श्रुतिदर्शितम् ।। 3

कृत्वा नित्यक्रिया विद्वान् सपुष्पाम्बुकुशादिकः ।
समाहृत्य विशुद्धं च उदकुम्भोदकं शुभम् ।। 4

उपलिप्य शुभं देशं रङ्गवल्याद्यलङ्कृतम् ।
वितानतोरणोपेतं मण्टपं तत्र कारयेत् ।। 5

गन्धं धूपं च दीपं च पुष्पाणि विमलान्यपि ।
स्थापयेद्बिल्वपत्राणि फलमूलानि तत्र हि ।। 6

अक्षता धवलास्तत्र शालितण्डुलजास्तिलैः ।
मिश्राः कुर्याच्च गन्धाम्बुपूरितं च घटं नवम् ।। 7

पाद्यार्घ्याचमननीयानि स्थाप्य पात्राणि शङ्करि ।
पञ्चामृतं पञ्चगव्यं दधिक्षीराज्यसन्मधु ।। 8

सुशर्करां फलोदं च रम्भाम्रपनसं शिवे ।
जम्बीरसारं गन्धोदं हेमरत्नकुशोदकम् ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सम्पाद्य दीपानुद्बोध्य वरयेच्छाम्भवांस्ततः ।
सङ्कल्प्य पूजयेद्देवं मासं नक्ताशनःस्थिरः ।। 10

पञ्चाक्षरं च प्रजपेत्सहस्राष्टोत्तरं शतम् ।
ध्यायेद्हृदा महादेवं साम्बं चन्द्रकलाधरम् ।। 11

त्रिणेत्रं नीलकण्ठं च वरदाभयपाणिनम् (?) ।
शाश्वतं शङ्करं देवि हृत्पद्मसदनस्थितम् ।। 12

चन्द्रकान्तमयं लिङ्गं स्थाप्य पीठे सपुष्पकम् ।
दद्यात्पाद्यं ततोऽर्घ्यं च मधुपर्कं महेश्वरि ।। 13

क्षीरेण दध्नाऽऽज्येनापि मधुना सितया शिवम् ।
अभिषिच्य फलोदैश्च गन्धहेमकुशोदकैः ।। 14

दत्वा धूपं च दीपं च नैवेद्यं किञ्चिदेव हि ।
उद्धृत्य शिवलिङ्गं च स्नानवेद्यां विधाय च ।। 15

सपुष्पमौलिं देवेशि रुद्रैकादशसङ्ख्यया ।
गोशृङ्गधारापात्रेण सेचयेच्छाम्भवैः सह ।। 16

स्नानकाले महेशस्य वादित्राणि विधाय च ।
शङ्खकाहलभेर्यादि वेणुवीणादि निःस्वनम् ।। 17

भवायेति ततोऽन्ते हि तर्पयेदष्टनामभिः ।
सम्मृज्य वाससा देवि लिङ्गं मङ्गलदं मम ।। 18

वस्त्रोपवीतं गन्धाद्यं सुभस्माभरणार्पणम् ।
पलाशबिल्वमन्दारैःपूजयेदुत्पलैः शिवे ।। 19

---

1. A kind of baked flowers

2. பூரி 3. feble, worthless

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

धूपं गुग्गुलुसंयुक्तं साज्यं देयं महेश्वरि ।
धृतदीपान्समुद्बोध्य हविः क्षीरेण चान्वितम् ।। 20

[1]मण्डकाः [2]फणिकापूपं निवेद्य सधृतं शिवे ।
दद्याच्चैव सुताम्बूलं पानकं तक्रमेव वा ।। 21

गीतं नाट्यं च वाद्यानि नीराजनपुरःसरम् ।
चन्द्रदीपं ततो दद्याच्छत्रं चामरयोर्युगम् ।। 22

व्यजनादर्शकं तत्र प्रदक्षिणनमस्क्रियाः ।
स्तुतिं च नर्तनं देवि यथाशक्ति समाचरेत् ।। 23

तत्र नामानि वक्ष्यामि शृणु स्तवममुं शिवे ।
फाल्गुने [3]फल्गुपापेभ्यो मुच्यते नामपूजनात् ।। 24

बिल्वपत्रेण देवेशि मासोऽयं शिवतुष्टिदः ।
ओं नमः शिवाय शान्ताय सहमानाय शम्भवे ।। 25

भवाय शिवरूपाय शतावर्ताय वेधसे ।
दुन्दुभ्याय वरेण्याय शरण्याय पिनाकिने ।। 26

योगिने ध्यानगम्याय रम्याय गुरवे नमः ।
अवसान्याय वन्याय आहनन्याय ते नमः ।। 27

कामनाशाय वासाय हरणाय विसारिणे ।
नमोऽस्तु ते महेशाय नमः शान्ततमापते ।। 28

प्रधानपुरुषेशाय योगाधिपतये नमः ।
नमस्त्रिकाग्निकालाय त्र्यम्बकाय पिनाकिने ।। 29

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नमः कालाय रुद्राय महासत्राय शूलिने ।
नमो धूर्जटये तुभ्यं जटिलाय कृशाय च ।। 30

ब्रह्माधिपतये तुभ्यं ब्रह्मविद्याधिपाय च ।
विष्णोश्च जनकायाथ *कामकायान्तकाय च ।। 31

नमो वेदरहस्याय हर्षतर्षाय ते नमः ।
वेदवेदान्तसाराय सुपाराय नमो नमः ।। 32

अतीतानागतज्ञाय वर्तमानाय बृंहते ।
मेरुकोदण्डहस्ताय गङ्गामस्ताय दारिणे ।। 33

नमो बुद्धाय शुद्धाय मेध्याय परमात्मने ।
भूतनाथाय भव्याय हव्यकव्यभुजे नमः ।। 34

नमो दिग्वाससे तुभ्यं दण्डिने मुण्डिने नमः ।
अनादिमलहीनाय ज्ञानगम्याय ते नमः ।। 35

प्रधानपरमाण्वादिमूर्तयेऽनन्तशक्तये ।
विचित्रमहिमाधारस्वरूपाय नमोनमः ।। 36

भूम्ने सीम्ने वेदधाम्ने व्योमसाम्ने नमोनमः ।
नमस्ताराय तीर्थाय सर्गादिपरमाय च ।। 37

---

* कामुकायाऽनघाय चेति पाठः सङ्गतो यदि स्वीकार्यः सचापि भवति । कमकायानकाय चेति मातृकागताऽऽनुपूर्वी । कामुकायेति पाठो नास्माकमभिप्रेतः । शिवस्य कामुकत्वकथनं नोचितमिति तथा परिवर्तितः पाठः । कान्ताय इति सर्वरतंमतः पाठः । Destroyer of Brahman Manmatha Yama.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नमः पार्याय वार्याथ शर्वाय प्रतिमाय च ।
कुक्कुराय विशेषाय मध्यान्तरहिताय च ।। 38

प्रसन्नाय परायाथ कामाङ्गाय सुरेतसे ।
गर्जते तर्जते चैव मार्जते ब्रह्मरूपिणे ।। 39

ऊर्जाय कालनेत्राय दुर्गगम्याय भास्वते ।
ताम्राय तरुणायाथ कारणाय नमोनमः ।। 40

नमो धर्मादिगम्याय विरागाय सुरागिणे ।
नमस्ते निष्प्रपञ्चाय निराभासाय ते नमः ।। 41

ब्रह्मणे विश्वरूपाय सनातन्याय मन्यवे ।
पत्तीनां पतये चैव कारणानां च कारिणे ।। 42

नमः पारदवीर्याय दुर्गार्ति शमनाय च ।
देव्येभिर्नामभिर्देवं सम्पूज्य कुसुमैः शुभैः ।। 43

स्तवमेतत्प्रयुञ्जीत शर्वप्रीतिकरं मम ।। 44

देवादिदेव गिरिजायुतवामभाग
भोगिप्रियाभरणकारण तारणेश ।
व्योमादि संवरण सत्प्रणवानुमेय
मायाविनेऽद्य भगवन् सततं नमस्ते ।। 45

हे भर्ग शङ्कर महेश पिनाकपाणे
गङ्गाधरान्तक हरामरधीरवीर ।
हारीकृताहीन विभो समान-
मानादि मेयरहितामल पाहि दीनम् ।। 46

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

त्वय्येव सृष्टमखिलं त्वयि लीनमेत-
त्सङ्कल्पशिल्पमखिलं भवजालमीश ।
भूतं भवज्जननसंस्थिति नाशमान-
मेततत्तवोदरगतं परिपाहि शम्भो ।। 47

स्तवमेतं प्रयुञ्जीत फालगुने मासि सत्तमे ।
हृत्तमोनाशकं देवि पुण्यमायुष्यवर्धनम् ।। 48

एकवारं त्रिवारं वा पूजयेदिन्दुशेखलम् ।
सर्वेष्वपि च मासेषु दद्याद्गोमिथुनं सितम् ।। 49

सदक्षिणं सवत्सं च सताम्बूलमुमापतेः ।
प्रीतये शैववर्येभ्यो दापयेच्छिवपूजकः ।। 50

मासि तस्मिन् शिवे पूर्णपर्वण्येव समाहितः ।
मधुकम्बलमीशाय कृत्वा पापैः प्रमुच्यते ।। 51

घृतकम्बलमानेन वैशाखे दधिकम्बलम् ।
कृत्वा पापैः प्रमुच्येत शिवस्यतिप्रियो भवेत् ।। 52

मधुकम्बलकं कुर्यात् फाल्गुने पापहारि तत् ।
पूजाविशेष मासेषु कथितां प्रीतिदां मम ।। 53

यः कुर्यान्मनुजः सद्यो मुच्यते भवबन्धनात् ।
स्तवीत परयाः भक्त्या देवदेवं महेश्वरम् ।। 54

त्वयैव सृष्टमखिलं त्वय्येव सकलं स्थितम् ।
त्वया संह्रियते विश्वं प्रधानपुरुषात्मकम् ।। 55

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

त्वमेव पुरुषोऽनन्तः प्रधानं प्रकृतिस्तथा ।
भूमिरापोऽनलो वायुर्व्योमाहङ्कारमेव च ।। 56

यस्य रूपं नमस्यामि भवं त्वां ब्रह्मसम्भवम् ।
यस्य द्यौरभवन्मूर्धा पादौ पृथ्वी दिशोभुजः ।। 57

आकाशमुदरं तस्मै विराजे ते नमोनमः ।
हव्यं वहति यो नित्यं रौद्राग्नेयवपुश्च यः ।। 58

कव्ये पितृगणानां च तस्मै वह्न्यात्मने नमः ।
आप्याययति यो देवः स्वधाम्ना सकलं जगत् ।। 59

सोमः सोमात्मने तुभ्यं ओषधीशात्मने नमः ।
बिभर्त्यशेषभूतानि योऽन्तश्चरति सर्वगः ।। 60

शक्तिर्माहेश्वरी साक्षात्तस्मै वाय्वात्मने नमः ।
सृजत्यशेषमेवेदं यस्य कर्मानुरूपतः ।। 61

स्वात्मन्येव स्थितं चैतत् चतुर्वक्त्रात्मने नमः ।
यः शेतेऽप्सु शिवं ध्यायन् पालयत्यखिलं जगत् ।। 62

नमो विश्वात्मने तुभ्यं विष्णवे पालनात्मने ।
यः संहरेज्जगज्जालं शूलेनैकेन शङ्करि ।। 63

तस्मै रुद्रात्मने तुभ्यं नमस्तेऽस्तु पिनाकिने ।
यं विनिद्रा जितश्वासाः पश्यन्ति परमेश्वरम् ।। 64

ज्योतिः पश्यन्ति *युञ्जानास्तस्मै सर्वात्मने नमः ।
इति स्तवं प्रयुञ्जीत सर्वमासेषु शङ्करि ।। 65

---

* Noble Brahmanas engaged in the exercises of YOGA.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मासपूजामिमां कृत्वा संवत्सरमतन्द्रितः ।
न स भूयोऽपि जायेत संसारे दुःखसागरे ।। 66

ईश्वरः उवाच -

यः फाल्गुने मासि शिवार्चको नरो
न [1]फल्गुपापैर्भयमेति शङ्करि ।
संवल्गते धाम शिवस्य याने
तं चान्तिमग्लानिमवाप्य मोदते ।। 67

मधुकम्बलकृच्च पाल्गुने
वरपर्वण्यगजे धुनोति पापम् ।
[2]मुखेमेतत्किल हाय तस्य गौरि
प्रथिता पौर्णमसी विशिष्टमासि ।। 68

।। इति श्रीशिवरहस्ये एकादशाम्शे
फाल्गुन मासार्चनं नाम
पञ्चविंशोऽध्यायः ।।

---

1. फल्गु - Flimsy small
2. भविताऽपहताघसङ्घ एष गणनाथो मम सन्निधौ भवन्ति । इति कथनं सङ्गतं मन्यते ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। षड्विंशोऽध्यायः ।।

स्कन्द उवाच -

शृणु गुह्यतमं पुण्यं सर्वसिद्धिप्रदायकम् ।
देव्यै देवेन कथितं मासार्चनविधिक्रमम् ।। 1

कर्तुरप्यधिकं पुण्यं लभते भावको नरः ।
यदि भक्तो महादेवे श्रुत्वा वापि विमुच्यते ।। 2

यतस्त्वं शिवभक्तेषु श्रेष्ठस्तस्माद्वदामि ते ।
चतुर्दश्यमथाष्टम्यां पक्षयोः शुक्लकृष्णयोः ।। 3

*योऽन्नं किञ्चिन्न भुञ्जीत शिवार्चनरतः शुचिः ।
तत्पुण्यमक्षयं प्रोक्तं सततं सत्रयाजिनाम् ।। 4

सत्यवादिषु यत्पुण्यं यत्पुण्यं तीर्थगामिनाम् ।
अग्निहोत्रेण यत्पुण्यं यत्पुण्यं यज्ञयाजिनाम् ।। 5

तत्पुण्यं सकलं प्राप्य शिवलोकं स गच्छति ।
नक्तं शक्तोऽपि कुर्वीत भवभक्तो जितेन्द्रियः ।। 6

पृथिवीं भाजनं कृत्वा भुङ्क्ते पर्वसु यो नरः ।
अहोरात्रेण चैकेन त्रिरात्रफलमश्नुते ।। 7

द्वयोर्मासस्य चाष्टम्यां भूतयोरपि भुक्तिमान् ।
शिवमभ्यर्च्य विधिवत् निशि बिल्वैश्च पङ्कजैः ।। 8

* मातृकायामेवं पाठः "योह्नमेकं न भुञ्जीते"ति । योऽह्नरेकमितिवा सङ्गतः पाठः भवेत् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सोपवासः सुगन्धाङ्गः शयीत प्रियया सह ।
शेते निश्चलचेताश्च रतिरागविवर्जितः । 9

शिवैकगतचित्तश्च तस्य पुण्यफलं शृणु ।
दिव्यवर्षसहस्राणि दिव्यवर्षशतानि च ।। 10

तपस्तप्तं महत्तेन भवेदेव न संशयः ।
भवभक्तश्च पूतात्मा यद्यपि स्यात्सुपापकृत् ।। 11

विधूय पापकलिलं शिवलोके महीयते ।
सर्वमासेषु पुण्यात्मा पक्षयोः शुक्लकृष्णयोः ।। 12

शक्तोऽथ भवभक्तो यो मुक्तो नक्ताशनो भवेत् ।
इह भोगमवाप्नोति परत्र परमां गतिम् ।। 13

शिवलोके वसेन्नित्यं शिववत् संवृतो गणैः ।
योऽहरेकं न भुञ्जीत शक्तो नक्तं च पर्वणि ।। 14

ब्रह्मचारी जितक्रोधो भस्मरुद्राक्षभूषणः ।
शिवलिङ्गार्चनरतो विरतो विषयेषु च ।। 15

संवत्सरान्ते विप्रेन्द्राञ्छिवभक्तान् सदक्षिणम् ।
भोजयित्वा ततो ब्रूयात्प्रीयतामिति वै शिवः ।। 16

भोजयेद्यदि विद्वांसं कपालव्रतधारिणम् ।
भस्माभ्यक्तं शुचिं शान्तमुमाकान्तरतं द्विजम् ।। 17

भोजितास्तेन देवेशा ब्रह्मविष्णु महेश्वराः ।
कपालपूर्णमशनं भैक्षं यो यस्य गृह्णते (?) ।। 18

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कुलं तस्योद्धरत्येव दशपूर्वान् दशापरान् ।
पाद्यार्घ्याचमनीयानि (द्यैः) गन्धपुष्पैः प्रपूजयेत् ।। 19

पर्वस्वपि विशेषेण भोजयेच्छिवयोगिनम् ।
पूजितः स शिवः साक्षात् यत्र शैवःप्रपूज्यते ।। 20

शिवव्रतेषु सर्वेषु नक्तभोजनमुत्तमम् ।
उपवासात्परं भैक्ष्यं भैक्ष्यात्परमयाचितम् ।। 21

अयाचितात्परं नक्तं तस्मान्नक्तेन वर्तयेत् ।
अमा सोमान्विता या सा तस्यां नक्तं समाचरेत् ।। 22

देवैस्तु भुक्तं पूर्वाह्णे मध्याह्ने ऋषिभिस्तथा ।
अपराह्णे तु पितृभिः सन्ध्यायां गुह्यकादिभिः ।। 23

सर्वां वेलामतिक्रम्य नक्तभोजनमाचरेत् ।
शिवक्षेत्रेषु सर्वेषु वर्षं नक्ताशनो भवेत् ।। 24

अविमुक्ते विशेषेण यावज्जीवं प्रतिज्ञया ।
भस्मोद्धूलितसर्वाङ्गो भवेन्नक्ताशनः सदा ।। 25

हविष्यभोजनं स्नानं सत्यमाहारलाघवम् ।
शिवाग्निकार्यं लिङ्गार्चां नक्तभोजी समाचरेत् ।। 26

कृष्णाष्टम्यां चतुर्दश्यां सोमवारे प्रदोषके ।
सर्वमासेषु सर्वत्र विधिर्नक्ताशनस्य हि ।। 27

तत्रापि च शिवक्षेत्रे अविमुक्ते च नित्यशः ।
जाबालोक्तो विधिः साक्षान्नक्ताशी मुक्तिमाप्नुयात् ।। 28

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

भस्मनिष्ठो लिङ्गरतो यां गतिं लभते मुने ।
न तां गतिमवाप्नोति वेदवेदान्तवेद्यपि ।। 29

मार्गशीर्षे शुभे मासि शङ्करं तु समर्चयेत् ।
पीत्वा तु भक्तो गोमूत्रमनाहारो निशि स्वपेत् ।। 30

अतिरात्रस्य यज्ञस्य फलमष्टगुणं लभेत् ।
एवं पुष्येऽपि सम्पूज्य पुष्पैः शम्भुं निशि द्विजः ।। 31

कृष्णाष्टम्यां घृतं प्राश्य वाजपेयाष्टकं लभेत् ।
माघमासे तु सम्प्राप्ते कृष्णाष्टम्यां प्रपूजयेत् ।। 32

यवांश्च सञ्चितान् प्राश्य सोऽश्वमेघफलं लभेत् ।
कृष्णाष्टम्यां तथा काश्यां भैरवं पूजयेन्नरः ।। 33

विश्वेश्वरार्चनरतो बिल्वपत्रैश्च कोमलैः ।
हविर्निवेद्य सापूपं माषापूपांश्च सत्तम ।। 34

शताष्टोत्तरसङ्ख्याभिर्भैरवं चापि पूजयेत् ।
गन्धपुष्पैस्तथा धूपैः काशी(श्यां)निर्विघ्नकारिणम् ।। 35

प्रतिमासं कृष्णपक्षे शिवरात्रिं च सत्तम ।
पूजयेदविमुक्तेशमन्यक्षेत्रेऽपि वा शिवम् ।। 36

माघ्यां कृष्णचतुर्दश्यां पूजयेदिन्दुशेखरम् ।
चैत्रे त्रिणेत्रनामानं पूजयेत्परमेश्वरम् ।। 37

द्वादशाहक्रतुफलं लभते सोऽचिरान्मुने ।
वैशाखे शिवनामानं पूज्य रात्रौ कुशोदकम् ।। 38

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पीत्वा पुरुषमेघस्य फलमष्टगुणं लभेत् ।
ज्येष्ठे पशुपतिं पूज्य गवां शृङ्गोदकं पिबेत् ।। 39

गवां कोटिप्रदानस्य यत्फलं तदवाप्नुयात् ।
आषाढे चोग्रनामानं दृष्ट्वा प्राश्य च गोमयम् ।। 40

सौत्रामण्ययुतस्यैव स फलं प्राप्नुयान्नरः ।
श्रावणे शर्वनामानं पूज्य पर्णानि भक्षयेत् ।। 41

वर्षकोटिशतं साग्रं सूर्यलोके महीयते ।
मासे भाद्रपदेऽष्टम्यां त्र्यम्बकं नाम पूजयेत् ।। 42

प्राश्य बिल्वफलं पक्वं सत्रयागफलं लभेत् ।
मासे चाश्वयुजेऽष्टम्यामीश्वरं नाम पूजयेत् ।। 43

पौर्णम्यामाश्वयुज्यां च अश्विन्यर्क्षे प्रदोषके ।
अन्धसां राशिभिर्लिङ्गं छादयेद्याममात्रकम् ।। 44

*सिक्थे सिक्थेऽश्वमेधस्य फलमाप्नोति मानवः ।
तण्डुलोदकमापीय तस्मिन् मासि शिवार्चकः ।। 45

पौण्डरीकाष्टकस्यैवं फलं च सकलं भवेत् ।
कार्तिके रुद्रनामानं पूज्य पीत्वा कुशोदकम् ।। 46

अग्निष्टोमादिदशकं फलं प्राप्य विमुच्यते ।
मार्गशीर्षे महादेवमुग्रनाम्ना प्रपूजयेत् ।। 47

---

* सिक्थ - Boiled rice. A Ball or lump of boiled rice.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

स [1]उक्थ्यदशकस्यैव लभेत फलमम्बुपः ।
पुष्यमासे तु सम्प्राप्ते यः कुर्यान्नक्तभोजनम् ।। 48

शर्वार्चनरतो धीमान् फलमूलेन वर्तयेत् ।
अप्तोर्यामायुतफलं प्राप्नोत्येव विशेषतः ।। 49

माघमासे तु सम्प्राप्ते यः कुर्यान्नक्तभोजनम् ।
स [2]षोडशी(शि)शतफलं प्रोप्नोत्यमरपूजितः ।। 50

सम्प्राप्ते फाल्गुने मासि नक्ताशी शिवपूजकः ।
श्यामाकक्षीरनीवारैर्जितक्रोधो जितेन्द्रियः ।। 51

अत्यग्निष्टोमदशकफलमेष समश्नुते ।
सोपवासश्चतुर्दश्यां भवेदुभयपक्षयोः ।। 52

शिवाय पूर्णिमायां तु यो दद्याद्घृतकम्बलम् ।
माघ्यामघायुतैर्मुक्तो भवेदेव महामुने ।। 53

मासद्वादशकं ह्येवं पूजयेच्छशिशेखरम् ।
पर्वान्ते भोजयेद्विप्रान् शिवभक्तान् जितेन्द्रियान् ।। 54

पायसं मधुयुक्तं घृतेन च परिप्लुतम् ।
भक्त्या हिरण्यवासांसि भक्तेभ्यो यो निवेदयेत् ।। 55

वर्षमेकं चरेदेवं नैरन्तर्येण यो नरः ।
सर्वयज्ञफलं लब्ध्वा शिवक्षेत्रे विमुच्यते ।। 56

---

1. उक्थ Name of a sacrifice forming part of the ज्योतिष्टोम Sacrifice - A soma sacrifice.

2. षोडशिन् A modification of the Agnishtoma sacrifice.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अविमुक्ते तु नियतमेवं व्रतवरं चरेत् ।
जितेन्द्रियः सत्यवादी वित्तशाठ्यविवर्जितः ।। 57

देहान्ते शिवसारूप्यं लभेत्पुण्यफलं शृणु ।
सूर्यकोटिप्रतीकाशैर्विमानैः सार्वगामिकैः ।। 58

रुद्रकन्यासमाकीर्णैर्महावृषभसंयुतैः ।
सङ्गीतनृत्तवाद्याद्यैरप्सरोगणसेवितैः ।। 59

चामरैर्धूयमानश्च स्तूयमानः सुरासुरैः ।
गत्वा शिवपुरं दिव्यं वसेदाभूतसम्प्लवम् ।। 60

ज्ञानं लब्ध्वा शिवमुखात्स तत्रैव विमुच्यते ।
वसन्ते किंशुकैः पूज्य दमनैर्मदनार्दनम् ।। 61

*गोष्टोऽष्टफलमाप्नोति(?) ग्रीष्मेऽपि च महेश्वरि ।
मल्लिकाभिः समभ्यर्च्य नरमेधफलं लभेत् ।। 62

वर्षासु कुटजैः पूज्य शिवं सत्रफलं लभेत् ।
शरत्सु च महादेवं पारिजातैः समर्चयेत् ।। 63

गवामयनयज्ञस्य फलं लब्ध्वा विमुच्यते ।
उमाकान्तं च हेमन्ते मन्दारैश्च समर्चयेत् ।। 64

कर्णिकारैः सोऽग्निचित्यक्रतोः फलमवाप्नुयात् ।
शिशिरे करवीरैश्च सितरक्तैः समर्चयेत् ।। 65

---

* गोष्टोमाष्टफलं-गोष्टोम -A kind of sacrifice fasting for one day.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

दशरात्रफलं लब्ध्वा मोदते शिवसन्निधौ ।
कृष्णाष्टम्यां सर्वमासि अविमुक्ते विशेषतः ।। 66

भैरवं पूजयेद्भक्त्या स्रग्गन्धाभरणार्चनैः ।
हविषा वापि ताम्बूलैर्माषापूपैः समर्चयेत् ।। 67

काश्यां निर्विघ्नवासाय भौमाष्टम्यां विशेषतः ।
सम्पूज्य संस्तुवीतैवं काश्यां श्रीकालभैरवम् ।। 68

कपालमालिकाकण्ठं ज्वलत्पावकलोचनम् ।
कपालकरमत्युग्रं कलये कालभैरवम् ।। 69

मणिपादुकपादाब्जं महाशूलकराम्बुजम् ।
कन्थाकञ्चुकसङ्क्रान्तं कलये कालभैरवम् ।। 70

दिगम्बरं जपावर्णं जरामरणवर्जितम् ।
चारुचन्द्रजटाजूटं कलये कालभैरवम् ।। 71

बालभानुप्रभाकारं नीलोकोमलकञ्चुकम् ।
ज्वलद्दण्डकपालाढ्यं कलये कालभैरवम् ।। 72

सुरारिवरदावाग्निं सुरकैरवशीतगुम् ।
शिवाज्ञाकारकं साक्षात् कलये कालभैरवम् ।। 73

यस्याज्ञया जगत्सर्वं स्थावरं जङ्गमं तथा ।
वर्तते निर्भयं काश्यां कलये कालभैरवम् ।। 74

य इदं कालनाथस्य पठेद्भक्त्याऽष्टकं नरः ।
स एव लभते काशीं निर्विघ्नेन शिवाज्ञया ।। 75

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तत्रैव वसते जन्तुः पूजनस्तवनेन च ।

स्कन्द उवाच -

इत्येव ते समाख्यातो मासार्चनविधिक्रमः ।। 76

यावज्जीवं द्वाशार्धं (ब्दं) त्रिवर्षं वर्षमेव वा ।
काश्यामन्यत्र वा क्षेत्रे कृत्वा शिवसलोकगः ।। 77

काश्यां सायुज्यमाप्नोति विश्वेशकृपया मुने ।
एवं कुर्वन् परं धर्मं शिवज्ञानमवाप्नुयात् ।। 78

ज्ञानाद्दुःखान्तमाप्नोति काश्यामस्य प्रसादतः ।
शम्भोर्नचान्यतः पन्था विना शर्वार्चनान्मुने ।। 79

वसन्ते यः शान्तो भजति च उमाकान्तमगजे
वरे ग्रीष्मेरष्मं भजति भवभीतो हि नितराम् ।
शिवे वर्ष्यं वर्षास्वपि भजति मासेषु शरदि
कृतान्तान्तं शम्भुं भजति यदि हेमन्तशिशिरे ।। 80

।। इति श्रीशिवरहस्ये एकादशाम्शे
षड्विंशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। सप्तविंशोऽध्यायः ।।

स्कन्द उवाच -

पुण्यं पर्वसु सर्वेषु ग्रहणे सोमसूर्ययोः ।
अयने विषुवे चैव षडशीतिमुखेषु च ।। 1

पुरा मन्वादिषु मुने पूर्णिमामासु सर्वदा ।
सङ्क्रान्तिषु व्यतीपाते वैधृतौ च विशेषतः ।। 2

आषाढे ज्येष्ठश्रावण्यां मार्गशीर्षे च चैत्रके ।
माघ्यां च पूर्णिमायां तु शिवपूजा विशिष्यते ।। 3

अमा सोमान्विता या स्यात्सर्वमासेषु सत्तम ।
कार्तिकेऽथ विशेषेण पुष्याषाढे महाफला ।। 4

स्नानमभ्यर्चनं शम्भोः विशिष्टः स्यात्सदा नृणाम् ।
कृष्णपक्षाष्टमी देवि भूताप्यसितपक्षके ।। 5

मासिकी शिवरात्री च प्रशस्ता शिवपूजने ।
या माघे कृष्णपक्षस्य भूता सोमार्चिता यदि ।। 6

सार्द्रा पातान्विता वापि निशि शर्वप्रिया हि सा ।
स योगो दुर्लभो नृणां तत्र लिङ्गोद्भवो मुने ।। 7

एकेन बिल्वपत्रेण तस्यां पूज्य विमुक्तिभाक् ।
या माघी शिवरात्री च महापूर्वा विशिष्यते ।। 8

गोकर्णे सा विशिष्येत तथा वै गन्धमादने ।
श्रीकालहस्तिशैले च शिवरात्रिर्विशिष्यते ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

विष्णुब्रह्मादयो देवाः प्रार्थयन्ति मुनीश्वराः ।
कदा गोकर्णमेष्यामः शिवरात्रौ शिवार्चकाः ।। 10

भविष्यामो बिल्वपत्रैर्द्वित्रैर्वा मुक्तिमाप्नुमः ।
तत्रैव सागरे स्नानं गोकर्णेशस्य पूजनम् ।। 11

शिवरात्रौ शिवार्चैषा जन्मनैकेन मुक्तिदा ।
गोकर्णे च मुनिश्रेष्ठ शिवक्षेत्रेषु पुण्यदा ।। 12

तस्यामभ्यर्चनविधिं तवाग्रे कथयाम्यहम् ।
कार्तिके श्रावणे चैव सोमवारो विशिष्यते ।। 13

कृष्णपक्षेऽपि च मुने सर्वमासेषु पुण्यदः ।
भक्तः शिवार्चको नक्तं तस्मिन् व्यक्तं तु मुक्तिभाक् ।। 14

सर्वमासप्रदोषोऽपि प्रशस्तः शिवपूजने ।
तत्रापि दुर्लभो ज्ञेयो मन्दवारे महाफलः ।। 15

दुर्लभः कृष्णपक्षोत्थः शिवप्रियतमो मतः ।
तत्रैवार्चनमीशस्य सर्वसम्पत्प्रदायकम् ।। 16

सर्वत्रैव शिवागारे चरे वा स्थावरेऽपि वा ।
लिङ्गेषु पूजया शम्भोः मुक्तिः करगता भवेत् ।। 17

किम्पुनस्त्वविमुक्तेऽथ त्रिलोचनसमीपतः ।
त्रिलोचनेश्वरं काश्यां मन्दवारे प्रदोषके ।। 18

पूज्य जन्मायुतैः पापैर्मुक्तो मुक्तिं च विन्दति ।
स द्वादशप्रदोषाणां लभेत्फलमयत्नतः ।। 19

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मन्दप्रदोषपूजातो लभेदेव महामुने ।
एकादश्यां महादेवं पूज्य बिल्वैर्मनोहरैः ।। 20

सितायामसितायां च रुद्रतिथ्यां मुनीश्वर ।
उपोष्य शिवमभ्यर्च्य कृष्णायां नक्तभोजनम् ।। 21

कुर्यादेव शिवे भक्तो महाफल जिगीषया ।
विष्णुब्रह्मादयो देवा एकादश्यां शिवार्चनम् ।। 22

कुर्वन्त्युपोषणं भक्त्या रुद्रतिथ्यां द्विजोत्तम ।
एकादशानां रुद्राणां प्रीत्यर्थं गरुडध्वजः ।। 23

पक्षद्वयेऽपि सततं करोत्येकादशीव्रतम् ।
रुद्रप्रियकरी ह्येषा कार्तिकाषाढगा सिता ।। 24

वैशाख्यां च तथाषाढ्यां चैत्र्यां माघ्यां महेश्वरम् ।
महास्नानविधानेन पौर्णम्यां स्नापयेन्नरः ।। 25

पञ्चामृतैः फलरसैर्महापुण्यमवाप्नुयात् ।
नीलोत्पलदलैर्बिल्वैःपूजयन् कुसुमैरपि ।। 26

सर्वपापविनिर्मुक्तः अक्षयां लभते गतिम् ।
यो माघ्यां कुरुते भक्त्या शिवाय घृतकम्बलम् ।। 27

स वंशकोटिसंयुक्तो मोदते शिवसन्निधौ ।
वैशाख्यां पूर्णिमायां तु दधिकम्बलकं नरः ।। 28

महाकैलाससदने मदनान्तरकरप्रिये ।
भवेन्नावर्तते विप्र अस्मिन् लोके ध्रुवं नरः ।। 29

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

फाल्गुन्यामथ पोर्णम्यां मधुकम्बलदो नरः ।
शिवाय विधिवद् भक्त्या गाणपत्यं लभेन्नरः ।। 80

सङ्क्रान्तिषु शिवं पूज्य कुसुमैर्बिल्वपल्लवैः ।
क्षीरेण मधुना दध्ना सितया च घृतैरपि ।। 31

अभिषिच्य शिवं भक्त्या तूर्यमङ्गलवादितैः ।
धूपं च गुग्गुलुं दग्ध्वा ब्रह्महापि विमुच्यते ।। 32

गच्छेच्छिवपुरं रम्यं विमानैः सार्वगामिकैः ।
शिवं मकरसङ्क्रान्तौ स्नाप्य पञ्चामृतैः फलैः ।। 33

तिलाञ्जलिशतैः पूज्य सुधौतैः पाण्डरैर्नरः ।
बिल्वपत्रैः समभ्यर्च्य कृसरं तिलसंयुतम् ।। 34

साज्यं निवेद्य सगुडं कृतकृत्यो भवेन्नरः ।
हंसकुन्देन्दुसङ्काशैर्यानैर्गच्छेच्छिवाग्रतः ।। 35

षडशीतिमुखेष्वीशं पूज्य भक्त्या सकृन्नरः ।
बिल्वपत्रैः समभ्यर्च्य क्षुद्रपापैः प्रमुच्यते ।। 36

युगादिषु महादेवं सिच्य पञ्चामृतैः फलैः ।
हविर्निवेद्य देवाय सम्पूज्य कुसुमाक्षतैः ।। 37

सर्वपापैः प्रमुच्येत भक्तो मुक्तिं च विन्दति ।
मन्वादिषु विरूपाक्षं पूज्य भक्त्या सकृन्नरः ।। 38

वसेच्छिवपुरे दिव्ये सर्वभोगसमृद्धिमान् ।
व्यतीपाते च सम्पूज्य दुग्धाज्यैः बिल्वसंयुतम् ।। 39

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मार्गशीर्षे विशेषेण सफलं तस्य जीवितम् ।
अणिमादि गुणैर्युक्तः शिववद्विचरेच्छिवे ।। 40

वैधृतौ च विशेषेण सम्पूज्य शिवमेव हि ।
क्षीराज्यैर्बिल्वपत्रैश्च निवेद्य च हविर्मुने ।। 41

निशाकरकरप्रख्यैर्विमानैः सार्वगामिकैः ।
यान्त्येव सन्निधौ शम्भोः गणश्रेष्ठोऽमरेडितः ।। 42

सम्पूज्य देवं विप्रेन्द्रो यो लिङ्गमुदागायने ।
पुष्पैर्धूपैश्च बिल्वैश्च निवेद्य हविरुत्तमम् ।। 43

भोजयित्वा महाशैवानेकं वा शिवयोगिनम् ।
प्रयाति शिवसारूप्यं गाणपत्यं लभेन्नरः ।। 44

सम्पूजयन्नरो भक्त्या यो लिङ्गं दक्षिणायने ।
घृतेनैवाभिषिच्येशं बिल्वैः सम्पूज्य यत्नतः ।। 45

कृसरं यवसं सक्तुं निवेद्य शिवयोगिने ।
भोजयित्वा घृतान्नेन सर्वपापैः प्रमुच्यते ।। 46

सर्वान्कामानवाप्नोति याति चैव शिवालयम् ।
अमास्वपि च कार्तिक्यां बिल्वैः सोमान्वितास्वपि ।। 47

सम्पूज्य च घृतैः स्नाप्य लभते गतिमुत्तमाम् ।
नक्तं भक्ताशनो भक्तो मुक्तिं याति न संशयः ।। 48

दिवसे तु समभ्यर्च्य वारर्क्षतिथिषु क्रमात् ।
एकाहमपि यो भक्त्या स मुक्तः सर्वपाप्मभिः ।। 49

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

प्रातः सम्पूजयँल्लिङ्गे नैशं पापं व्यपोहति ।
सङ्गवेऽनङ्गतापोत्थं पूज्य लिङ्गं सकृन्नरः ।। 50

पापकञ्चुकमुत्सृज्य शिवलोके महीयते ।
अपराह्णे शिवं पूज्य गर्भभाङ्नैव जायते ।। 51

मध्याह्ने हयमेधस्य फलं सम्पूजको लभेत् ।
सायङ्काले शिवं पूज्य सर्वपापैः प्रमुच्यते ।। 52

निशीथे मन्मथारातिं पूज्य बिल्वैर्नपापभाक् ।
अरुणोदयवेलायां पूज्य देवं ऋणी न तु ।। 53

षट्कालं पूजयेल्लिङ्गं त्रिकालं वा द्विकालतः ।
एककालं मुने भक्त्या स रुद्रो नात्र संशयः ।। 54

प्रहरे प्रहरे नित्यं हरमेव समर्चयेत् ।
यतो नित्यं जीवितं हि नाश्वसेत्क्षणमत्र हि ।। 55

यः सप्तमी प्रदोषेषु शिवलिङ्गं समर्चयेत् ।
बिल्वपत्रैश्च कुसुमैः न तिर्यग्योनिमाप्नुयात् ।। 56

चतुर्थ्यां तु प्रदोषेषु पूजयित्वेन्दुदर्शने ।
शिवलिङ्गं बिल्वपत्रैर्न दुर्गतिमवाप्नुयात् ।। 57

स प्रदोषस्त्रिधा प्रोक्तः शिवेन परमात्मना ।
माहेश्वरस्त्रयोदश्यां सप्तम्यां च महामुने ।। 58

सारस्वतस्ततो विप्र चतुर्थ्यां च गणाधिपः ।
सर्वेष्वपि प्रदोषेषु पूज्य एव महेश्वरः ।। 59

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

माहेश्वरस्त्रयोदश्यां प्रदोषः सार्वमासिकः ।
तस्मिन्नभ्यर्चनं शम्भोरनन्तफलदं मुने ।। 60

मन्दारयुतो यः स्यात्प्रदोषो रजनीमुखे ।
तत्रापि कृष्णपक्षे च प्राप्तो दैवेन लभ्यते ।। 61

तस्मिन्प्रदोषे लिङ्गार्चा दोषाद्रिभिदुरा भवेत् ।
ग्रहणे सोमसूर्याणां स्नानदानार्चनं विभोः ।। 62

कुर्याज्जपं च मन्त्राणां तस्मिन् काले च सिद्धये ।
सूर्यग्रहे कुरुक्षेत्रे स्नानं दानं शिवार्चनम् ।। 63

प्रशस्यते मुनिश्रेष्ठ पुष्करे तु शशिग्रहे ।
यमुनागङ्गयोः सन्धौ गङ्गासागरसङ्गमे ।। 64

ओङ्कारे भृगुतुङ्गे च तथैवामरकण्टके ।
नर्मदासागरोपान्ते गोकर्णे पश्चिमाम्बुधौ ।। 65

कावेर्युदधि सङ्गे च ताम्रासागरसङ्गमे ।
धनुष्कोटौ मुनिश्रेष्ठ कन्यातीर्थनिमज्जनात् ।। 66

सूर्येन्दुग्रहणे पुण्ये स्नाने तेषु प्रशस्यते ।
विधिं च ते प्रवक्ष्यामि सूर्येन्द्वोर्ग्रहणे मुने ।। 67

नित्ये नैमित्तिके काम्ये जपहोमानुमज्जने ।
शिवार्चने च विधिवन्महादानमनन्तकम् ।। 68

कूपाच्छतगुणं वाप्यां नद्यां स्नानं ततोऽधिकम् ।
सागरेऽपि ततो विप्र नदीसङ्गे ततोऽधिकम् ।। 69

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शिवस्य सन्निधौ स्नानं ततोऽपि गुणवत्तरम् ।
अतुलः कोष्णतोयेन स्नायाद्ग्रहणयोर्द्वयोः ।। 70

वैष्णवान् स्कान्दगाणेशान् शैवाञ्छाक्तान् जपेन्मनून् ।
मन्त्रसङ्ग्रहणं कुर्याद्ग्रहणे सोमसूर्ययोः ।। 71

एकावृत्त्यापि मन्त्राणां लक्षावृत्तिफलं लभेत् ।
पितॄन् सन्तर्पयेच्छ्राद्धैर्नक्तं चापि मुनीश्वर ।। 72

सर्वं गङ्गासमं तोयं सर्वे शिवसमा द्विजाः ।
सर्वं मेरुसमं दानं ग्रहणे सोमसूर्ययोः ।। 73

मन्त्रसिद्धिकरं स्थानं नद्यां पर्वतमस्तके ।
विपिने च शिवागारे देवब्राह्मणसन्निधौ ।। 74

बिल्वमूले बिल्वपत्रैर्ग्रहणे लिङ्गमर्चयन् ।
तत्र सम्पूजयन् लभ्येत् (?) फलं तल्लक्षहायनम् ।। 75

रुद्रेण चैव गायत्र्या तथा पञ्चाक्षरेण च ।
रोगार्त आयुषो वृद्ध्यै होमयेच्च गलूचिभिः ।। 76

सहस्रं परमं श्रेष्ठं शताष्टोत्तरमेव वा ।
नदीतोयेन सम्पूर्णघटं संस्पृश्य शोभनम् ।। 77

रुद्रावृत्त्या जलैः स्नाप्य रोगैः पापैः प्रमुच्यते ।
मन्त्रान् पञ्चाक्षरं वापि गायत्रीं वेदमातरम् ।। 78

यावद्ग्रहणमोक्षं तु तावन्नद्यां समाहितः ।
जपेत्समुद्रगामिन्यां पुरश्चर्याफलं लभेत् ।। 79

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

चरे वा स्थावरे वापि तुङ्गे लिङ्गे शिवार्चकः ।
ग्रहणे सोमसूर्याणां यो महास्नानकारकः ।। 80

पञ्चामृतैः पञ्चगव्यैस्तथा फलरसैरपि ।
घृताभ्यङ्गो घृतस्नानं ग्रहणेऽतीव पुण्यदम् ।। 81

शिवस्य तोषदं विप्र गाणपत्यप्रदं परम् ।
तौर्यत्रिकं धूपदीप पुष्पगन्धानुलेपनम् ।। 82

बिल्वमालार्चनं शम्भोः पुण्यं नीराजनं विभोः ।
कुर्याद्यो ग्रहणे विप्र सर्वान्कामानवाप्नुयात् ।। 83

कश्चित्पूजयते भक्त्या कश्चित्पूजां प्रपश्यति ।
तयोः समफलं ज्ञेयं ग्रहणे लिङ्गदर्शनात् ।। 84

ब्रह्महत्यादिभिः पापैर्मुच्यते नात्र संशयः ।। 85

स्कन्द उवाच -

सङ्क्रान्तिषु श्रीशिवमर्च्य लोके
नैवाप्नुयात्क्रान्तिरुजं जनिं वा ।
पतेत्तथा नो निरयेऽधृतिं वै-
धृतीषु सम्पूज्य शिवं लभेत ।। 86

।। इति श्रीशिवरहस्ये एकादशांशे
पर्व(सूर्यसोम)ग्रहणपूजामहिमा नाम
सप्तविंशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। अष्टाविंशोऽध्यायः ।।

मुनिरुवाच -

रहस्यमन्यद्धृदये मम शम्भुतनूभव ।
व्रतेषु केषु चीर्णेषु प्रीतो भवति शङ्करः ।। 1

सहैभिर्मुनिभिश्चैव गणैः सुरगणैरपि ।
श्रवणेऽवधृतं मेऽद्य मनः शिवकथामृतम् ।। 2

सूत उवाच -

इति जैगीषवाक्येन नन्दितात्मा हरात्मजः ।
प्राह तं तारकारातिः शिवप्रीतिकरं व्रतम् ।। 3

स्कन्द उवाच -

शृणुष्व मुनिशार्दूल त्रिपुरारिप्रियं व्रतम् ।
प्रत्येकं सावधानेन गणैश्च मुनिभिः सुरैः ।। 4

कैलासे शङ्करेणैव प्रोक्तानि प्रीतिदानि तु ।
गिरिजायै विशेषेण मया तत्र श्रुतानि हि ।। 5

कैलाससौधमञ्चस्था पार्वती पृच्छतीश्वरम् ।
प्राञ्जलिर्विनयोपेता त्रिकालज्ञा त्रिलोचनम् ।। 6

पार्वत्युवाच -

देव देव महादेव त्रिकालज्ञ त्रिलोचन ।
किं तव प्रीतिकृच्छम्भो व्रतं सर्वाघनाशनम् ।। 7

पुमर्थदायकं शर्व सर्वेषां कथयस्व मे ।
तस्यास्तद्वदनाम्भोजं पीत्वा लोचनषट्पदैः ।। 8

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

प्राह देवो विरूपाक्षः प्रत्यक्षमवदद्व्रतम् ।

शिव उवाच -

शृणु पद्मपलाशाक्षि व्रतं मे प्रीतिदायकम् ।। 9

साधु साधु महाप्राज्ञे सर्वलोकोपकारकम् ।
यन्न कस्यचिदाख्यातं तदद्य कथयामि ते ।। 10

सर्वकामप्रदं दिव्यं सर्वरोगनिवारकम् ।
ब्रह्मविष्ण्वादिभिर्देवैः कृतमेतन्महाव्रतम् ।। 11

नरो वा यदि वा नारी द्विजो वाप्यद्विजोऽपि वा ।
कृत्वा व्रतमिदं पुण्यं मम लोकं स विन्दति ।। 12

सर्वेष्वपि च मासेषु प्रशस्तं सर्वकामदम् ।
गदन्ति निगमाः सर्वे शिष्टं सोमव्रतं त्विति ।। 13

सोमवारव्रतं दिव्यं द्विजानामेव केवलम् ।
नराणामथ नारीणां सौभाग्यारोग्यवर्धनम् ।। 14

श्रावणे कार्तिके वापि गृहीतनियमो व्रती ।
पूजयेन्मां महादेवि सोऽचिरान्मुक्तिभाग्भवेत् ।। 15

देव्युवाच -

कथं सोमव्रतं कार्यं को विधिः पूजनं कथम् ।
कस्मिन् काले च कर्तव्यं सर्वं विस्तरतो वद ।। 16

शिव उवाच -

श्रावणेऽस्मिन् वरे मासि त्वत्पितुर्मौलिसंस्थितम् ।
केदारेशमहालिङ्गसन्निधौ नियमाद्व्रती ।। 17

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सङ्कल्प्य वत्सरं वापि त्रीणि द्वादश वाऽम्बिके ।
सङ्क्प्य ब्राह्मणैः सार्धं व्रतमेतत्समाचरेत् ।। 18

अस्य केदारनाथस्य श्रावणे सोमवासरे ।
पूजा कार्य विशेषेण शाम्भवैर्विविधैः शुभैः ।। 19

सोमवारव्रतं कार्यं प्रयत्नेन यथाविधि ।
ब्राह्मणैरेव नियमादाजन्मान्तं महेश्वरि ।। 20

यत्नादुपोषणं कार्यमन्यथा निशि भोजनम् ।
उपवासी पूजयेन्मां रात्रौ यामचतुष्टयम् ।। 21

परेद्युर्मां समभ्यर्च्य निवेद्याशीत भावतः ।
सर्वेष्वपि च मासेषु सोमवारः प्रशस्यते ।। 22

कृष्णपक्षे विशेषेण तस्य नोद्यापनं शिवे ।
नक्तभुग्यदि भक्तः स्यात्क्षारवर्जान्नभुग्भवेत् ।। 23

यन्निवेदितमीशाय तदश्नीयाद्यथाविधि ।
मधुमांसं वर्जयीत नक्ताशी सर्वदा शिवे ।। 24

वत्सरे वत्सरान्ते वा द्वादशाब्दे त्रिहायने ।
नक्ताशनोद्यमं कुर्यादुपवासी न सञ्ज्वरेत् ।। 25

अन्येष्वपि महादेवि शिवक्षेत्रेष्वथारभेत् ।
अयुक्ते नियतं नित्यं भक्तो नक्ताशनो भवेत् ।। 26

सोमवारेषु वा देवि भूतायामष्टमीषु वा ।
पर्वस्वपि विशेषेण सोऽमास्वपि च शङ्करि ।। 27

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शाम्भवो नन्दिनं नक्तं तत्र सम्पूज्य हव्यभुक् ।
कार्तिके प्रारभेद्वापि अरुणाचलसन्निधौ ।। 28

सोमवारव्रतं देवि सङ्कल्प्यैव हि पूर्ववत् ।

ईश्वर उवाच -

अत्रेतिहासं वक्ष्यामि शृणि शैलसुतेऽनघे ।। 29

चाक्षुषस्यान्तरे देवि दक्षो मेधाय दीक्षितः ।
सर्वैः सुरासुरैर्देवि ब्रह्मविष्ण्वादिभिर्द्विजैः ।। 30

मामनादृत्य त्वां चापि यज्ञं कर्तुं प्रचक्रमे ।
सुराद्या वीरभद्रेण शिक्षिता दीक्षितोऽपि हि ।। 31

चन्द्रोऽमृतमयश्चायं निष्पिष्टः करपङ्कजैः ।
सोमो हीनामृतो गौरि *रोहिण्यामायजत्तदा ।। 32

केदारे सोमनाथाख्यं लिङ्गं संस्थाप्य पूजयन् ।
स पुनर्दक्षशापेन पीडितो मामनूनुवत् ।। 33

बलीवर्दमावर्धयन्मार्दवेन
क्रुधा त्रैपुरं निर्दहन्नर्द ते यः ।
इनाक्ष्णैव हार्दं तमोनाशयन् लोक-
जालं सशोकं पुनीते महेशः ।। 34

ततस्तुष्टोऽस्म्यहं देवि तस्य स्तुत्या च भक्तितः ।
सोमवारव्रतस्यास्य प्रभावेण गिरीन्द्रजे ।। 35

---

* रोहिण्या सह मा=मां अयजत् अयजत आराधयामास ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तेनोक्तं यदि तुष्टोऽसि तिष्ठात्रस्थो निरन्तरम् ।
यावच्चन्द्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी ।। 36

तावन्मे स्थापिते लिङ्गे उमया सह तिष्ठ भोः ।
रोहिण्याश्च पतिश्चैवं प्रार्थयित्वा च मां शिवे ।। 37

ततः शुद्धशरीरोऽसौ गगनस्थो विराजते ।
ममोत्तमाङ्गे देविशि स्थानं दत्तं विशेषतः ।। 38

देवान् प्रीणाति सद्योऽपि सोमधर्मप्रदानतः ।
प्रथमां पिबते वह्नि द्वितीयां भास्करः शिवे ।। 39

तृतीयामथ देवेन्द्रश्चतुर्थीं मरुतोऽखिलाः ।
वसवः पञ्चमीं तस्य कलां षष्ठीं तु वासवः ।। 40

आदित्याः सप्तमीं देवि रुद्रास्तस्याष्टमीं कलाम् ।
नवमीं ऋभवो देवि दशमीं यक्षगुह्यकाः ।। 41

एकादशीं शिवे साध्या द्वादशीं विष्णुरेव हि ।
ब्रह्मा त्रयोदशीं तस्य निरृतिस्तु चतुर्दशीम् ।। 42.

अमावास्यासु पितरः कलां तस्य पिबन्ति हि ।
सोमोऽमृतमयो देवि देवानां भोजनं शशी ।। 43

कलाभिः पोषयन् देवान् ओषधीनां गणं शिवे ।
सोमवल्लीषु नितरां यज्ञार्थं सोम आहितः ।। 44

सोमेनादित्यबलिनः(?)सोमेन पृथिवी मही ।
सर्वेषामथ ऋक्षाणां मध्ये वै सोम आस्थितः ।। 45

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

इत्येषा बह्वृचानां हि श्रुतिराह महेश्वरि ।
सर्वेषां जनिता सोम शक्रविष्ण्वनिलात्मनाम् ।। 46

तस्मात्तदाविष्टतया सोमवल्लीभिरेव हि ।
प्रवर्धयन्ति यज्ञांश्च सौम्या ये ब्राह्मणाः शिवे ।। 47

तस्माद्यज्ञेषु सर्वेषु अग्नीषोमः पशुः स्मृतः ।
तस्माद्व्रतमिदं देवि सोमवारं ममेष्टदम् ।। 49

ब्राह्मणैः सोमपैरेव कार्यं नक्ताशनैरिदम् ।
शिवक्षेत्रे गृहे वापि अविमुक्ते च नैत्यकम् ।। 50

श्रावणे कार्तिके मासि नक्तभोजनमाचरेत् ।
ब्राह्मणानां च यश्चायं सोमपानां विशेषतः ।। 51

बृहज्जाबालकथितो विधिरेष सनातनः ।
विधवानां वयस्स्थानां विधुराणां च वर्णिनाम् ।। 52

उपवासो यतीनां च चतुर्थ्यामेषु पूजनम् ।
प्रशस्तं मम देवेशि सोमवारेषु सर्वशः ।। 53

वर्णानामाश्रमाणां च भक्तानां नियतात्मनाम् ।
शक्तोऽप्युपोषणाद्धीनश्चिरं विष्ठासु तिष्ठति ।। 54

ये सोमवारे स्वच्छन्दं दिवा कुर्वन्ति भोजनम् ।
तान् पातयन्ति नरके क्रूरास्ते यमकिङ्कराः ।। 55

तदा प्रभृति ये केचिद्व्रतं कुर्वन्ति मानवाः ।
तेऽपि तत्पदमायान्ति विमलाङ्गाश्च सोमवत् ।। 56

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

*न वारव्रतमेतद्धि श्रुत्युक्तं विधिनाऽऽचरेत् ।
अथ किं बहुनोक्तेन विधानं तस्य कीर्तये ।। 57

स्कन्द उवाच -

एवं जगाद गिरिजां प्रति चन्द्रमौलिः
सोमव्रतस्य महिमामसमां द्विजानाम् ।
नक्ताशनो भवति शैवविशिष्टभक्तो
लिङ्गार्चनस्तवनदर्शनतोऽत्र मुक्तः ।। 58

।। इति श्रीशिवरहस्ये एकादशाम्शे
सोमवारव्रतमहिमा नाम
अष्टाविंशोऽध्यायः ।।

* तद् तस्मात् तद्वारव्रतमेतद्धि इति पाठ एव युज्यते ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। एकोनत्रिंशोऽध्यायः ।।

शिव उवाच -

यस्मिन् कस्मिंस्तु मासे च शुक्ले सोमस्य वासरे ।
शौचं विधाय नद्यां वै तस्मादुषसि सत्तमे ।। 1

स्वधर्मविहितं कर्म कृत्वा स्थाने मनोरमे ।
सुसमे भूतले रम्ये न्यसेत्कुम्भं मनोरमम् ।। 2

चूतपल्लवविन्यस्तं चन्दनेन मनोरमम् ।
श्वेतवस्त्रपरीधानः सर्वालङ्कारभूषितः ।। 3

आदौ पात्रं च विन्यस्य आधारसहितं शिवे ।
अष्टौ विघ्नेश्वरान् देवान् सोमनाथं सशक्तिकम् ।। 4

वाससा सहितं तत्र श्वेतपुष्पैः प्रपूजयेत् ।
लिङ्गं तुङ्गं च विन्यस्य पञ्चगव्येन सेचयेत् ।। 5

शिवे फलरसैश्चैव गन्धपुष्पाम्बुसेचनैः ।
गन्धाक्षतादिभिः पुण्यरुद्रस्याऽऽवृत्तितोऽम्बिके ।। 6

विविधैर्भक्ष्य भोज्यैश्च फलैर्नैवेद्यमाचरेत् ।
धूपदीपादिकं दत्वा नीराजनपुरः सरम् ।। 7

कामाङ्गाखिलदाहकाय भगवन् होम प्रियायादरात् ।
वामार्धाकृतये समाय जगतां प्त्रे नमःशम्भवे ।। 8

स्तुवीतैवं महादेवं सोमवारेषु पूजकः ।
उपोष्य वा नक्तभुग्वा भवेद्भक्तो दृढव्रतः ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

एवं कृते तु प्रथमे सोमवारे गदोज्झितः ।
आरोग्यमतुलं प्राप्य शिवलोके महीयते ।। 10

द्वितीये सोमवारे तु करञ्जं दन्तधावनम् ।
देवं सम्पूजयेद्रात्रौ गन्धपुष्पैर्मनोरमैः ।। 11

शतपत्रैर्बिल्वपत्रैर्नक्ताशी मुक्तिभाग्भवेत् ।
स गोलक्षफलं प्राप्य शिवलोके महीयते ।। 12

तृतीये सोमवारे तु वटजं दन्तधावनम् ।
सायङ्काले बिल्वपत्रैर्जाजीभिः पूजयेच्छिवम् ।। 13

नैवेद्यं दापयेदन्नं तदश्नीयाद्यथाविधि ।
एवं कृते तृतीये तु कन्यादानायुतं फलम् ।। 14

चतुर्थे सोमवारे तु अपामार्गसमुद्भवम् ।
रुद्रेण पूजयेद्रात्रौ बिल्वैर्मल्लीसुमैः शिवम् ।। 15

स्वाद्वन्नं शर्करां क्षीरां निवेद्याश्नीत सद्द्विजैः ।
यज्ञायुतफलं प्राप्य शिवलोके महीयते ।। 16

पञ्चमे सोमवारे तु अश्वत्थं दन्तधावनम् ।
शिवं सम्पूजयेद्रात्रौ बिल्वैः पद्मैर्महेश्वरि ।। 17

दधिभक्तं शिवेभक्तो यो दत्वा ब्रह्महापि च ।
सोमवारे तु षष्ठे वै दन्तधावनमार्जनम् ।। 18

शिवं सम्पूजयेद्रात्रौ मन्दारैर्बिल्वपल्लवैः ।
नैवेद्यं च शिवे दद्यात् फलपायसमण्डकम् ।। 19

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

समुद्वाहायुतफलं प्राप्य मल्लोकमाव्रजेत् ।
सप्तमे सोमवारे तु प्लक्षजं दन्तधावनम् ।। 20

श्रीकण्ठं पूजयेत्सायं श्रीपत्रैः करवीरकैः ।
विविधैर्भक्ष्यभोज्यैश्च नारिकेलफलैरपि ।। 21

नैवेद्यं च ततो दत्वा दीपधूपपुरः सरम् ।
सप्तसागरदानस्य फलं लब्ध्वा गणो भवेत् ।। 22

अष्टमे सोमवारे तु अष्टमूर्तिं यजेच्छिवम् ।
पञ्चामृतैः फलरसैर्गन्धपुष्पकुशाम्बुभिः ।। 23

सुगन्धिपुष्पैर्बिल्वैश्च यक्षकर्दमलेपनैः ।
मध्वन्नं पायसापूपं कदलीफलसंयुतम् ।। 24

निवेद्याश्नीत तद्रात्रौ भवभक्तो जितेन्द्रियः ।
गजानां च शते दत्ते लक्षे च रथवाजिनाम् ।। 25

सूर्यग्रहे कुरुक्षेत्रे यत्पुण्यं स्यान्महेश्वरि ।
तत्पुण्यं कोटिगुणितं सोमवारार्चको लभेत् ।। 26

नवमे सोमवारे तु कुटजं दन्तधावनम् ।
बिल्वपुन्नागकादम्बैः पूजयेन्मां महेश्वरम् ।। 27

सायं घृतान्नं नैवेद्यं धूपदीपमनोहरम् ।
पौण्डरीकायुतफलं प्राप्य विष्णुक्षये *वसेत् ।। 28

---

* गृहे - लोके इत्यर्थे ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तेनोदितं शिवज्ञानं लब्ध्वा मल्लोकमाव्रजेत् ।
दशमे सोमवारे तु बिल्वजं दन्तधावनम् ।। 29

महादेवं बिल्वपत्रैर्यजेन्नीलोत्पलैः शिवे ।
नैवेद्यं वटकापूपं स्वाद्वन्नं विनिवेदयेत् ।। 30

वाजपेयायुतं प्राप्य ब्रह्मलोके महीयते ।
ब्रह्मणा पूजितस्तत्र ज्ञानं लभ्ध्वा तदन्तिके ।। 31

तेनैव मुच्यते देवि सोऽपि मय्येव लीयते ।
एकादशे सोमवारे काष्ठमौदुम्बरं भवेत् ।। 32

पार्वतीशं दूर्वयार्च्य बिल्वैश्चैवाथ पङ्कजैः ।
कृसरं भक्ष्य भोज्यादि निवेद्याश्नीत शाम्भवैः ।। 33

राजसूयादि दशकं प्राप्य मल्लोकमावसेत् ।
द्वादशे सोमवारे तु शिग्रुजं दन्तधावनम् ।। 34

शिग्रुपुष्पैरुग्रपूजां कुर्यात्सायं तु बिल्वकैः ।
मुद्गान्नं सघृतं भक्ष्यं निवेद्याश्नीत शाम्भवैः ।। 35

द्वादशाहफलं प्राप्य शिवलोके महीयते ।
मासार्धसङ्ख्यं वा कुर्यात्सोमवारव्रतं शिवे ।। 36

नक्ताशनो भवेद्वर्षं त्रिवर्षं द्वादशाष्टकम् ।
शिवक्षेत्रेषु पुण्येषु अविमुक्ते च नैत्यकम् ।। 37

कुर्यादुद्यापनं चान्ते पुनः पुनरथारभेत् ।
आजन्मग्रहणे देवि नैवोद्यापनमाचरेत् ।। 38

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पार्वत्युवाच -

कीदृशं तद्व्रतं देव विधानं तस्य कीदृशम् ।
कथं कार्यं कथं ग्राह्यं किं दानं कथमर्चना ।। 39

उद्यापनविधानं च विस्तरेण वदस्व मे ।

महादेव उवाच -

माघे मास्यष्टमी शुक्ला शिवेन्दुदिनसंयुता* ।। 40

तदा ग्राह्यं व्रतमिदमनेन विधिना शुभम् ।
प्रातः शुक्लतिलैः स्नायादाचार्यसहितो व्रती ।। 41

पूर्वाह्णे विधिवत्कुर्यादुमाशङ्करपूजकम् (नम्) ।
ततः पुष्पाञ्जलिं दत्वा प्रणम्य च पुनः पुनः ।। 42

विधिनानेन गृह्णीयाद्व्रतं सङ्कल्प पूर्वकम् ।
गृह्णामिभवरोगार्तः सोमवारव्रतौषधम् ।। 43

व्रतेनानेन सुप्रीतौ भवेतां पार्वतीश्वरौ ।
विसर्जनं ततः कुर्यादाचार्यं वरयेत्ततः ।। 44

अहः शेषं ततो नीत्वा पुराणश्रवणादिभिः ।
शयानो दर्भकूर्चेषु अभुक्तब्रह्मचर्यवान् ।। 45

अनेन विधिना देवि मद्दिने वासरे शुभे ।
व्रती कुर्वन्नवाप्नोति मद्भावं नात्र संशयः ।। 46

तस्मिन् दिने कृतं किञ्चित् होमं दानं शिवार्चनम् ।
व्रतं वानन्तफलदं उमया सहितस्य मे ।। 47

---

*शिवे + इन्दुदिन संयुता इति वक्तव्ये एवं उक्तम् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अतः सोमाख्यया वारः प्रशस्तोऽयं मम प्रियः ।
एवं समाष्टकं कुर्याच्छुक्लपक्षे विशेषतः ।। 48

शिवर्क्षतिथियोगानामेकैकेनापि संयुते ।
सोमवारे विधातव्यं चन्द्रताराबलान्विते ।। 49

विधाय रदनोल्लेखं प्रातः स्नायाद्विधानतः ।
आचार्यं वरयेदेकं शिवभक्तं जितेन्द्रियम् ।। 50

पुराणस्मृतिशास्त्रज्ञं निगमागमवेदिनम् ।
उपोष्य सोमवारे च सायं सन्ध्यामुपास्य च ।।

शिवालये नदीतीरे शुचौ देशे गृहे वने ।
अष्टाङ्गुलोच्छ्रितां वेदीं ततस्तद्द्वयविस्तृताम् ।। 52

तस्यां षोडशपात्रं च तण्डुलैः परिपूरितम् ।
पुष्पमण्टपिकां कुर्यात् पताकाद्यैरलङ्कृताम् ।। 53

वितानैर्विविधैश्चित्रैः फलराजिविराजिताम् ।
एवं प्रकल्पयेद्वेदिं चतुरस्रां समां तथा ।। 54

आचार्येण समं कुर्यान्मदाराधनमुत्तमम् ।
पद्ममध्येन वीतं च धातुजं स्थापयेद्घटम् ।। 55

वाससा संवृतं देवि फलपल्लववक्त्रकम् ।
*समन्तात्कुम्भकैरष्टैः पल्लवाम्बुप्रपूरितैः ।। 56

---

* समन्तादष्टकुम्भैश्चेति वक्तव्ये दुरन्वेयपदयोगः
अष्टैरित्यसाधुशब्दयोगश्च अत्रेवान्यत्र बहुत्र दृश्यते ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

गणेशं मातृकां चैव दुर्गां क्षेत्रपतिं हरिम् ।
ब्रह्माणमथ सावित्रीमिन्द्रमैरावतस्थितम् ।। 57

पञ्चामृतोदकैः स्नाप्य गन्धपुष्पाक्षतैर्जलैः ।
गृहीतैर्मध्यमे कुम्भे ध्यायन्मद्रूपमीश्वरि ।। 58

साम्बं चन्द्रकलाजूटं त्र्यम्बकं नीलकन्धरम् ।
वरदाभयहस्तं च गन्धपुष्पाधिकोज्ज्वलम् ।। 59

गौर्या च स्कन्दगणपनन्दिभृङ्गीशसेवितम् ।
ध्यात्वाऽऽवाह्याथ सम्पूज्य शुद्धपञ्चाक्षरेण हि ।। 60

तत्तद्देवादिमन्त्रैश्च पूर्वादिषु दलेष्वपि ।
मूर्तयोऽष्टौ मदीयाश्च पूजनीयाः क्रमेण च ।। 61

अनन्ताय नमः सूक्ष्मशिवायाथ त्रिमूर्तये ।
श्रीकण्ठाय शिखण्डाय चन्द्रचूडाय शूलिने ।। 62

पूर्वादिक्रमयोगेन तनूः सम्पूजयेन्मम ।
तद्बहिर्लोकपालांश्च पूजयेन्मूलमन्त्रतः ।। 63

विष्टराद्युपचारैश्च गन्धपुष्पाक्षतैर्यजेत् ।
बिल्वपत्राक्षतैः पुष्पैर्धूपैदीपैः समर्चयेत् ।। 64

मनोरमा विधाव्या पूजा वित्तानुसारतः ।
ततो वेद्यामधोभूमौ सर्वतोभद्रमण्डले ।। 65

ब्रह्माद्या देवताः सर्वाः क्रमेणैव समर्चयेत् ।
नैवेद्यानि सुपुष्टानि ताम्बूलानि च कल्पयेत् ।। 66

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

रात्रौ जागरणं कुर्याद्गीतमङ्गलवादनैः ।
पुराणैरितिहासैश्च रात्रिशेषं नयेद्व्रती ।। 67

अपरेद्युः कृतस्नानः प्रातः सन्ध्यामुपास्य च ।
पुनर्वेद्यां शिवं देवान् पूजयेदुपचारकैः ।। 68

हवनार्थे विधातव्यं कुण्डं वा स्थण्डिलं शिवे ।
स्वगृह्योक्तेन विधिना उपलेपनपूर्वकम् ।। 69

अनाज्ञाताहुतीर्हुत्वा महाव्याहृतिभिस्तथा ।
होतव्याः सघृताश्चैव पायसादितिलैः सह ।। 70

त्वं सोनासीति मन्त्रेण हुनेदष्टाहुतीः शतम् ।
ततः स्विष्टकृतं हुत्वा होमशेषं समापयेत् ।। 71

ततो होमावसाने च गामेकां धवलां शुभाम् ।
पयस्विनीमरोगां च सवत्सां कांस्यदोहनाम् ।। 72

दद्याद्व्रतसमृध्यर्थमाचार्याय सदक्षिणाम् ।
वस्त्रैराभरणैरन्यैराचार्यं परितोषयेत् ।। 73

ततः षोडशसङ्ख्याकान् ब्राह्मणान्भोजयेदथ ।
तान् भक्त्या पूजयेद्विप्रान् शाम्भवान्नामभिःक्रमात् ।। 74

सोमेश्वरस्तथेशानःशङ्करो गिरिजाधवः ।
महेशः सर्वभूतेशः शङ्करस्त्रिपुरान्तकः ।। 75

शिवः पशुपतिः शम्भुस्त्र्यम्बकश्चन्द्रशेखरः ।
गङ्गाधरो महादेवो वामदेव इति क्रमात् ।। 76

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

उपचारान्समर्प्याथ दद्यात्कुम्भान् सदक्षिणान् ।
वस्त्रैराभरणैश्चैव दम्पती पूजयेदथ ।। 77

तथैव पूजयेदन्यान् अनाथांश्चैव तोषयेत् ।
व्रतं ममास्तु सम्पूर्णं इत्युक्त्वा तान् क्षमापयेत् ।। 78

विसृज्य ब्राह्मणान्त्सर्वान् शिष्टैरन्यैः समन्वितः ।
भञ्जीयाद्धुतशेषं तत् आचार्यसहितो व्रती ।। 79

एवं कृते महापुण्ये व्रतस्योद्यापने शुभे ।
नारी वा पुरुषो वापि महेशस्य पदं लभेत् ।। 80

अपुत्रो लभते पुत्रान्निर्धनो धनमाप्नुयात् ।
पृथिव्यां यानि तीर्थानि व्रतान्यन्यानि यानि च ।। 81

सोमवारव्रतस्यास्य कलां नार्हन्ति षोडशीम् ।

ईश्वर उवाच -

भवानीशे प्रातः कमलमुखि मातस्त्रिजगतां
जगन्मोहाद्भ्रान्तं मम भजनवैधुर्यवशतः ।
कुतः सौख्यं लोके लभति च फलं प्रेत्य सुखदं
न जानेऽप्याजानैः सुरवरनरैः सेवितपदे ।।

।। इति श्रीशिवरहस्ये एकादशाम्शे शिवगौरीसंवादे
सोमवारव्रतोद्यापनंनाम एकोनत्रिंशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। त्रिंशोऽध्यायः ।।

देव्युवाच -

पुनरन्यद्व्रतं किं ते प्रियं शङ्कर मे वद ।
येन चीर्णेन जगतां मुक्तिः सा धारिणी भवेत् ।। 1

ईश्वर उवाच -

प्रदोषो मे प्रियकरस्त्रयोदश्यां महेश्वरि ।
सर्वमासेषु सर्वेषां भुक्तिमुक्तिप्रदो मम ।। 2

किम्पुनर्मन्दवारेण संयुतः कृष्णपक्षगः ।
तत्रोपवासः पूजा च सायं मुक्तिप्रदा मम ।। 3

तद्विधानं तव शिवे वदाम्यद्य विशेषतः ।
शृणु त्वं सावधानेन चेतसा जगदीश्वरि ।। 4

पक्षद्वये त्रयोदश्यां निराहारो भवेच्छिवे
प्रदोषव्यापि सायं यद्घटिकात्रयभाग्यदि ।। 5

तत्र मे पूजनं शस्तं हिमाद्रीशवरात्मजे ।
नद्यां वा देवखाते वा स्नानं तत्र समाचरेत् ।। 6

शुक्लाम्बरधरो भूत्वा वाग्यतो नियमान्वितः ।
भस्मत्रिपुण्ड्ररुद्राक्षपरिमण्डितविग्रहः ।। 7

कृतसन्ध्याजपविधिः शिवपूजां समाचरेत् ।
देवस्य पुरतः सम्यगुपलिप्य नवाम्भसा ।। 8

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

विधाय मण्डपं दिव्यं पुष्पमालाविराजितम् ।
वितानाद्यैरलङ्कृत्य फलपुष्पनवाङ्कुरैः ।। 9

विचित्रपद्‌ममालाख्यपञ्चवर्णकसंयुतम् ।
तत्र पीठे चतुष्पादे स्वास्तृते स्थापयेच्छिवम् ।। 10

तत्रोपविश्य सुशुभे चासने व्यग्रमानसः ।
पाद्यार्घ्याचमनादीनि सुपुष्पाणि च विन्यसेत् ।। 11

सम्यक्सम्पादिताशेषपूजोपकरणः शुचिः ।
आगमोक्तेन विधिना पीठमामन्त्रयेत्सुधीः ।। 12

ततः कृत्वात्म शुद्धिं च भूतशुद्धिमनुक्रमात् ।
प्राणायामत्रयं कुर्यात् बीजवर्णैसबिन्दुकैः ।। 13

मातृकां न्यस्य विधिना ध्यात्वा देवं परं शिवम् ।
वामभागे गुरुं नत्वा दक्षिणे गणपं यजेत् ।। 14

अंसोरुयुग्मे धर्मादीन् न्यसेन्नाभौ च पार्श्वयोः ।
अधर्मादीनन्तादीन् हृदि पीठे च विन्यसेत् ।। 15

आधारशक्तिमारभ्य ज्ञानात्मानमनुक्रमात् ।
उक्तमन्त्रेण विन्यस्य हृत्पद्‌मे साधुभाविते ।। 16

नवशक्तिमये रम्ये ध्यायेद्देवमुमापतिम् ।
चन्द्रकोटिप्रतीकाशसोमचूडविलोचनम् ।। 17

आपिङ्गलजटाजूट रत्नमौलिविराजितम् ।
नीलग्रीवमुदाराङ्गं नागहारोपशोभितम् ।। 18

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

वरदाभयहस्तं च हरिणं च परश्वधम् ।
दधानं नागवलयं केयूराङ्गदमुद्रिकम् ।। 19

व्याघ्रचर्मपरीधानं रत्नसिह्मासनस्थितम्
ध्यात्वा मद्वामभागे त्वां चिन्तयेद्गिरिकन्यकाम् ।
भास्वज्जपाप्रसूनाभामुद्यदर्यमसप्रभाम्
विद्युत्पुञ्जनिभां तन्वीमार्यां नयननन्दिनीम् ।। 21

बालेन्दुशेखरस्निग्धनीलकुञ्चितकुन्तलाम् ।
भृङ्गसङ्घातरुचिरनीलालकविराजिताम् ।। 22

मणिकुण्डलविद्योतिमुखमण्डलविभ्रमाम् ।
नवकुङ्कुमपङ्काढ्य फालादर्शसुशोभिताम् ।। 23

मधुरस्मितविभ्राजदरुणाधरपल्लवाम् ।
कम्बुकण्ठीं शिवामुद्यत्कुचपङ्कजकुड्मलाम् ।। 24

पाशाङ्कुशाभयवरैर्विलसत्करपल्लवाम् ।
अनेकरत्न विलसत्कङ्कणाङ्गदमुद्रिकाम् ।। 25

त्रिवलीविलसन्मध्यां रत्नकाञ्चीगुणान्विताम् ।
रत्नामालावरधरां दिव्यचन्दनचर्चिताम् ।। 26

दिक्पालवनितामौलिसन्नताङ्घ्रिसरोरुहाम् ।
रत्नसिह्मासनारूढां मन्दस्मितमुखाम्बुजाम् ।। 27

एवं ध्यात्वा महादेवं मां देवि त्वां मनोरमाम् ।
न्यासक्रमेण सम्पूज्य देवं गन्धादिभिः क्रमात् ।। 28

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पञ्चभिर्ब्रह्मभिः कुर्यात्प्रान्तस्थानेषु वा हृदि ।
पृथक्पुष्पाञ्जलिं देहे मूलेन च हृदि त्रिधा ।। 29

पुनः स्वयं शिवो भूत्वा मूलमन्त्रेण साधकः ।
ततः सम्पूजयेद्देवं बाह्यपीठे पुनः क्रमात् ।। 30

सङ्कल्प्य प्रवदेत्तत्र पूजारम्भे समाहितः ।
कृताञ्जलिपुटो भूत्वा प्रार्थयेदिन्दुशेखरम् ।। 31

ऋणपातकदौर्भाग्यदारिद्र्यविनिवृत्तये ।
अशेषाघविनाशाय प्रसीद मम शङ्कर ।। 32

दुःखशोकाग्निसन्तप्तसंसारभयपीडितम् ।
बहुरोगाकुलं दीनं पाहि मां वृषवाहन ।। 33

आगच्छ देव देवेश महादेवाभयङ्कर ।
गृहाण सह पार्वत्या तव पूजां मया कृताम् ।। 34

इति सङ्कल्प्य विधिवत् बाह्यपूजां समाचरेत् ।
गुरुं गणपतिं चैव यजेत् सव्यापसव्ययोः ।। 35

क्षेत्रेशमीशकोणे च वह्नौ कात्यायनीं यजेत् ।
धर्मं ज्ञानं च वैराग्यमैश्वर्यं च नमोऽन्तकैः ।। 36

सर्वानग्न्यादिकोणेषु पादपीठेष्वनुक्रमात् ।
आभ्यां च बिन्दुवर्गाभ्यामदधर्मादीन् सुपूजयेत् ।। 37

मातृपूजां चतुर्दिक्षु मध्येऽनन्तं सतारकम् ।
सत्वादित्रिगुणांस्तन्तुरूपान्पीठेषु विन्यसेत् ।। 38

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अध ऊर्ध्वछदे मायां विद्यां लक्ष्मीं शिवेन च ।
तदन्ते चाम्बुजं भूयः सकलं मण्डलत्रयम् ।। 39

पत्र केसरकिञ्जल्कव्याप्यं ताराक्षरैः क्रमात् ।
पद्मत्रयं समभ्यर्च्य मध्ये मण्डलमादरात् ।। 40

वामां ज्येष्ठां च रौद्रीं च वामाद्यैर्दिक्षु पूजयेत् ।
वामाद्या नवशक्तीश्च नवाक्षरयुता यजेत् ।। 41

हृदि बीजत्रयाद्येन पीठमन्त्रेण चार्चयेत् ।
आवृतिप्रथमाङ्गैस्तु पञ्चभिर्मूर्तिशक्तिभिः ।। 42

त्रिंशद्भिश्चान्य विधिवद् द्वय .... समन्विते (?)
अनन्ताद्यापरावद्यो(?) मातृभिश्च वृषादिभिः ।। 43

सिद्धिभिश्चाणिमाद्याभिरिन्द्राद्याश्च शिवे सुरैः ।
वृषभं क्षेत्रचण्डेशौ दुर्गां च स्कन्द नन्दिनौ।। 44

गणेशः क्षेत्रपश्चैव स्वस्व लक्षणलक्षिताः ।
अणिमा महिमा चैव गरिमा लधिमा तथा ।। 45

ईशित्वं च वशित्वं च प्राप्तिः प्राकाम्यमेव च ।
अष्टैश्वर्याणि चोक्तानि तेजोरूपाणि केवलम् ।। 46

पञ्चभिर्ब्रह्मभिः पूर्वं हृल्लेखाद्याभिरर्च्य तु ।
अङ्गैरुमाद्यैरिन्द्राद्यैः पूजोक्ता मनुभिः शिवे ।। 47

उमां चण्डेश्वरादींश्च पूजयेदुत्तरादितः ।
एवमावरणोपेतं तेजोरूपं सदाशिवम् ।। 48

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

उमया सहितं देवमुपचारैः समाहितः ।
कल्पयेद्विविधैर्मन्त्रैरासनाद्युपचारकान् ।। 49

आसनं कल्पयेद्धैमं स्वागतं विहिताञ्जलिः ।
अर्घ्यमष्टगुणोपेतं पाद्यं शुद्धोदकेन तु ।। 50

तेनैवाचमनं दद्यान्मधुपर्कं मधूत्तरम् ।
पुनराचमनं दत्वा स्नानं मन्त्रैः प्रकल्पयेत् ।। 51

उपवीतं तथा वासो भूषणानि निवेदयेत् ।
गन्धमष्टाङ्गसंयुक्तं भस्मना विनिवेदयेत् ।। 52

ततस्तिलाक्षतैर्युक्ता धौता धवलतण्डुलाः ।
पुष्पाणि बिल्वमन्दारकल्हारसरसीरुहम् ।। 53

धुत्तूरं कर्णिकारं च द्रोणार्ककुशमल्लिकाम् ।
तुलसीमाधवीचम्पाकाशापामार्गदूर्वकाः ।। 54

बृहतीकुटजादीनि यथालब्धानि पूजयेत् ।
निवेदयेत्सुगन्धीनि माल्यानि विविधानि च ।। 55

धूपं कालागरुं देवि दीपं च घृतसंयुतम् ।
अथ पायसनैवेद्यं सघृतं सोपदंशकम् ।। 56

मोदकापूपसंयुक्तं शर्कराघृतपाचितम् ।
मधुनाक्तं दधियुतं जलताम्बूलसंयुतम् ।। 57

पायसेनैव हविषा जुहुयाज्जातवेदसि ।
प्रतिष्ठाप्य हुताशं च भवाद्यैरष्टनामभिः ।। 58

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ततः स्विष्टकृदन्ते हि नीराजनमथाचरेत् ।
छत्रं च चामरं दिव्यं दर्पणं व्यजनं तथा ।। 59

तौर्यत्रिकं नृत्तगीतं दद्याद्भक्त्याऽथ शम्भवे ।
समर्चयित्वा विधिवद् मन्त्रैर्वैदिकतान्त्रिकैः ।। 60

यद्यशक्तः स्वयं निःस्वो यथाविभवमर्चयेत् ।
भक्त्या पुष्पेण दत्तेन प्रदोषे तृप्यते शिवः ।। 61

अथाङ्गभूतान्त्सकलान्गणेशादीन्प्रपूजयेत् ।
ऋक्सामयजुराथर्वस्तुतिभिः पूजयेत्स माम् ।। 62

प्रदक्षिणानमस्कारैर्नर्तनैश्च प्रसादयेत् ।
स्तुवीतैवं विरूपाक्षं प्रदोषेषु महेश्वरि ।। 63

जय जय विश्वविधान दक्षशिक्ष
जय जय सर्वसुराधिनाथ शम्भो ।
जय जय चारुशशाङ्कफालमौले
जय जय कालकलाविहीनदेह ।। 64

जय जय कालकलाविहीनदेह
जय जय कालमहान्धकासुरारे ।
जय जय सामगणादिगण्यमूर्ते
जय जय पुण्यफलप्रदोरुविश्वमूर्ते ।। 65

जय जय सोम दिनेश वह्निदृष्टे
जय जय नीलगल प्रसीद शम्भो ।
जय जय दुरितान्धकासुरारे
जय जय विष्णुहराजमृग्यमूर्ते ।। 66

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

जय जय जह्नुसुतोरुशोभिमौले
जय जय गरनीलचारुकण्ठ शूलिन् ।
जय जय पङ्कजासनाच्युतेड्य
जय जय पातकततिप्रणाशहेतो ।। 67

जय जय कामितसर्वदस्त्वमीश
जय जय विश्वपते प्रसीद मह्यम् ।
जय जय सामज चर्मवस्त्र शम्भो
अनृणं मां कुरु देवमानुषादिमार्गे ।। 68

आढ्यो वाथ दरिद्रो वा स्तुवीतैवं महेश्वरम् ।
तस्य यच्चिन्तितं काम्यं प्रयच्छति महेश्वरः ।। 69

न तस्य पातकभयं न दारिद्र्यगदाद्भयम् ।
भिषक्पतिपदाब्जं यः प्रपन्नो याति सद्गतिम् ।। 70

एवमाराधयेद्देवं प्रदोषे लिङ्गरूपिणम् ।
ब्राह्मणाञ्छाम्भवांश्चैव भोजयेद् द्वादशावरान् ।। 71

दक्षिणाभिश्च ताम्बूलैर्गन्धपुष्पाक्षतादिभिः ।
शिवपूजेयमाख्याता सर्वाभीष्टफलप्रदा ।। 72

सर्वपापक्षयकरी ऋणदारिद्र्यनाशिनी ।। 73

कैलासे त्रिजगज्जनित्रि सुमहानृत्तादरस्तेऽग्रतो
भ्राजत्पन्नगमौलिरत्नसुमहामालालसत्कन्धरः ।
नन्दिस्कन्दगणेश्वरोद्गतमहातौर्यत्रिकाणां स्वनैः।
कैलासेश्वरपूजयित्रि भुवनं विस्मापयन्नास्थितः ।। 74

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

प्रदोषेषु शेषाहिभूषाविशेषं
विषं धारयन्तं विरूपाक्षमीशम् ।
सदोषाकराकारयोषार्धगात्रं
सम्पूजयन्तो मुदा भस्मभूषाः ।। 75

प्रदोषपूजारहिताः प्रदोषाः
दुष्पूजनात्तजनुषो वरमानुषास्ते ।
विद्रावका भुवि भवन्ति हि सौख्यनिद्रा-
मुद्रावितन्द्रितमनस्तनवो दरिद्राः ।। 76

।। इति श्रीशिवरहस्ये एकादशाम्शे शिवगौरीसंवादे
त्रयोदशी प्रदोष पूजाकथनं नाम
त्रिंशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। एकत्रिंशोऽध्यायः ।।

श्रीमहादेव उवाच -

त्रयोदशी प्रदोषेभ्यो मन्दवारेण संयुतः ।
प्रदोषो मे महाप्रीतिदायकः शङ्करि प्रियो ।। 1

शनिप्रदोषे सम्प्राप्ते शुक्ले कृष्णेऽथवा शिवे ।
पक्षद्वये त्रयोदश्यां निराहारो भवेदथ ।। 2

ब्रह्मचारी गृही भिक्षुर्वनी नारी नरोऽपि ।
नित्यं नैमित्तिकं काम्यमिति त्रेधाऽस्य संस्थितिः ।। 3

यो यथा कामयेद्वापि द्वादशाब्दं समाचरेत् ।
उद्यापनं चास्य शिवे सोमवारसमो विधिः ।। 4

कालो हि माघमासोऽस्य श्रावणो वा महेश्वरि ।
शनिप्रदोषयोगेन यदा सम्पद्यते तदा ।। 5

कुर्यादुद्यापनं चास्य आजन्मा नैवमाचरेत् ।
विधिमस्य प्रवक्ष्यामि पूजायाः शृणु शैलजे ।। 6

नद्यादौ च नरः स्नात्वा शुक्लवासा जितेन्द्रियः ।
प्रक्षाल्य पादावाचम्य यतवाक् शुद्धमानसः ।। 7

अग्निरित्यादिभिर्मन्त्रैर्भस्मनोद्धूल्य विग्रहम् ।
त्रियायुषत्रिपुण्ड्राङ्कः रुद्राक्षाभरणोज्जवलः ।। 8

घटीत्रयावशेषेण नित्यकर्म समाप्य च ।
लिङ्गस्य पार्श्वमागत्य कुर्यात्सङ्कल्पपूर्वकम् ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सम्पाद्य पूजासम्भारं कालं लब्ध्वाथ तं शिवे ।
त्रयोदश्यां दिवा स्थित्वा निराहारो महेश्वर ! ।। 10

नक्तं भोक्ष्यामि देवेश त्राहि मां कृपया हर ।
सर्वपापक्षयकरः ऋणदारिद्र्यनाशकः ।। 11

दुर्लभः शनिवारेण युक्तो मुक्तिप्रदो नृणाम् ।
प्रदोषो दुर्लभतरस्तत्र पूजापि दुर्लभा ।। 12

देव्युवाच

भगवन् केन विधिना समभ्यर्च्य महेश्वरम् ।
प्रदोषे चास्तदोषे ते शनियुक्ते शिवार्चकैः ।। 13

सर्वपापविनिर्मुक्तः सर्वान्कामान्वाप्नुयात् ।

शिव उवाच -

सायं सन्ध्याप्रदोषे तु त्रयोदश्यां शनेर्दिने ।। 14

अब्दश्चेच्छुक्लकृष्णे वा शिवं दृष्ट्वा महाफलम् ।
स्थावरे जङ्गमे वापि लिङ्गे तुङ्गे महेश्वरि ।। 15

उदये द्वादशी किञ्चित्प्रदोषेऽथ त्रयोदशी ।
शिवार्चननेन यत्पुण्यं तत्पुण्यं नान्यधर्मतः । 16

देववादैस्तथान्यैर्वा योगैर्वा किं तपस्यया ।
शनिप्रदोषे लिङ्गार्चा एकबिल्वप्रपूजना ।। 17

शनिप्रदोषं सम्प्राप्य प्रातः कृत्यं समाप्य च ।
स्नात्वा नद्यां तटाके वा धौतवासा जितेन्द्रियः ।। 18

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

उपास्य पश्चिमां सन्ध्यां भस्मरुद्राक्षभूषणः ।
शिवागारं प्रविश्याथ वितानसमलङ्कृतम् ।। 19

पुष्पमालाऽऽवृतं चारु तौर्यत्रिकविनादितम् ।
उपविश्यासने शुभ्रे प्राणानायम्य वाग्यतः ।। 20

भूतशुद्धिं ततः कृत्वा मातृकाक्षरपूर्वकम् ।
मन्त्रन्यासं ततः कृत्वा शिवपीठं समर्चयेत् ।। 21

आधारशक्तिपूजां च कुर्यादागममन्त्रतः ।
उमामहेश्वरं लिङ्गे स्थाप्य पीठे मनोरमे ।। 22

पञ्चब्रह्मविधानेन देवं ध्यायेद्विचक्षणः ।
मूलमन्त्रात्मकं देवमम्बिकासहितं शिवम् ।। 23

ध्यात्वा चावाहयेद्देवं पद्मस्थं पद्मसन्निभम् ।
चतुर्भुजं प्रसन्नास्यं वरदाभयपाणिकम् ।। 24

अक्षमालावृतकरं चन्द्ररेखाविभूषितम् ।
नीलकण्ठं त्रिणनेत्रं मां त्वां च मद्वामपार्श्वगाम् ।। 25

सोमधामाननां चारुचञ्चच्चन्द्रकलाधराम् ।
प्रसन्नास्यां च सुदतीं ताटङ्कपरिमण्डिताम् ।। 26

सर्वाभरणशोभाढ्यां वासस्स्रग्गन्धभूषिताम् ।
एवं ध्यात्वार्चयेद्देवं श्रद्धया परमेश्वरम् ।। 27

अत्रागच्छ महादेव पार्वत्या सह शङ्कर ।
गृहाण मत्कृतां पूजां आसनं परमेश्वरि ।। 28

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

भवायेति शिवे पाद्यं वामायेति तथाचमम् ।
अर्घ्यं सद्येति मन्त्रेण सपुष्पं विनिवेदयेत् ।। 29

अघोरेण शिवे स्नानं वस्त्रं तत्पुरुषेण च ।
ईशानेति च मन्त्रेण उपवीतं प्रकल्पयेत् ।। 30

यज्ञोपवीतमन्त्रेण दद्यादुत्तरवाससम् ।
गन्धमाल्याक्षतान् दद्यान्नमः सोमाय मन्त्रतः ।। 31

त्रियम्बकेति मन्त्रेण बिल्वपत्राणि चार्पयेत् ।
इमा रुद्रेति मन्त्रेण अक्षतांश्च समर्पयेत् ।। 32

मानस्तोकेन धूपं च मानो मन्त्रेण दीपकम् ।
यच्छं च योश्च मन्त्रेण नैवेद्यं दापयेच्छिवे ।। 33

परिणेति परीवारान् पूजयेत यतव्रतः ।
ब्रह्माणं भास्करं विष्णुं जयं विजयमेव च ।। 34

दुर्गां गणपतिं चैव यजेत्प्राच्यादियोगतः ।
नन्दीशं क्षेत्रपालं च चण्डेशं भैरवं तथा ।। 35

कैलासादीनथाद्रींश्च कपालं शूलमेव च ।
अथ सम्पूज्य विधिवत् मदग्रे वृषभेश्वरम् ।। 36

स्तुहि श्रुतेति मन्त्रेण वृषभं धर्मरूपिणम् ।
मीढुष्टमेति च स्कन्दं गणानां त्वा गणाधिपम् ।। 37

सर्वोपचारैर्देवस्य देव्या सह समर्चनम् ।
परिवारान् समभ्यर्च्य तत्तन्मन्त्रैर्विशेषतः ।। 38

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

महानैवेद्यमीशाय देवस्यत्वेति मन्त्रतः ।
प्रणामप्रक्रमं चैव नीराजनपुरःसरम् ।। 39

छत्रचामरदानं च घण्टा तौर्यत्रिकं शिवे ।
दद्यात्प्रसादयेद्देवं क्षम्यतामिति सत्तमे ।। 40

होमं च वाग्यतः कुर्यात्प्रतिष्ठाप्य हुताशनम् ।
अष्टोत्तरसमिद्भिश्च बैल्वाज्यचरुणा शतम् ।। 41

शतरुद्रेण जुहुयात्वषेष्यंत्यपि(?)स्विष्टकृत् ।
ततस्स्तुवीत देवेशं शङ्करं शशिशेखरम् ।। 42

भवाय भवनाशाय महादेवाय धीमहि ।
शिवाय नीलकण्ठाय शर्वाय शशिमौलये ।। 43

उग्रायोग्राघनाशाय भीमाय भयनाशिने ।
ईशानाय नमस्तुभ्यं पशूनां पतये नमः ।। 44

यथा समस्ताभयदः पशूनां पाशमोचकः ।
तथा व्रतेन मे तुष्टः ऋणदौर्भाग्यनाशकः ।। 45

नमो गौर्यै महादेव्यै भवान्यै ते शिवे नमः ।
शिवप्रदायै शर्वाण्यै सृष्टिस्थित्यन्तहेतवे ।। 46

नमोऽस्त्वार्तिविनाशिन्यै तुभ्यं सर्वभयापहे ।
तुभ्यमानन्दरूपिण्यै नमः कमललोचने ।। 47

विद्यायै वेदमात्रे च वेदशक्तिस्वरूपिणि ।
अम्बिके ते नमो नित्यं ममास्तु वरदः शिवः ।। 48

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

इत्युपस्थाय मां देवि पुनः कुर्यात्प्रदक्षिणाम्।
कृत्वा सव्यापसेव्येन प्रदक्षिणविधानतः ।। 49

शतमष्टोत्तरं कृत्वा प्रणम्य च पुनः पुनः ।
सव्यापसव्यमानेन सोमसूत्रं न लङ्घयेत् ।। 50

शनैः शनैः क्रमं कुर्यात्त्वरालस्यादिवर्जितः ।
देवं सम्मुखतः कृत्वा ब्राह्मणांश्च विशेषतः ।। 51

प्रदक्षिणं क्रमात्कुर्यात् वृषेण सहितं शिवम् ।
यानि कानि च पापानि जन्मान्तरकृतानि च ।। 52

तानि तानि विनश्यन्ति प्रदक्षिणपदे पदे ।
एवं प्रदक्षिणं कृत्वा नमस्कृत्य पुनः पुनः ।। 53

गणयित्वा पदं भूयस्तत्कोटिगुणितं भवेत् ।
अङ्गप्रदक्षिणा देवि ततः कोटिगुणोत्तरा ।। 54

प्रति प्रदक्षिणं कृत्वा साष्टाङ्गं प्रणमेद्भुवि ।
शिवस्याग्रे समे देशे भूमिसंलग्नमस्तकः ।। 55

व्रती तु विधिवद् दद्यादर्घ्यमष्टाङ्गसंयुतम् ।
गोक्षीरं च कुशाग्राणि घृतं दधि च तण्डुलाः ।। 56

सिद्धार्थकास्तथा दूर्वा गन्धपुष्पाक्षतास्तथा ।
अर्घ्योऽष्टाङ्ग इति प्रोक्तस्तदभावे सुमैर्युतः । 57

पञ्चामृतं पञ्चगव्यं गन्धपुष्पकुशोदकम् ।
फलजालरसं चापि घृताभ्यङ्गं तु कारयेत् ।। 58

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

भयरोगादिदारिद्र्यपापक्षुदपमृत्यवः ।
ऋणशोकं मनस्तापं नश्यन्तु मम सर्वदा ।। 59

मन्त्रेणानेन दत्वार्घ्यं त्रिवारं प्रार्थयेच्छिवम् ।
प्रसीद देव देवेश प्रसीद परमेश्वर ।। 60

प्रसीद सोम सर्वज्ञ प्रसीद करुणाकर ।
एवं सम्प्रार्थ्य देवेशमुमां चापि ततो व्रती ।। 61

शनिप्रदोषयोगे मे व्रतं सम्पूर्णतामियात् ।
प्रसादं कुरु देवेश येन मुच्ये ऋणार्णवात् ।। 62

जन्मान्तरसहस्रेषु यदृणं च कृतं मया ।
दैवं पित्र्यं मानुषार्षं मुच्ये ऋणचतुष्टयात् । 63

अनृणोऽहं भविष्यामि धनाढयोऽहं भवामि च ।
इत्थं सम्प्रार्थ्य देवेशमाचार्यं पूजयेच्छिवे ।। 64

होमशेषं दापयेच्च गां च दद्यात्पयस्विनीम् ।
अरोगां च सवत्सां च कांस्यदोहनसंयुताम् ।। 65

अणुमात्रप्रदानेन प्रदोषेऽथ शनेर्दिने ।
इहामुत्राक्षयं पुण्यं भोगानाप्नोति शाश्वतान् ।। 66

ततो वृषभमभ्यर्च्य गन्धपुष्पाक्षतादिभिः ।
धूपदीपै च नैवेद्यं ताम्बूलं श्वेतवस्त्रकम् ।। 67

वृषाय धर्मरूपाय शिवाय शिवमूर्तये .
इत्यर्घ्यं प्रार्थ्य दत्वा तु प्रार्थयेत्तं यतव्रतः ।। 68

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अण्डं स्पृष्ट्वा जपेन्मन्त्रं *इन्मतस्य वृषस्य च ।
शृङ्गमध्ये शिवं दृष्ट्वा ममाहितमनाः शिवे ।। 69

धर्मस्त्वं वृषरूपेण जगदानन्दकारकः ।
अष्टमूर्तेरधिष्ठाता त्वमतः पाहि मामधात् ।। 70

पृथिव्यां यानि तीर्थानि सागरान्तानि यानि वै ।
अण्डमाश्रित्य तिष्ठन्ति प्रदोषे गोवृषस्य च ।। 71

कुर्यात्तद्वृषणं स्पृष्ट्वा शङ्करस्य विलोकनम् ।
प्रदोषे शङ्करं दृष्ट्वा वृषशृङ्गान्तरे शिवे ।। 72

ब्रह्महत्याऽयुतं नश्येन्मुक्तिं भुक्तिं च विन्दति ।
एवं दृष्ट्वा तु भुञ्जीत शाम्भवैः क्षारवर्जितम् ।। 73

व्रतं समर्प्य देवाय मन्त्रेणानेन शाम्भवि ।
व्रतेनानेन चीर्णेन प्रसन्नो भव शङ्कर ।। 74

त्वद्भक्तिं परमं ज्ञानं मुक्तिं चैव प्रयच्छ मे ।
अज्ञानाद् ज्ञानतो वापि यत्कृतं पूजनं तव ।। 75

शनिप्रदोषयोगेऽस्मिन् तदस्तु प्रीतिकृत्तव ।
एवं कृत्वा व्रतं भक्त्या सम्पूज्य शिवमम्बिकाम् ।। 76

---

* इद्+मतस्य इन्मतस्य इद्+मत्तस्य इन्मत्तस्येति वा इद् is a particle of affirmation- espectally strengthning a statement. Its place is taken by एव or इन् to drive away, or to be lord or master of anything.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सर्वज्ञत्वमवाप्नोति मम लोकं स विन्दति ।
इदं व्रतं सप्तकृत्वो यः करोति जितेन्द्रियः ।। 77

महत्फलमवाप्नोति ऋणकोट्या विमुच्यते ।
एकविंशति कृत्वस्तु व्रतमेतत्सुदुर्लभम् ।। 78

पुत्राँल्ललभते लोके भुक्तिं मुक्तिं च विन्दति ।
व्रतसम्पूर्णतार्थाय गामेकां वृषभं शिवे ।। 79

शिवाय वा द्विजायाथ दत्त्वा चाशीः प्रयोजयेत् ।। 80

ईश्वर उवाच -

शश्वद्विरूपाक्षपदं प्रदोषे
नान्यं सुरं चिन्तयेत्सर्वयत्नात् ।
मान्यः स सामान्यनरोऽपि वा शिवे
मन्ये न चान्यः किल शैलकन्ये ।। 81

मां विष्णुतुल्यं मनुते प्रदोषे
सदोष एवेह भवेत पातकी ।
स ब्रह्महत्याऽयुतपातकं नरः
सन्तप्तशूले निवसेत्समाः शतम् ।। 82

सन्दर्शने संस्तवमम्बिके मुदा
प्रदोषकालेषु सुरान्तराणाम् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कुर्वन्महत्पातकमभ्युपैति
तस्मात्तदा नान्यमना भवेत ।। 83

दधिक्षीरमध्वाज्य सशर्कराभिः
शिवे नारिकेलाम्रजम्बीरसारैः ।
सुगन्धोदकैः पुष्पबिल्वादिभिर्मां
समभ्यर्च्य मुक्तः शिवे धूपदीपैः ।। 84

वरान्नैः शिवे पायसापूपशाकैः
सुताम्बूलनीराजनछत्रदानैः ।
प्रणामस्तव प्रक्रमैर्नृत्तगेयै-
र्वरैश्चामरैरर्चको मत्प्रियः स्यात् ।। 85

ब्रह्माण्डमण्डलगतानि सुतीर्थषण्डा-
न्यायान्ति मद्वृषवराण्डगतानि तत्र ।
शृङ्गान्तरे तु निवसेदथ धर्मजालं
तस्मात्प्रदोषसमये क्षणकृत्स्पृशेन्माम् ।। 86

भूमौ पुत्रकलत्रमित्रसाहिताः सत्रातिरात्रादिभिः
यष्टारोऽत्र भवन्ति धान्यधनकैर्गोभिश्च नागाश्वकैः
प्रासादाम्बरभूषणं मम शिवे प्राप्य प्रसादोच्चयात्
तस्मिन् तां प्रदिशामि सम्पदधिकां मुक्तिं प्रदोषार्चनात् ।।

आनन्दाम्बुजकन्द एष गिरिजे मन्दप्रदोषो मम
मन्दारोत्तममालया सुमगणैः बृन्दारवृन्दोत्तमाः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सानन्दाम्बुधिवीचिमग्नहृदयाः सम्पूजयन्ति द्रुतं
कुन्दामन्दसुनिर्मलेन्दुशकलालङ्कारमीशे तदा ।। ४४

शशिखण्डशिखण्डखण्डपर्शुं
विधिमुण्डामलकुण्डलेशमालम् ।
घनकोदण्डधरं त्वखण्डबिल्वैः
प्रकटोच्चण्डताण्डवं समर्च्य नेमुः ।।

शतमखमुखमुख्यलेखजालाः
सुमुखा एव नमन्ति शङ्कराङ्घ्रिम् ।
सकलघौघहरे प्रदोषकाले
प्रमथा यल्लकलिङ्गकेन हृष्टाः ।।

।। इति श्रीशिवरहस्ये एकादशांशे
शनिप्रदोषमहिमा नाम
एकत्रिंशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। द्वात्रिंशोऽध्यायः ।।

सा तिथिर्दुर्लभतरा योग्ययुक्ता विशेषतः ।

ईश्वर उवाच -

शिवरात्रिव्रतं पुण्यं ममैव प्रीतिदं परम् ।। 1

शिवलिङ्गतयोद्भूतस्तस्यां रात्रौ महेश्वरः ।
ब्रह्मविष्ण्वोर्बोधनार्थं चतुर्दश्यां निशि प्रिये ।। 2

माघे कृष्णचतुर्दश्यां सोमपार्द्रक ऋक्षके ।
सा तिथिर्दुलभतरा योग्ययुक्ता विशेषतः ।। 3

माघे कृष्णचतुर्दश्यां पूज्योऽहंलिङ्गमध्यमे ।
रात्रौ यामेषु चतुर्षु अनिद्रोपोषणादिभिः ।। 4

नैत्यकं व्रतमेतद्धि सर्वेषां सर्वदं शिवे ।
त्रयोदश्यर्धघटिका यदि तस्याङ्गता भवेत् ।। 5

प्रदोषपूजा तत्रैव कार्या सा प्रहरादिमे ।
निशीथसमये ग्राह्या माघकृष्णचतुर्दशी ।। 6

तस्यां समस्तपुण्यानि तीर्थान्यायतनानि च ।
स्थावरे वा परे लिङ्गे सङ्क्रमिष्यन्ति पार्वति ।। 7

उपवासप्रभावेण अतन्द्रो निशि जागरात् ।
चतुर्यामार्चनाद्देवि बिल्वपत्रेण केवलम् ।। 8

अक्षयं पुण्यमाप्नोति शिवसायुज्यमश्नुते ।
शिवे मे शिवरात्रिं यः पूजाजागरणैः नयेत् ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अखण्डितव्रती स स्यादाखण्डलशतं वसेत् ।
शिवलोके सर्वभोगैः सुरासुरनमस्कृतः ।। 10

नित्यं च कामिकं देवि शिवरात्रिव्रतं मम ।
ममैव भक्तो यो देवि शिवरात्र्यर्चको भवेत् ।। 11

पूजाजागरणोपेतो रात्रौ यामचतुष्टयम् ।
गणत्वमक्षयं तस्य मम कैलासमूर्धनि ।। 12

वर्षे वर्षे महादेवि नरानार्यो द्विजान्त्यजाः ।
शिवरात्रौ महादेवं नित्यं भक्त्या यजन्ति हि ।। 13

देवा विधीन्द्रविष्ण्वाद्याः सदाराश्चासुरा द्विजाः ।
शिवरात्र्यां महादेवं पूजयन्ति दृढव्रताः ।। 14

शिवरात्रिव्रताद्देवि त्रिःसत्यं न परात्परम् ।
न पूजयन्ति भक्त्येशं रुद्रं त्रिभुवनेश्वरम् ।। 15

योऽन्नभुक् कृमिभुक् स स्यात्सनिद्रोऽजगरो भवेत् ।
नानायोनिसहस्रेषु भ्रमते सोऽधमो नरः ।। 16

द्वादशाब्दकमेवं स्याच्चतुर्विंशाब्दकं तु वा ।
यावज्जन्म महापुण्यं कुर्वन्मद्गणपो भवेत् ।। 17

माघकृष्णचतुर्दश्यां भौमः सोमः प्रशस्यते ।
भौमवारेण संयुक्ता कृष्णाङ्गारचतुर्दशी ।। 18

यद्यार्द्रपातयुक्ता चेत् *शिवयोगाः सुदुर्लभाः ।
स जन्मायुतपापघ्नस्तस्यां बिल्वैकपूजनात् ।। 19

---

* तस्यां शिवपूजनात् सुदर्लभाः शिवयोगः सिध्यन्ति ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शिवयोगस्य योगोऽस्य सम्भवेदुत्तमोत्तमः ।
त्रयोदशीकलाप्येका मध्ये चैव चतुर्दशी ।। 20

अन्ते चैव सिनीवाली त्रिस्पृश्यं शिवमर्चयेत् ।
अर्धरात्रादधश्चोर्ध्वा युक्ता या स्याच्चतुर्दशी ।। 21

तस्यामेव प्रकुर्वीत सोऽश्वमेघफलं लभेत् ।
प्रदोषव्यपिनी चापि ग्राह्या सेयं शिवार्चकैः ।। 22

प्रदोषैककलाव्याप्तौ परैषा सम्प्रशस्यते ।
पूर्वाऽपरेऽह्नि देवेशि निशीथ व्यापिकोत्तमा ।। 23

जागरं चोपवासं च तस्यां कुर्याच्छिवार्चकः ।

देव्युवाच -

शिवरात्र्यां महादेव कथमर्चन्ति साधकाः ।। 24

को विधिस्तस्य नियमस्तत्सर्वं वद मे विभो ।

महेश्वर उवाच -

कथयामि विधिं तेऽद्य शिवरात्रिसमर्चने ।। 25

शृण्वपर्णो न प्रकाश्यं रहस्यं परमं मम ।
स्थावरे वा चरे वापि मृद्बाणस्फटिकेऽपि वा ।। 26

धातुजे वा यथा जोषं पूजां यामचतुष्टये ।
सम्पाद्य पूजासामग्रीं शिवक्षेत्रे गृहेऽपि वा ।। 27

प्रातः कृत्यं च निर्वर्त्य दुष्टालापविवर्जितः ।
स्नात्वा नद्यां तटाके वा धौतवस्त्रधरः शुचिः ।। 28

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सितभस्मत्रिपुण्ड्राङ्को रुद्राक्षाधारणान्वितः ।
गां गोमयेनोपलिप्य रङ्गवल्यादिमण्डिताम् ।। 29

वितानमण्टपैर्युक्तां वेदिकास्तरणावृताम् ।
कल्पयेत्पीठमुत्कृष्टं समासीनः कुशासने ।। 30

पञ्चामृतं फलरसं पञ्चगव्यं सुमान्यपि ।
बिल्वपद्मार्ककल्हारनंवनीलोत्पलानि च ।। 31

दमनोशीरकादीनि सम्पाद्याम्बु च चन्दनम् .
धूपदीपौ फलानीशे वाग्यतो हविरेव च ।। 32

ताम्बूलं च सुवासांसि सम्पाद्य नियमान्वितः ।
आचम्य प्राणानायम्य जपेत्पञ्चाक्षरं शिवे ।। 33

साङ्गन्यासं सहस्रं मे यामे यामेऽथ पूजकः ।
ध्यायेद्देवं विरूपाक्षं शिवरात्र्यां शिवार्चकः ।। 34

देवं नित्यं महेशं रजतगिरिवसं चारुचन्द्रावतंसं
रत्नाऽऽकल्पोज्जवलाङ्गं परशुमृगवराभीतिहस्तान्तरङ्गम् ।
पद्मासीनं सहाम्बं वृतगणपगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववन्द्यं निखिलभयहरं सर्वपापापहारम् ।। 35

ध्यात्वा वा द्य महालिङ्गे स पुष्पाञ्जलिमीश्वरि ।
पाद्यार्घ्याचमनादीनि दद्यात्पञ्चाक्षरेण हि ।। 36

पञ्चामृतैः पञ्चगव्यैः शिवे फलरसैरपि ।
गन्धपुष्पकुशाम्बूनि दद्याद्रुद्रेण भामिनि ।। 37

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

घृतदीपावलिं दद्यात् धूपं गुग्गुलुसंयुतम् ।
कुर्याद्धाराभिषेकं मे रुद्रैकादशसङ्ख्यया ।। 38

तौर्यत्रिकैस्तदा देवि शिवरात्र्यां शिवे मुदा ।
स कूर्चैस्तर्पयेदन्ते *भवायेत्यष्टनामाभिः ।। 39

किञ्चिद्दत्वाऽथ नैवेद्यं परिमृज्याथ वाससा ।
पीठे संस्थाप्य देवेशं गन्धपुष्पाक्षतैर्यजेत् । 40

भस्मना बिल्वकुसुमैर्मल्लिकाभिर्महेश्वरि ।
भूषणैर्भूषयेदीशं पद्मकल्हारचम्पकैः ।। 41

मन्दारैः केतकैश्चैव(?) तथा दमनकादिभिः ।
शताष्टनामभिर्वापि नामसाहस्रतोऽपि वा ।। 42

मूर्तयोऽष्टौ शिवस्यैताः पूर्वदिक्क्रमयोगतः ।
पूजयेत्स्कन्दनन्दीशौ गणचण्डेश्वरादिकान् ।। 43

उमां च भवपार्श्वे च पूजयेदुपचारकैः ।
शर्वाय क्षितिरूपाय भवाय जलमूर्तये ।। 44

रुद्राय तेजोरूपाय उग्राय पवनात्मने ।
भीमायाकाशरूपाय याज्याय पशुपाय च ।। 45

महादेवाय सोमाय यष्ट्रे सूर्यात्मने नमः ।
इति सम्पूज्य देवेशमष्टमूर्तिं पिनाकिनम् ।। 46

---

* भवं देवमितीश्वरि इत्येव सङ्गच्छते । भवं देवं तर्मयामि इति एव वक्तव्यत्वात् तर्पणे चतुर्थ्यन्तस्यायोगात् च ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

गणेशं भेरवं दुर्गां स्कन्दनन्दीश्वरावुभौ ।
चण्डेशं च गणेशं च तत्तन्मन्त्रैर्यजेच्छिवे ।। 47

मूलमन्त्रेण तां शक्तिं गन्धपुष्पाक्षतादिभिः ।
धूपं दीपं ततो दद्यान्नैवेद्यं भक्ष्यभोज्यकम् ।। 48

ताम्बूलं फलजालं च पानीयं मुखवासकम् ।
नीराजनं ततो दद्याच्छतसाहस्रवर्तिकम् ।। 49

चामरं दर्पणं छत्रं वितानं ध्वजमेव च ।
व्यजनं भाजनं देवि दद्याद्वित्तमवञ्चयन् ।। 50

नमेत्प्रदक्षिणां स्तोत्रं ऋक्सामाथर्वयाजुषैः ।
कुर्यान्नृत्तं गीतवाद्यं वीणावेणुमृदङ्गकान् ।। 51

निवेदयित्वा देवाय स्तोत्रमेतत्पठेन्नरः ।। 52

विश्वाधिक त्रिदशनायक देवदेव
वन्दारुवन्दितपदाब्ज महेश शर्व ।
पाह्यम्बया शशिकलामलचारुमौले
मामाशु लोकय भवाम्बुधिवीचिलग्नम् ।। 53

विश्वेश विश्वजनकाव्यय सोमधामन्
भूमाव शर्व महिमागम वामदेव ।
कामाङ्गनाशन गराशन कालकाल
मां पाहि संसृतिजगद्गतमाशु देव ।। 54

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कन्दर्पदर्पहर सर्पविशोभिताङ्ग
*गर्तासनस्थ गजचर्मपरीतदेह ।
कर्ता त्वमेव जगतां परमेश हर्ता
पाता त्वमीश परिपाहि भवाब्धिमग्नम् ।। 55

हे विश्वनाथ गणनाथ सुमन्मथारे
मन्नाथ नाशितमहाघचयेन्दुचूड ।
पाहीश मामकधिया भवपाशलग्नं
मग्नं महाभव समुद्रसुपङ्किलं माम् ।। 56

त्र्यक्षाक्षय्यफलप्रदाय विभो दक्षादिदीक्षापह
उक्षोर्ध्वाङ्गगतामिताभयहर वीक्षैकदग्धासुर ।
कक्षादिस्थित पक्षपातसदृशा संवीक्ष मामीश्वर
पक्षीन्द्रप्रियवाहपूजितपद प्रत्यक्षमुक्तिप्रद ।। 57

इत्थं यामचतुर्ष्वेवं संस्तुवीत महेश्वरम् ।
प्रत्येकमर्घ्यं दद्याद्वै सपुष्पाम्बुविमिश्रितम् ।। 58

नमः शिवाय शान्ताय सर्वपापहराय च ।
शिवरात्रौ मया दत्तमर्घ्यं प्रीतिकृदस्तु ते ।। 59

मया कृतान्यनेकानि पातकानि च शङ्कर ।
गृहाणार्घ्यमुमाकान्त शिवरात्रौ प्रसीद मे ।। 60

---

* गर्तासन The seat of a chariot

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

दुःखदारिद्र्यभारैश्च दग्धौऽहं पार्वतीपते ।
ममार्घ्यदानात्सुप्रीतः सुखिनं कुरु शङ्कर ।। 61

मया कृतान्यघौघानि हर शङ्कर शं कुरु ।
शिवरात्रौ ददाम्यर्घ्यं शिवरात्रौ प्रसीद मे ।। 62

प्रतिप्रहरमेवं स्यादर्घ्यं दत्वा विचक्षणः ।
दण्डवत्प्रणतो भूत्वा ततो देवं क्षमापयेत् ।। 63

अङ्गहीनं क्रियाहीनं विधिहीनं महेश्वर ।
पूजितोऽसि मया देव तत्क्षमस्व घृणानिधे ।। 64

यच्चाप्युपहतैः पुष्पैरशस्तैर्भावदूषितैः ।
केशकीटापविद्धैश्च पूजितोऽसि मया प्रभो ।। 65

अन्यत्रासक्तचित्तेन क्रियहीनतया विभो ।
निद्रातन्द्राहताङ्गेन क्षुत्क्षामफलभक्षणैः ।। 66

तामसेन च भावेन हीनमन्त्राक्षरेण च ।
पूजितोऽसि मया देव तत्सर्वं क्षम्यतां मम ।। 67

व्रतं सम्पूर्णतां यातु फलं चाक्षय्यमस्तु मे ।
एवं स्तुत्वा नमस्कृत्य पूजास्थानं विसर्जयेत् ।। 68

नैवेद्यादि च तत्सर्वं भस्माङ्गाय निवेदयेत् ।
परेद्युः कृतकर्माथ सम्पूज्य शिवमव्ययम् ।। 69

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ब्राह्मणान् भोजयेच्छक्त्या गन्धपुष्पाक्षतार्पणैः ।
एवमैशं व्रतं कुर्यात् नैत्यकं प्रतिवर्षकम् ।। 70

माघकृष्णचतुर्दश्यां सर्वकामफलप्रदम् ।
चतुर्विंशद्द्वादशाब्दे कुर्यादुद्यापनं बुधः ।। 71

आजन्म यस्तथा कुर्यात्सोऽक्षय्यां लभते गतिम् ।
माघकृष्ण चतुर्दश्यां पूज्य लिङ्गं पिनाकिनः ।। 72

चतुर्दशी दर्शयुक्ता अष्टमी नवमीयुता ।
पारणं तत्र कर्तव्यं रौद्रर्क्षे वा पुनर्वसौ ।। 73

कलशा दश वाष्टौ वा सोदकानभिपूर्य च ।
गन्धपुष्पाक्षतफलैः ऋत्विजोऽष्टौ निमन्त्रयेत् ।। 74

आचर्यं वरयेदेकं ब्राह्मणं वेदपारगम् ।
गणेशं स्कन्दनन्दीशं कालीं भद्रां सरस्वतीम् ।। 75

वृषभं त्वामुमादेवीं कलशेष्वभितो यजेत् ।
मृत्युञ्जयेन मन्त्रेण वह्नौ हुत्वा शताष्टकम् ।। 76

चरुणा सधृतेनेशि ब्राह्मणान् भोजयेच्छिवे ।
यथाशक्त्या धेनुवस्त्रं हिरण्यं व्रतदक्षिणाम् ।। 77

आचार्याय च ऋत्विग्भ्यो दद्यादुद्यापनं स्मृतम् ।
एतद्वै सङ्ग्रहेणैव कुर्यादुद्यापनं शिवे ।। 78

शिवरात्रिव्रतस्यास्य सर्वकामप्रपूरणम् ।। 79

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ईश्वर उवाच -

भूतायामसिते च नक्तमगजे माघ्यां ममर्क्षे नरः
पापौघान्न बिभेति शङ्करपदध्यानानुरक्तः सदा ।
मुक्तः संसृतिघोरपाशत इमां गां सर्वदानाधिकां
दत्वा यत्फलमाप्नुयात् सुनिशितं तत्प्राप्य मामेति च ।।

।। इति श्रीशिवरहस्ये एकादशाम्शे
शिवरात्रिपूजाव्रतकथनं नाम
द्वात्रिंशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। त्रयत्रिंशोऽध्यायः ।।

शिव उवाच -

मासि मास्यपि देवेशि कुर्याच्चैव चतुर्दशीम् ।
सा मासशिवरात्रीति कथिता कृष्णपक्षगा ।। 1

चैत्रादिकृष्णपक्षेषु तत्तन्मासि चतुर्दशीम् ।
प्राप्य सम्पूजयेद्देवं लिङ्गमूर्तिं सदाशिवम् ।। 2

रात्रौ चतुर्षु यामेषु पूजयेद्बिल्व पत्रकैः ।
एक भुक्तेन नक्तेन सोपवासेन वा शिवे ।। 3

तत्र कृष्णचतुर्दश्यां सायं शौचं निवर्त्य (?) च ।
नद्यां वा देवखाते वा स्नायान्मन्त्रैः कुशैर्युतः ।। 4

धृतवासा भस्मयुतस्त्रिपुण्ड्राक्षधरो भवेत् ।
संशोध्य कलशं शुद्धं स्वयमम्बु प्रसाधयेत् ।। 5

वस्त्रपूतं तदा देवि सुपुष्पाणि तदा व्रती ।
गृहीत्वा नियमोपेतो गृहे वापि शिवालये ।। 6

संशोध्य गोमयाम्भोभिः स्थण्डिलं शिवपूजने ।
वितानपुष्पमालाढ्यं मण्टपं परिकल्पयेत् ।। 7

पीठं तत्र निधायैव प्राङ्मुखोदङ्मुखोऽपि वा ।
चेलाजिनकुशः स्थित्वा सम्पाद्यार्घ्याचमं शिवे ।। 8

प्रक्षाल्य धातुपात्राणि नवानि कलशं तथा ।
शङ्खं च दीपधूपौ च स पुष्पाम्बूनि साधयेत् ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पञ्चामृतं पञ्चगव्यं तथा फलरसं शिवे ।
गन्धपुष्पाक्षतांस्तत्र संस्थाप्याथ निवेदनम् ।। 10

ताम्बूलं चैव वासोऽथ रत्नालङ्करणानि च ।
सङ्कल्प्य नियमोपेतो मासिकीं शिवरात्रिकाम् ।। 11

ततोऽथ प्रथमे यामे सम्पूज्यैव महेश्वरम् ।
पञ्चाक्षरशतं जप्त्वा साङ्गन्यासं महेश्वरि ।। 12

कलशं पूज्य शङ्खं च गन्धपुष्पाक्षतादिभिः ।
अङ्गेषु भावयेद्देवांस्ततः प्रजननेति च ।। 13

लिङ्गसंस्थं महादेवमेवं ध्यायेत्त्वया सह ।
साम्बं त्रिणेत्रं चन्द्राङ्कं नीलकण्ठं पिनाकिनम् ।। 14

वरदाभयहस्तं च मृगटङ्कधरं शिवम् ।
नागयज्ञोपवीताढ्यं दिव्यालङ्कारभूषितम् ।। 15

सोमधामसमानास्यां नीलेन्दीवरलोचनाम् ।
फुल्लकल्हारसङ्काशां सर्वाभरणभूषिताम् ।। 16

मदङ्कसंस्थां त्वां ध्यायेत्साधकः परमेश्वरि ।
तत्रानन्यमना देवि पञ्चाक्षरपुरःसरम् ।। 17

समावाह्य ततो लिङ्गे वामनासापुटेन हि ।
पाद्यार्घ्याचमनादीनि मूलमन्त्रेण दापयेत् ।। 18

पञ्चगव्यैर्विशोध्येशं ततः पञ्चामृतैरपि ।
पुनः फलरसैर्देवि गन्धपुष्पकुशोदकम् ।। 19

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

दद्यादनुक्रमेणैव रुद्रेणैवाभिषेचयेत् ।
तदन्ते तर्पणं कुर्याद्भवाद्यैरष्टनामभिः ।। 20

वाससा परिमृज्येशं पीठे संस्थाप्य पूजयेत् ।
भस्मना चन्दनेनापि अक्षताभिर्महेश्वरम् ।। 21

बिल्वपत्रैः शिवे पुष्पैर्वासोऽलङ्कारभूषणैः ।
निधनेत्यादिभिर्मन्त्रैबिल्वैः पुष्पैः प्रपूजयेत् ।। 22

शताष्टनामभिर्वापि पूजयेदिन्दुशेखरम् ।
चतुर्दश्यां तथा देवि नामभिश्च चतुर्दशं ।। 23

पूजयेद्बिल्वपत्राद्यैर्नमोऽन्तैरेवमीश्वरि ।
चतुर्दश्यां मृगधरमपामार्गैः प्रपूजयेत् ।। 24

अजैकपादहिर्बुध्न्यो भवः शर्व उमापतिः ।
रुद्रः पशुपतिः शम्भुर्महेशः शिव ईश्वरः ।। 25

महादेवो हरो भीमो नामान्येवं चतुर्दश ।
एभिर्नामभिरीशानं चतुर्दश्यां सुमैर्यजेत् ।। 26

सापूपाज्यं हविर्देवि निवेद्य प्रणवेन हि ।
ताम्बूलं दीपधूपं च नीराजनमथाचरेत् ।। 27

कर्पूरखण्डदीपं च घृतदीपौ हि दापयेत् ।
स्तोत्रैः स्तुवीतैवमीशं प्रदक्षिणनमस्कृतैः ।। 28

छत्रं च चामरं चैव ध्वजं व्यजनमेव च ।
दद्याच्छिवाय देवेशि वाद्यानि विविधानि च ।। 29

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नर्तनं करतालं च ऋक्सामाथर्वयाजुषैः ।
पुराणैरितिहासोत्थैः स्तोत्रवर्यैः स्तुवीत च ।। 30

नमः शिवायाथ नमः शिवायै
नमोऽस्तु गौर्यै शशिशेखराय ।
नमोस्तु देव्यै च नमोऽस्तु शम्भवे
नममोऽस्तु देवाय नमोस्तु देव्यै ।। 31

नमः शिवाय प्रणतार्तिहारिणे
नमो जगज्जन्मगतिप्रदायै ।
नमोऽस्तु वेद्याय महेश्वराय
नमोऽस्तुगन्धर्वगणस्तुतायै ।। 32

नमः शिवायाथ विहारकारिणे
नमो जनित्र्यै भवमङ्गलायै ।
नमोऽस्तुविष्ण्वादिपदप्रदाय
नमोऽस्तु पाकारिमुखस्तुतायै ।। 33

नमः शिवायान्तकगर्वहारिणे
नमोऽस्तु भण्डासुरखण्डनायै ।
नमोऽस्तु वेदान्तवचः स्तुताय
नमोऽस्तु सत्केसरिवाहनायै ।। 34

नमःशिवाय प्रमथाधिपाय
नमोऽस्तुरुद्राणि (?)वरप्रदायै ।
नमोऽस्तु देवादिगणस्तुताय
नमोऽस्तु भद्रप्रदमङ्गलायै ।। 35

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

एवं स्तुत्वा शिवौ देवि चतुर्दश्यां सदाशिवम् ।
प्रहरे प्रहरे चापि एवमेव यथाविधि ।। 36

दद्यादर्घ्यं क्रमेणैव पूजान्ते च महेश्वरि ।
आधिव्याधिसमायुक्तः ऋणदौर्भाग्यपीडितः ।। 37

ददाम्यर्घ्यं महेशाय सुप्रीतस्तेन मे भवेत् ।
एवमेवार्घ्यदानं च रात्रौ यामचतुष्टये ।। 38

मासि मासि महेशानि कृष्णपक्षे विशेषतः ।
चैत्रादिसर्वमासेषु मासि मास्यसितासु च ।। 39

एकं वा प्रहरं पूजां यदि कुर्याच्च नक्तभुक् ।
एवं नरो वा नारी वा विधवोपवनसेन्निशि ।। 40

सुकृतैर्लभ्यते भूता तस्यामर्चनमेव मे ।
पुण्यलक्षैश्च लभ्येत जपनामप्रसादतः ।। 41

ब्रह्मा स्वयं चतुर्वक्त्रः पञ्चवक्त्रः स्वयं हरिः (?) ।
असितार्चाफलं शम्भोर्वक्तुं शक्तो न पार्वति ।। 42

ब्रह्माण्डोदरमध्यानि यानि तीर्थानि सन्ति वै ।
संस्थितानि भवन्तीह भूतायां पारणे कृते ।। 43

परेद्युः पूज्य मां देवि यथा शक्त्या द्विजार्चनम् ।
एवं त्र्यब्दं द्वादशाब्दं व्रतं कुर्याद्विधानतः ।। 44

संवत्सरं वा देवेशि आजन्म मद्गणो भवेत् ।
उद्यापनविधिं वक्ष्ये भूतायां मासि मासि ते ।। 45

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

देव्युवाच -

व्रतस्योद्यापने देव किं कर्तव्यं च मानवैः ।
को विधिः कानि द्रव्याणि कथं कार्यं वद प्रभो ।। 46

ईश्वर उवाच -

शृणु काम्यविधिं भद्रे लोकानां हितकाम्यया ।
चतुर्दशाब्दं कर्तव्यं मासभूताव्रतं शिवे ।। 47

एकभुक्तस्त्रयोदश्यां चतुर्दश्यामुपोषणम् ।
सम्पाद्य सर्वसम्भारान्मण्टपं तत्र कारयेत् ।। 48

वस्त्रैः पुष्पैः समायुक्तं फलपल्लवशोभितम् ।
तन्मध्ये विलिखेत्पद्मं सर्वतोभद्रमण्डलम् ।। 49

धूपदीपसमायुक्तं कुम्भाष्टक विराजितम् ।
आचार्यं वरयेत्तत्र ऋत्विग्भिः सहितं शिवे ।। 50

शिवरूपाश्च ते विप्राः पूज्याश्चन्दनपुष्पकैः ।
अनुज्ञातश्च तैर्विप्रैः शिवमावाह्य कुम्भके ।। 51

अव्रणं सजलं कुम्भं मृन्मयं हेमताम्रजम् ।
कुम्भोपरि न्यसेद्देवमुमया सहितं शिवम् ।। 52

सौवर्णं वापि रौप्यं वा ताम्रं मृन्मयमेव वा ।
रत्नालङ्करणैर्युक्तं वस्त्रैः पुष्पैः प्रपूजयेत् ।। 53

प्रतिष्ठाप्यार्चयेन्मूर्तिं सोमं दिक्पालकानपि ।
परितोऽष्टसु कुम्भेषु पूजयेन्मूलमन्त्रतः ।। 54

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पूर्वेद्युर्गन्धपुष्पैश्च सोपवासं प्रपूजयेत् ।
धूपदीपैश्च नैवेद्यैः फलैर्नानाविधैरपि ।। 55

प्रातः स्नात्वा परेद्युर्मां पूजयेत्कृतनैत्यकः ।
ऋत्विगाचार्यसहितो मूर्तिं दिक्पालसंयुताम् ।। 56

पूजयेद् गन्धपुष्पाद्यैर्धूपं दीपं निवेदयेत् ।
नैवेद्यं भक्ष्यभोज्यं च अपूपांश्च चतुर्दश ।। 57

प्रत्येकं सुघृताक्ताश्च सङ्ख्यया च चतुर्दश ।
स्वाशाखोक्तेन मार्गेण प्रतिष्ठाप्य हुताशनम् ।। 58

परिस्तीर्य विलाप्याज्यं हविः संस्कृत्य हावयेत् ।
आचार्य ऋत्विक्सहितः सपत्नीकः स्वयं शुचिः ।। 59

रुद्रेणैव नमोऽन्तेन जुहुयाज्जातवेदसि ।
ततः स्विष्टकृतं हुत्वा होमशेषं समापयेत् ।। 60

आचार्यं ऋत्विजश्चैव पूजयेद्दक्षिणादिभिः ।
गां सवत्सां सवसनां आचार्याय निवेदयेत् ।। 61

ततः सकुम्भां तां मूर्तिं आचार्याय निवेदयेत् ।
प्रीयेतां मे शिवौ नित्यं स्यातां मुक्तिप्रदौ मम ।। 62

दिक्पालमूर्तिं कुम्भांश्च ऋत्विग्भ्यो दापयेत्क्रमात् ।
नत्वा तान् ब्रह्मणान् देवि गन्धपुष्पैः प्रपूजयेत् ।। 63

वित्तशाठ्यमकुर्वाणो दक्षिणाभिः प्रसादेत् ।
पुनः सम्पूज्य मां लिङ्गे प्रार्थयेद्व्रतसिद्धये ।। 64

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

व्रतमेतत्कृतं यन्मे पूर्णं वाऽपूर्णमेव वा ।
रोगपीडान्वितेनेश दिवा भुक्तं तु यन्मया ।। 65

मासि मासि चतुर्दश्यां कदाचित्पुण्ययोगतः ।
सर्वं सम्पूर्णतां यातु त्वत्प्रसादान्महेश्वर ।। 66

ब्राह्मणान्भोजयेत्तत्र परेद्युश्च चतुर्दश ।
सपत्नीकान्भक्ष्यभोज्यैर्गन्धपुष्पाक्षतादिभिः ।। 67

दक्षिणाभिः प्रतोष्यैव स्वयं भुञ्जीत बन्धुभिः ।
एवं नरो वा नारी वा विधवापि चतुर्दशीम् ।। 68

प्राप्य मत्पूजनाद्यच्च लभते तच्छृणु प्रिये ।
अपुत्रो लभते पुत्रं कुमारी सत्पतिं लभेत् ।। 69

निर्धनो धनवान्भूयादायुर्हीनस्तथायुषा ।
भक्तो मुक्तिमवाप्नोति विधवा पतिलोकगा ।। 70

भक्तो मद्गणपो भूयान्मसि भूतार्चनेन मे ।
किम्पुनर्बहुनोक्तेन सर्वान् कामानवाप्नुयात् ।। 71

ईश्वर उवाच -

एवं मासचतुर्दशीषु नियतः सम्पूजयन्मां हरं
शर्वाणीसहितं स शर्म लभते सर्वेषु लोकेष्वपि ।
पूर्वोद्यच्छशिसुन्दरं नगवरं कैलासमप्यादरा-
त्पश्चान्मे गणपेन्द्रतामुपगतोऽज्ञानाद्विमुक्तो भवेत् ।।

।।इति श्रीशिवरहस्ये एकादशाम्शे मासशिवरात्रि सोद्यापनव्रतकथनं नाम त्रयस्त्रिंशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। चतुस्त्रिंशोऽध्यायः ।।

ईश्वर उवाच -

कृष्णाष्टम्यां महादेवि बोधायनविधानतः ।
स्त्रियो गृहस्थाः पुरुषा वर्णिनोऽपि महेश्वरि ।। 1

सर्वकृष्णाष्टमीष्वीशे उपोष्याहः प्रदोषके ।
नद्यां तटाके संस्नाय धौतवस्त्रधरः शुचिः ।। 2

भस्मत्रिपुण्ड्रसहितो रुद्राक्षाभरणैर्युतः ।
बिल्वपुष्पाणि सम्पाद्य धौतकुम्भानथाहतान् ।। 3

कुशांश्च साग्रान्सम्पाद्य कृतनित्यक्रियो द्विजः ।
पूजास्थानं समालिप्य गोमयेन नवाम्भसा ।। 4

रङ्गवल्लीशोभितं च पुष्पमण्टपकैर्युतम् ।
वितानपल्लवोपेतं तोरणावलिभूषितम् ।। 5

तस्मिन् संस्थापिते पीठे समावाह्य वृषध्वजम् ।
साम्बं सगणमव्यग्र उग्रार्चनपरायणः ।। 6

सङ्कल्प्य देशकालादि पञ्चाक्षरजपादरः ।
पाद्यार्घ्याचमनादीनि शङ्खं कुम्भं च साम्बुयुक् ।। 7

लिङ्गाग्रे स्थापयेद्देवि सुकूर्चं गन्धपुष्पयुक् ।
पञ्चामृतं पञ्चगव्यं तथा फलरसानि च ।। 8

मधुपर्कं च पात्रेषु स्थापयेद्गन्धपुष्पकम् ।
ताम्बूलं च हविर्देवि सम्पाद्याखण्डकाक्षताः ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

घृतदीपांस्ततो दिक्षु पिष्टैः कुर्यात्सवर्तिकान् ।
आत्वावहेति मन्त्रेण शिवमावाहयेद्व्रती ।। 10

साम्बं च सगणं देवं लिङ्गेऽभ्यर्च्य पिनाकिनम् ।
पाद्यार्घ्याचमनादीनि दद्याद्देवि पृथक् पृथक् ।। 11

मूलमन्त्रेण विधिवत् मधुपर्कं ततः शिवे ।
पञ्चामृतं पञ्चगव्यं तथा फलरसैः शिवे ।। 12

गन्धपुष्पकुशाग्राम्बु लिङ्गे दद्यात्षडक्षरैः ।
शतरुद्रेण जपविद्गोशृङ्गेणाभिषेचयेत् ।। 13

इमा आपः शिवेत्येव मापो दद्याच्छिवाय तु ।
आपोहिष्ठादिमनुभिरभिषिञ्चेत्ततः परम् ।। 14

ब्रह्मजिज्ञैः पावमानैः कद्रुद्रायेति मन्त्रतः ।
सर्वोह्येषमहारुद्रः पुरुषोरुद्र इत्यपि ।। 15

विश्वं भूतमितीशानि वामदेवादिसामभिः ।
यजुः पतित्रमापोस्याद्योरुद्राग्नावितिमन्त्रतः ।। 16

अभिषिच्य महादेवं शिवे लिङ्गस्वरूपिणम् ।
देवस्यत्वेति मन्त्रेण सकूर्चेनाभिषेचयेत् ।। 17

भवाद्यैरष्टभिर्देवि तर्पयेन्नामभिः पृथक् ।
संशोध्य वाससा लिङ्गं पीठे संस्थाप्य पूजयेत् ।। 18

वस्त्रं गन्धं सितं भस्म साक्षतं चोपवीतकम् ।
सुवर्णरत्नाकल्पैश्च बिल्वैः पुष्पैश्च पूजयेत् ।। 19

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(सुवर्णरत्नाकल्पैश्च बिल्वैः पुष्पैश्च पूजयेत्)
कमलोत्पलकल्हारमन्दारकंरवीरकैः ।। 20

कर्णिकारार्कदमनैः कनकैर्द्रोणसम्भवैः ।
शताष्टनामभिर्देवि निधनेत्यादिमन्त्रतः ।। 21

धूपं च गुग्गुलोपेतं घृतदीपान् मनोरमान् ।
गणांश्च परितः पूज्य गन्धपुष्पाक्षतादिभिः ।। 22

महाकालाय पूर्वे तु शङ्कुकर्णाय दक्षिणे ।
नन्दिकेशाय पश्चात्तु वक्रतुण्डाय चोत्तरे ।। 23

ईशाने चण्डिकेशानं धर्मं चैव शिवाग्रतः ।
उत्तरे च महादेवि पूजयेदुपचारकैः ।। 24

तत्तन्नामभिरेवेशि शिवस्य परितो यजेत् ।
उद्दीप्यस्वेति मन्त्रेण चाष्टपैष्टिकदीपतः ।। 25

हविः साज्यं च ताम्बूलं शिवे दद्याद्गणेषु च ।
नीराजनं ततो दद्याद्वाद्यघोषपुरःसरम् ।। 26

छत्रं च चामरं देवि व्यजनादर्शके तथा ।
प्रदक्षिणप्रणामं च स्तवमेतत्प्रयोजयेत् ।। 27

जय शङ्कर पार्वतीपते हर
विधिविष्णिवन्द्रसुसेविताब्जपाद ।
उरगेन्द्राभरण प्रसीद शम्भो
प्रसभं पापमपाकुरुष्व सद्यः ।। 28

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

जय सोमानलसूर्यलोचनाद्य शम्भो
धृतचन्द्राङ्कजटाकुटीरगङ्गा ।
परिपाहिपतङ्ग मध्यवास
विधिमुण्डाभरण प्रसीद देव ।। 29

जय सोमकलावतंस शूलपाणे
गणवृन्दामलसेवन प्रसीद ।
हर भर्गोरुमहोग्रकालकूट-
विषभक्षेन्दुकलालसत्कपर्द ।। 30

जय साम्ब महोरगेन्द्रहार
प्रसभं मन्मथनाशन प्रसीद भर्ग ।
भव भीम महेश्वराव शम्भो
मयि दृष्टिं करुणां करुष्व शम्भो ।। 31

इति स्तुत्वा महादेवं कालाष्टम्यां तदा व्रती ।
प्रतिष्ठाप्य ततो वह्निं स्वस्वशाखोक्तमार्गतः ।। 32

अशनीयं हविर्यत्स्याज्जुहुयात्तेन सर्पिषा ।
इमा रुद्रेत्यादिना मां पूर्वं तु जुहुयाच्छिवम् ।। 33

शतं हि मेत्यादिभिश्च अहं बिभर्मि इत्यपि ।
मान आयुषि इत्येतदन्ते पितरि इत्यपि ।। 34

मानः सूर्यस्य एवापि मानो महान्त इत्यपि ।
मानस्तोकेन मन्त्रेण हविष्मन्त इति क्रमात् ।। 35

वास्तोष्पतेति मन्त्रेण आर्द्रया रुद्र इत्यपि ।
देवस्य तु सुतायेति जुहुयाज्जातवेदसि ।। 36

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ततः स्विष्टकृतं हुत्वा आज्यैर्होमं समापयेत् ।
पुनरष्टसुमैः पूज्य होमान्ते शं (?) प्रसादयेत् ।। 37

प्रीयतां भगवानीशः साम्बः सगण ईश्वरः ।
अनया पूजया होमैस्तृप्तो मां स प्रसीदतु ।। 38

दद्यादर्घ्यं महेशाय स पुष्पाम्बु महेश्वरि ।
दुःखदारिद्र्य(द्य्र)मग्नं मां समुद्धर महेश्वर ।। 39

अष्टम्यामर्घ्यदानेन अष्टमूर्ते प्रसीद मे ।
इत्यर्घ्यं च ततो दत्वा पूजामुद्वास्य सत्तमे ।। 40

ब्राह्मणाय हिरण्यं गां शाम्भवाय निवेदयेत् ।
यत्किञ्चिद्वा यथाशक्ति दद्यादीशानतुष्टमे ।। 41

भक्ष्यभोज्यान्नसंयुक्तं भुञ्जीयाच्छाम्भवैः सह ।
दक्षिणाभिश्च तान् पुष्पैर्गन्धताम्बूलपूर्वकम् ।। 42

भोजयेच्च स्वयं भुज्यान्नक्तं वा तत्र वर्तयेत् ।
कृष्णाष्टमीषु नियतमेष सामान्यतो विधिः ।। 43

एकाब्दं त्र्यब्दमथवा द्वादशाब्दमथापि वा ।
कृत्वा व्रतोद्यापनं च नक्ताशी वा भवेत्ततः ।। 44

सितासितास्वष्टमीषु अविमुक्ते तु नैत्यिकम् ।
उपोष्यैवाविमुक्तेशं पूज्य बिल्वैः सुमैरपि ।। 45

शिवे गङ्गाम्बुभिः शीतैरभिषिच्य महेश्वरम् ।
धूपदीपादिनैवेद्यै स्तुवीतैतं महेश्वरम् ।। 46

कालाष्टमीषु नियतमविमुक्तेश्वरं हि माम् ।। 47

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

गङ्गाधरान्धकरिपो प्रमथाधिनाथ
विश्वेश विश्वगतसर्जकभर्जकान्ते ।
ब्रह्मादिविष्णुसुरवर्गसुपूजिताङ्घ्रे
मामीश पाहि दयया स्मरकालनाश ।। 48

इति स्तुत्वाऽविमुक्तेशं कालराजं प्रपूजयेत् ।
कालाष्टम्यां तु नियतं काशीवासी महेश्वरि ।। 49

मामेत्य गङ्गातटगं गन्धपुष्पाम्बुभिः सदा ।
अपूपहविषा चैव वटकैर्लड्डुकैरपि ।। 50

पूजयेद्धूपदीपैश्च कालाष्टम्यां स्तुवीत च ।
भैरवं भीषयणाकारं वासनिर्विघ्नहेतवे ।। 51

स्तोत्रेणानेन देवेशि काश्यां कालाष्टमीषु च ।
स्तुवीत पद्यैर्हृद्यैश्च ममाद्य गणपोत्तमम् ।। 52

देवराजसेव्यमानपावनाङ्घ्रिपङ्कजं
व्यालयज्ञसूत्रमिन्दुशेखरं कृपाकरम् ।
नारदादियोगिवृन्दवन्दितं दिगम्बरं
काशिकापुराधिनाथकालभैरवं भजे ।। 53

भुक्तिमुक्तिदायकं प्रशस्तचारुविग्रहं
नितान्तभक्तवत्सलं समस्तलोकपालकम् ।
निक्वणन्मनोज्ञहेमकिङ्किणीलसत्कटिं
काशिकापुराधिनाथकालभैरवं भजे ।। 54

भानुकोटिभास्वरं भवाब्धितारकं परं
नीलकण्ठमीप्सितार्थदायकं त्रिलोचनम् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कालकालमम्बुजाक्षकन्धराहरं शिवं
काशिकापुराधिनाथकालभैरवं भजे ।। 55

शूलटङ्कपाशदण्डपाणिमादिकारणं
श्यामकायमादिदेवमक्षरं निरामयम् ।
भीमवक्रिमभ्रुवं विचित्रताण्डवप्रियं
काशिकापुराधिनाथकालभैरवं भजे ।। 56

रत्नपादुकाप्रभाविरामपादयुग्मकं
नित्यमद्वितीयमिष्टदैवतं निरञ्जनम् ।
मृत्युदर्पनाशनं करालं दंष्ट्रभीषणं
काशिकापुराधिनाथकालभैरवं भजे ।। 57

धर्मसेतुपालनं अधर्ममार्गनाशनं
कर्मपाशमोचनं सुकर्मदायकं प्रभुम् ।
सुवर्णवर्णकेशपाशशोभिताङ्गनिर्मलं
काशिकापुराधिनाथकालभैरवं भजे ।। 58

अट्टहासभिन्नपद्मजाण्डकोटिसन्ततिं
दृष्टिपातनष्टपापजालमुग्रशासनम् ।
अष्टसिद्धिदायकं कपालमालिकाधरं
काशिकापुराधिनाथकालभैरवं भजे ।। 59

भूतसङ्घनायकं विशालकीर्तिदायकं
काशिवासकोकपुण्यपापशोधनप्रभुम् ।
नीतिमार्गकोविदं पुरातनं जगत्प्रभुम्
काशिकापुराधिनाथकालभैरवं भजे ।। 60

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कालभैरवाष्टकं पठन्ति ये मनोहरं
ज्ञानमुक्तिसाधनं पवित्रपुण्यवर्धनम् ।
शोकमोहदैन्यलोभकोपतापनाशनं
ते प्रयान्ति कालभैरवादि सेवितं प्रभुं हरम्।। 61

प्रविष्टो योऽप्यथान्यत्र वसन्नेतत्स्तवं जपेत् ।
पुनः काशीं समासाद्य तत्र नष्टतनुर्भवेत् ।। 62

कालाष्टम्यां कालराजं स्तुवीतैवं प्रसाद्य च ।
काश्यामेव वसेन्नित्यं न पापे रमते हि सः ।। 63

किम्पुनर्बहुनोक्तेन कालाष्टम्यर्चको नरः ।
सर्वान्कामानवाप्नोति भुक्तिं मुक्तिं च विन्दति ।। 64

यज्ञायुतफलं प्राप्य मम लोके महीयते ।
ब्रह्महत्यादिभिः पापैर्मुच्यते नात्र संशयः ।। 65

ईश्वर उवाच -

मध्याष्टमीप्रथितसोमकलावतंसं
सर्वाष्टमीषु नगजे परिपूजयन्ति ।
नष्टानि तेषु दुरितानि भवन्ति सद्यो
हृष्टानि तेषु सुकृतानि विमुक्तिदानि ।। 66

यो वाऽविमुक्ते सितभस्मफालः
कालाष्टमीषु नितं मम कालाराजम् ।
सम्पूजयत्यघगणैर्नबिभेति सद्यो
हृद्यो भवेदतितरां स भवेऽतिधन्यः ।। 67

।।इति श्रीशिवरहस्ये एकादशांशे शिवगौरीसंवादे अष्टमीपूजाकथनं नाम चतुस्त्रिंशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। पञ्चत्रिंशोऽध्यायः ।।

देव्युवाच -

उद्यापनविधिं ब्रूहि कृपया भक्तवत्सल ।
कस्मिन् काले च किं द्रव्यं कृष्णाष्टम्यां महेश्वर ।। 1

तन्मे वद महादेव व्रतसाद्‌गुण्यहेतवे ।

ईश्वर उवाच -

पूर्णां तिथिमनुप्राप्य चित्तवित्तादिसंयुतः ।। 2

निशीथव्यापिनी ग्राह्या सिता वाप्यसिता तिथिः ।
कृष्णाष्टमी विशेषेण सम्पूर्णफलहेतवे ।। 3

सप्तम्यामेव भक्तः सन् भवभक्तो जितेन्द्रियः ।
मामभ्यर्च्य विधानेन भस्मरुद्राक्षभूषणः ।। 4

निर्वर्त्याऽऽवश्यकं कर्म व्रतान्ते द्वादशाब्दिके ।
वर्षे त्रिवर्षे देवेशि कृत्वा नक्ताष्टमीव्रतम् ।। 5

पूर्वोक्तविधिना देवि कामी तूद्यापनं चरेत् ।
अष्टम्यां बुधवारेण युतायामैन्दवे दिने ।। 6

प्रातरुत्थाय मतिमान् स्नात्वा सन्ध्यामुपास्य च ।
मण्टपं रचयेत्तत्र पुष्पमालाविराजितम् ।। 7

वितानतोरणोपेतं कदलीस्तम्भमण्डितम् ।
तस्मिन् सुगोमयेनैवमुपलिप्य नवाम्भसा ।। 8

रङ्गवल्यादि शोभाढ्यं पद्मं कुर्यात्सकेसरम् ।
शिवक्षेत्रे गृहे वापि नद्यां वा विपिने गिरौ ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पुण्याहं वाचयित्वाऽथ नान्दीश्राद्धं विधाय च ।
ऋत्विजो वरयेदष्टौ आचार्यसहितान्नव ।। 10

भस्मरुद्राक्षसम्पन्नान् शिवलिङ्गार्चकान् शिवे ।
वेदागमपुराणज्ञान् ब्राह्मणान् संशितव्रतान् ।। 11

गन्धपुष्पैरथाभ्यर्च्य स्वयं चैव सदारकः ।
उमां महेश्वरं चापि सुवर्णेनैव कारयेत् ।। 12

पलेन वा तदर्धेन कुयाद्रौप्येण वा शिवे ।
नन्दिस्कन्दमहाकालं शङ्कुकर्णं गणेश्वरम् ।। 13

चण्डेश्वरं च वृषभं दुर्गां चैव यथाविधि ।
मृण्मयैस्ताम्रजैर्वापि कुम्भैरम्बुप्रपूरितैः ।। 14

फलपल्लवसंयुक्तै तेषु ताः प्रतिमा न्यसेत् ।
मध्यमे च महाकुम्भे स्वम्बुपुष्पफलैर्युते ।। 15

उमां महेश्वरं स्थाप्य प्रतिष्ठाप्यार्चयेत्क्रमात् ।
दिगादिक्रमयोगेन अन्या मूर्तीर्यजेच्छिवे ।। 16

प्राणानायम्य विधिवत् कृत्वा सङ्कल्पमादरात् ।
उद्यापनं करिष्येऽहं कृष्णाष्टम्यर्चनस्य च ।। 17

इत्युक्त्वा पूजयेत्तत्र लिङ्गमूर्तिं सदाशिवम् ।
पञ्चामृतैः पञ्चगव्यैस्तथा फलरसैरपि ।। 18

गन्धपुष्पकुशाद्भिश्च मन्त्रपूतैर्यजेच्छिवे ।
रुद्रेणैवाभिषिच्येशं तर्पयेदष्टनामभिः ।। 19

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

वासो यज्ञोपवीतं च भस्म चन्दनमक्षतान् ।
बिल्वपङ्कजपुन्नागसुगन्धिकुसुमान्यपि ।। 20

पूजयेत्पार्वतीकान्तं निधनेत्यादिमन्त्रतः ।
धूपं दीपं ततो दत्वा निवेद्य हविरम्बिके ।। 21

ताम्बूलं च ततो दद्यात् नीराजनमतः परम् ।
प्रदक्षिणनमस्कारैः स्तोत्रैः स्तुत्वा महेश्वरम् ।। 22

विसर्जयित्वा च ततः कुम्भे मूर्तिं प्रपूजेत् ।
गन्धपुष्पाक्षतैर्देवि ऋत्विगाचार्यसंवृतः ।। 23

उमां महेश्वरं देवमाचार्यः पूजयेच्छिवे ।
रुद्रदुर्गादि गायत्र्या पूज्य सर्वोपचारकैः । 24

ऋत्विजोऽष्टौ तथा मूर्तीः पूजयेयुर्यतव्रताः ।
दिक्कुम्भेषु समन्ताच्च तत्तद्गायत्रिभिः क्रमात् ।। 25

सम्पूज्य गन्धपुष्पाद्यैः निवेद्य हविरीश्वरि ।
नीराजनं बलिं कुर्यात्तत्तन्मन्त्रैर्दिशामुखे ।। 26

मण्टपात्पश्चिमे भागे स्थण्डिलं चतुरश्रकम् ।
कृत्वा चोल्लेखनादीनि प्रतिष्ठाप्याग्निमीश्वरि ।। 27

इध्मान् दर्भान् परिस्तीर्य पात्रासादनमाचरेत् ।
पूर्णपात्रं प्रतिष्ठाप्य ब्रह्मासनमतः परम् ।। 28

इध्माधानादि चाघारं हुत्वा चैव तु चक्षुषी ।
अपामार्गसमिद्भिर्वा बिल्वैरपि महेश्वरि ।। 29

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

हविश्च सर्पिषा युक्तं सतिलं जुहुयाच्छिवे ।
रौद्रैर्नमोऽन्तैः स्वाहेति शताष्टं(?) स्विष्टकृत्ततः ।। 30

गणपांश्च हुनेत्तत्र स्वाहाकारेण चानले ।
प्रायश्चित्ताहुतीर्हुत्वा होमशेषं समापयेत् ।। 31

पूर्णाहुतिं च जुहुयादखण्डघृतधारया ।
रुद्रसूक्तेन देवेशि औदुम्बरस्रुचा तदा ।। 32

मधुमिश्रेण चाज्येन शान्त्यर्थं चमकैर्हुनेत् ।
तदन्ते चाग्निमध्यस्थं पूजयेन्मां त्वया सह ।। 33

गन्धैः पुष्पैस्तथा बिल्वैर्वाससा हविषा तथा ।
धूपं दीपं ततो दत्वा नीराज्याग्निं द्विजैः सह ।। 34

त्रिः प्रदक्षिणमावृत्या समिधं जातवेदसम् ।
प्रोक्षणीमध्यगाम्भोभिः प्रोक्षयेच्च सदारकम् ।। 35

वासोऽलङ्कारगोभिस्तान् पूजयेच्छाम्भवान् शिवे ।
पृथक् पृथगथाचार्यं पूजयेद्दक्षिणादिभिः ।। 36

वित्तशाठ्यमकुर्वाणो ब्रह्माणं बहुधा यजेत् ।
दीनानाथान्दक्षिणाभिः पूज्यान्नैर्भोजयेदपि ।। 37

प्रतिमास्ताः सकुम्भाश्चदेया ऋत्विक्ष्वनन्तरम् ।
कुम्भैस्तैस्तज्जलैः स्नात्वा सदारो धौतवस्त्रधृक् ।। 38

गन्धपुष्पधरो विप्रः ऋत्विगाचार्यपूर्वकम् ।
भोजयेद्भक्ष्यभोज्यान्नैः शिवमभ्यर्च्य वाग्यतः ।। 39

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नवम्यां पारणां कुर्याद्बन्धुभिश्च विशेषतः ।
आचार्यं च सपत्नीकं पूजयित्वा यथाविधि ।। 40

प्रतिमावस्त्रकलशान् गाश्च वत्सविशोभिताः ।
वस्त्राभरणशोभाढ्या कांस्यदोहाः पयस्विनीः ।। 41

दत्वा ब्रह्मादि विप्रेभ्यः कलशं प्रतिमां तथा ।
ब्राह्मणान् भोजयेदन्नैर्गृह्णीयादाशिषं शिवे ।। 42

शिवो मे प्रियतां देव साम्बः सगण ईश्वरः ।
कृष्णाष्टम्यामर्चनेन व्रतेनोद्यापनेन च ।। 43

भुक्तिं मुक्तिं च मे भक्तिं ददातु परमेश्वरः ।
इत्युक्त्वा तु प्रसाद्येशं व्रतोद्यापनकर्मणि ।। 44

उद्यापनमिदं देवि कृष्णाष्टम्यां व्रतस्य च ।
यत्कृत्वा न पुनर्जन्म विन्दते मनुजः क्वचित् ।। 45

गाणपायमवाप्नोति मम कैलासमौलिगः ।
एवं नरो वा नारी वा कृत्वा मध्याष्टमीव्रतम् ।। 46

यान् यान् चिन्तयते कामान् प्राप्य स प्रेत्य मां व्रजेत् ।
उद्याप्य च पुनर्देवि गृह्णीयादथ भक्तितः ।। 47

किम्पुनर्बहुनोक्तेन नानेन सदृशं व्रतम् ।
भुक्तिमुक्तिप्रदं पुंसां सौभाग्यारोग्यवर्धनम् ।। 48

पापापहं पुण्यदं च प्रशस्तं मम पूजनम् ।
सर्वकाम प्रदं पुत्र्यमपुत्राणां विशेषतः ।। 49

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सर्वं भद्रमवाप्नोति दुर्गाण्याशु तरत्यपि ।। 50

ईश्वर उवाच -

एवं कृष्णाष्टमीयं व्रतमशुभहरं पुत्र्यमारोग्यदं मे
कृत्वा जन्मशतायुतौघसुमहापापान्न बिभ्येदथ ।
पश्चान्मे गणपेन्द्रतामुपगतो नासौ शिवे दुर्गतिं
प्राप्नोतीश्वरचिन्तकः स सुकृतां राशिं च विन्देदपि ।। 51

।। इति श्रीशिवरहस्ये एकादशाम्शे
कृष्णाष्टमीव्रतोद्यापनकथनं नाम
पञ्चत्रिंशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। षट्त्रिंशोऽध्यायः ।।

शिव उवाच -

शिव व्रतानि विधिवत् तव प्रोक्तानि शैलजे ।
किं पुनर्देवि मां पृच्छेस्तत्ते वक्ष्यामि साम्प्रतम् ।। 1

देव्युवाच -

देव देव महादेव करुणावरुणालय ।
श्रुतानि विश्रुतान्यद्य व्रतानि प्रीतिदानि मे ।। 2

अविमुक्ते निवसतां नियतं नियमश्च कः ।
शिवार्चनाद्यकरणे प्राश्चित्तं शुतिश्रुतम् ।। 3

तन्मे विस्तारयाद्येश विस्ताराय नृणां विभो ।

ईश्वर उवाच -

सम्यक्पृष्टं त्वया देवि लोकानां हितहेतवे ।। 4

रहस्यं सर्ववेदानां नोक्तपूर्वं मयाम्बिके ।
बृहज्जाबालकथितं तत्ते वक्ष्याम्यनुक्रमात् ।। 5

काशीवासजनाचारं बृहज्जाबालदर्शितम् ।
शिवार्चनपरित्यागे चैकाह्नापि च सत्तमे ।। 6

प्रायश्चित्तं वदाम्यद्य शृणु श्रवणभूषणम् ।
एतदर्थं हि मुनयो मुक्तिमण्टपमध्यमे ।। 7

विश्वेश्वराग्रतःस्थित्वा भस्मरुद्राक्षभूषणाः ।
प्रणम्याहुर्भुसुण्डं तं चन्द्रखण्डशिखार्चकम् ।। 8

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मुनयः ऊचुः -

किं कार्यं ब्राह्मणानां च किं धार्यं क्वच संस्थितिः ।
कः पूजनीयो ध्येयश्च तन्नो ब्रूहि शिवार्चक ।। 9

इति पृष्टो भुसुण्डोऽसौ बृहज्जाबालकीर्तितम् ।
रहस्यं तानवोचद्यत्कर्तव्यं ब्राह्मणैः समैः ।। 10

प्रथमं भस्मरुद्राक्षधारणे महिमां शिवे ।
त्रिपुण्ड्रं तन्मुखानां च धारणे महिमादिकम् ।। 11

भुसुण्ड उवाच -

सम्यक्पृष्टं मुनिश्रेष्ठाः ब्राह्मणानां हितप्रदम् ।
कैलासे यन्महादेव्यै बृहज्जाबालगं *वृषम् ।। 12

प्रोक्तवाञ्छ्रीमहादेवो देव्यै यच्छ्रुतिदर्शितम् ।
तद्भवद्भ्यो वदाम्यद्य शृणुध्वं सावधानतः ।। 13

भासुरा भूसुराणां च शिवाचारः श्रुतीरितः ।
उत्पन्नो ब्राह्मणकुले अष्टचत्वारिसंस्कृतः ।। 14

शौक्लसावित्रसोमाद्यदीक्षाभिः पूतजन्मभिः ।
स तु मुख्याधिकारी स्यात् नेतरः सार्ववर्णिकः ।। 15

वर्णाश्रमाचाररता द्विजास्त्रैवर्णिका अपि ।
तेषूक्तमैश्वराचारं पालयेयुरतन्द्रिताः ।। 16

वस्तव्यं साधानेन अविमुक्तेऽथ चोत्तमम् ।
तच्छिवागारमतुलं पुनरावृत्तिवर्जितम् ।। 17

---

*वृषम् – Justice, Morality.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

प्रशस्ततृणकाष्ठौदे सर्वदार्यसमन्विते ।
अग्निरित्यादिभिर्भस्म धार्यं श्रौतानलोद्भवम् ।। 18

अष्टषोडशकाङ्गेषु मन्त्रैर्विप्रास्त्रियायुषैः ।
ब्राह्मणक्षत्रियैर्वैश्यैः शूद्रैस्तत्पचनाग्निजम् ।। 19

वर्णी वाथ गृहस्थो वा यतिर्वा विधवाः स्त्रियः ।
प्रणवेन यतेः प्रोक्तं स्त्रीणां पञ्चाक्षरेण तु ।। 20

पञ्चब्रह्मभिरेवेह भस्मनाप्यवगुण्ठनम् ।
अत्याश्रमे प्रकथितं त्रिपुण्ड्रस्य च धारणम् ।। 21

शिरोव्रतमिदं श्रौतं धार्यं सर्वाश्रमैरपि ।
त्यक्त्वैतत् पतिता यान्ति नरकं स्वपितामहैः ।। 22

भिक्षुभक्ष्यो भवेत्तत्र द्विजा वृकगणैरपि ।
रुद्राक्षसम्भवाः श्वेता रुद्राक्षाः पीतरक्तकाः ।। 23

कृष्णाश्चानुक्रमेणैव देहे धार्याश्च मन्त्रतः ।
सर्वाश्रमैस्तथा स्त्रीभिस्त्र्यम्बकेनैव मन्त्रतः ।। 24

तत्त्यक्त्वा धारणं विप्रा उपोष्याऽऽसायमेव हि ।
यतिः प्रणवसाहस्रं जपन् मुक्ताघको भवेत् ।। 25

धारणे स्पर्शने दृष्टे गोदानफलमाप्नुयात् ।
पर्वण्यपि च रुद्राक्षं तत्तद्वदनधारितम् ।। 26

पूर्वोक्तं च फलं सर्वं दद्यात्सर्वेषु सर्वदा ।
ध्येयः सर्वैर्महादेवः शिव एकः शिवङ्करः ।। 27

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

उमासहायो विश्वेशो नीलग्रीवस्त्रिलोचनः ।
ब्राह्मणैरन्यवर्णैश्च स्त्रीभिश्च यतिभिस्तथा ।। 28

जप्यः प्रणव एवेह शिवे पञ्चाक्षरं मम ।
त्रिकालं सर्वदा सर्वैस्त्रिशूद्राणां नमोऽन्तकः ।। 29

नातः परं तारको मे मन्त्रः पञ्चाक्षरः परः ।
काश्यामन्ते च शैवानां कर्णे तूर्णं विमुक्तिदम् ।। 30

ददाम्यहं सप्रणवं पुनर्भवनिवृत्तये ।
गङ्गां वा सह्यजां वापि वसेयुश्चाश्रिता द्विजाः ।। 31

अविमुक्ते तु नियमाद्वासः कष्टतरो नृणाम् ।
सह्यजायास्तटे क्षेत्रे वसन्भक्तोऽयमुच्यते ।। 32

पूजनीयो महादेवः स्मर्तव्यश्च मुमुक्षुभिः ।
कावेर्यां वापि गङ्गायां नदीष्वन्यासु वा द्विजैः ।। 33

स्नात्वा समन्त्रमुषसि कृत्वा शौचान्विधानतः ।
सन्तर्प्य देवपित्रर्षीन् रुद्रसूक्तैश्च मार्जयेत् ।। 34

वासोऽथ परिधायैव भस्मरुद्राक्षमण्डितः ।
सन्ध्यां कुर्यादप्रमादं दत्वार्घ्यं सन्ध्ययोर्द्वयोः ।। 35

उद्यन्तमम्शुमन्तं च ध्यायेत्तिष्ठन्नतन्द्रितः ।
सहस्रपरमां देवीं शतमध्यां शतावराम् ।। 36

गायत्रीं प्रजपेद्विद्वान् मध्ये सायं शतं भवेत् ।
श्रौतस्मार्तानले वापि जुहुयाद्वेदमन्त्रतः ।। 37

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

जपेत्पञ्चाक्षरं मन्त्रमोङ्काराद्यं षडक्षरम् ।
सहस्रं परमं विप्राः शताष्टं वापि भावतः ।। 38

सम्भृत्य पूजासम्भारं कापिलं पञ्चगव्यकम् ।
अन्यस्मादुत्तमं प्रोक्तं मधुपर्कं फलानि च ।। 39

उपलिप्ते तदा पीठे लिङ्गमभ्यर्चयेद्द्विजः ।
संसिच्य तैश्च सम्भारैर्गन्धचन्दन वारिभिः ।। 40

ततः एकगुणो रुद्रो जप्योऽप्येकादशावृतः ।
सकूर्चं वाससाऽऽमृज्य परिवेष्ट्य सुवाससा ।। 41

पीठे स्थाप्य तदा लिङ्गं भस्मना भूषयेत्ततः ।
गन्धाक्षतोपवीतादीन् दद्यात्पञ्चाक्षरेण हि ।। 42

त्रिशाखैर्बिल्वपत्रैश्च तथार्द्रैरप्यनार्द्रकैः ।
बिल्वपत्रैः समभ्यर्च्य कुसुमैर्वा यथाबलम् ।। 43

न तु बिल्वं परित्याज्यं सर्वथा सावधानतः ।
धूपं दीपं च नैवेद्यं दद्यात्प्रक्रमनर्तनम् ।। 44

प्रणामश्च स्तुतिश्चेति पूजेयं परिकीर्तिता ।
ब्राह्मणानां परो धर्मः शिवलिङ्गस्य पूजनम् ।। 45

त्रिकालमप्रमादेन वर्णानामाश्रमेषु च ।
यतेस्तु प्रणवेनैव स्त्रीशूद्राणां तु पार्थिवे ।। 46

प्रमादादेकदा त्यक्त्वा उपोष्यैव परेऽहनि ।
कृत्वा स्वसिरसो *वापं पूजां तद्द्विगुणां चरेत् ।। 47

---

*वापं – Snaving

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

भुङ्क्ते प्रमादादीशार्चामकृत्वा ब्राह्मणो यदि ।
तदुद्गीर्य उपोष्यैव पञ्चगव्येन शोभि(धि)तः ।। 48

सम्पूज्य शाम्भवान् पूज्य द्विगुणं मुक्तकिल्बिषः ।
जपेद्रुद्रं प्रयत्नेन दिवा नक्तं च भस्मधृक् ।। 49

दिवा सूर्यं च पश्यंश्च रात्रौ चन्द्रं च वह्निकम् ।
प्रमादादेकदा त्यक्त्वा शिवलिङ्गे शिवार्चनम् ।। 50

प्रायश्चित्तमकुर्वंश्च नरकं पञ्चवत्सरम् ।
अन्यथा तु परेतः स विष्ठाभक्षेषु तिष्ठति ।। 51

यतिस्त्यक्त्वैकदा यस्तु प्रणवं तु सहस्रकम् ।
प्रजपेद्द्विगाणां पूजां कुर्याद्भस्मावगुणितः ।। 52

शिवपूजामकुर्वन् यो (यः) फलमूलाम्बुभोजनः ।
परेतः स्वं पिबेद्रक्तं अम्बुपः फलभुक् कृमीन् ।। 53

अन्नभुग्यदि विष्ठाशी तिष्ठत्यत्यन्तसङ्कटम् ।
वर्णानामाश्रमाणां च विधिः श्रुत्या प्रदर्शितः ।। 54

काशीवासी तु नियमाद्वसेदामरणं सदा ।
सर्वक्षेत्रोत्तमं तच्च यत्र विश्वेश्वरः स्थितः ।। 55

शिवोऽद्वैतश्चतुर्थोऽत्र साक्षाल्लिङ्गे प्रकाशते ।
विश्वेश्वराभिधं लिङ्गं वेदवेदान्तसंस्तुतम् ।। 56

सम्पूज्यं सर्वदा सर्वैर्बिल्वपत्रैश्च साक्षतैः ।
स्नापयित्वा कापिलेन पयसा लिङ्गमैश्वरम् ।। 57

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

विश्वेश्वराख्यं मुनयो ब्रह्महापि विमुच्यते ।
सुरापायी कापिलेन दध्नाऽऽज्येन हिरण्यमुट् ।। 58

मधुना गुरुदाराघात्सितया सर्वजीवहृत् ।
महाप्रस्थादिमानेन स्नापयेत्पर्वणि क्रमात् ।। 59

तण्डुलैश्च यवैर्बिल्वैस्तिलैः सम्पूज्य शङ्करम् ।
सर्वान् कामानवाप्नोति सुरलोकेषु मोदते ।। 60

नित्यान्तर्गृहयात्रां च कुर्याद्भस्माक्षधारकः ।
तत्र मूत्रपुरीषादि न कुर्यान्मोहतोऽपि वा ।। 61

तत्र प्राच्यां प्रतीच्यां च भैरवाः शूलपाणयः ।
रक्षन्ति परितः क्षेत्रं पापिष्ठं दारयन्ति ते ।। 62

यमस्य सदने कल्पं यद् दुःखं समवाप्यते य़
ततोऽपि बहुधा दुःखं भैरवे घटिकात्रयम् ।। 63

तस्माद्वसेत्सुनियतं काश्यां विप्रो विमुक्तये ।
विश्वेशार्चनहीनानां तत्र वासो न शस्यते ।। 64

पञ्चाक्षरविहीनानां तत्र वासो न शस्यते ।
भस्मरुद्राक्षहीनानां तत्र वासो न शस्यते ।। 65

प्रदोषार्चनहीनानां तत्र वासो न शस्यते ।
रुद्राध्यायविहीनानां तत्र वासो न शस्यते ।। 66

भूताष्टमी सोमवारहीनानां च दुरात्मनाम् ।
अन्नपूर्णाक्षेत्रपालस्कन्दविघ्नेशभैरवाम् ।। 67

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पूजयेत् नियतं काश्यां पञ्चक्रोशप्रदक्षिणम् ।
कुर्यादत्र गृहाधीनपातकैश्च विमुच्यते ।। 68

स्नानाद्गङ्गाम्भसि स्थित्वा मणिकर्ण्यामथ द्विजाः ।
पश्येच्च नियतं काश्यां विश्वेशं चान्नपूर्णिकाम् ।। 69

एवं वसन् तथान्ते वै मुक्तिं विन्दति चोत्तमाम् ।। 70

स्कन्द उवाच -

एकाहमप्युज्झितशङ्करार्चनो
विष्ठासु तिष्ठेच्च शतं समा नरः ।
आपोशनो रक्तपपातकी भवे-
दन्नाशनो विट्कृमिभुक् परेतः ।। 71

चतुर्दश्यां काश्यां विधिनियतनक्ताशनरताः ।
शिवे भूत्या युक्ता शिवभजनसक्ता हि सुनराः ।
द्विजाः कालाष्टम्यां शशिशकलचूडार्चनरता
लभन्ते देहान्ते शिवसदनमध्ये शिवजनाः ।। 72

यो वा प्रदोषे निशि सोमवारे
त्रिलोचनं पूजयते स धन्यः ।
वन्यैः किमन्यैर्नरजन्मगार्दभैः
काश्यां च सामान्यनरैर्भरैर्भुवः ।। 73

नरः काश्यां तिष्ठन्नपि शिवभजनहीनो हि कुनरः
महेशं विश्वेशं यदि स्वकहशा नैव कलयेत् ।
कृपापात्रां यात्रां प्रतिदिन मथान्तर्गृहवरे
शिवद्रोही दुष्टो भवति च यात्यन्धतमसि ।। 74

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मज्जन्ति ये गिरिवरोदितगाङ्गतोये
मज्जन्ति नो पुनरपीह भवाब्धि मध्ये ।
प्राज्यां च मुक्तिपदवीं अदवीयसीं ते
सम्प्राप्नुवन्ति गिरिजे विरजा भवन्ति ।। 75

शश्वद्विश्वाधीशं यदि भजति काश्यां च निवसन्
तथान्नैः पूर्णैस्त्वां भजति च कृपापूर्णकलनाम् ।
समभ्यर्णा भूयात् किल कलिज जातेऽपि सुजने
विमुक्त्याख्या कान्ता भजति तमुमाकान्तकृपया ।।76

प्रदोषे विशेषेण लोकोऽस्तदोषे
महाशेषभूषाङ्गलिङ्गार्चकश्चेत् ।
विशेषेण दोषज्ञ एव प्रमोषो
न तस्यास्ति बुद्धेरशेषामरेड्यः ।। 77

योग्या विमुक्तेरपि देहसौख्य-
युक्ता विरक्ता न महेशभक्ताः ।
सक्तान्यधर्माश्च न नक्तभुक्ता
भवन्त्युमे तत्र नरा न मुक्ताः ।। 78

निवसेन्नियतोऽत्र भुक्तिमुक्तौ
शिवनिष्ठो हि गरिष्ठ एष धर्मः ।
श्रुतिसीमन्त विशिष्टवाक्यमेत-
न्न विमुञ्चेदविमुक्तगो वरिष्ठः ।। 79

।। इति श्रीशिवरहस्ये एकादशाम्शे अविमुक्तवासकथनं नाम
षट्त्रिंशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। सप्तत्रिंशोऽध्यायः ।।

ईश्वर उवाच -

शान्त्यध्यायान् प्रवक्ष्यामि समाहितमनाः शिवे ।
राजचोराग्निपीडासु ग्रहभूतगदादिभिः ।। 1

पीडितानां शिवे शान्त्यै मयैव मनसा कृताः ।
तच्छृणुष्व वदाम्यद्य सर्वपापक्षयाय च ।। 2

अतः परमिदं गुह्यं रुद्रोद्गीतं महोदयम् ।
महाविघ्नप्रशमनं महाशान्तिकरं शुभम् ।। 13

अकालमृत्यशमनं सर्वव्याधि निवारणम् ।
परचक्रप्रमथनं सदा विजयवर्धनम् ।। 4

स्तम्भनं परसैन्यस्य रिपुनाशकरं सदा ।
विषग्रहक्षयकरं समस्ताभीष्टदायकम् ।। 5

सर्वशान्त्यधिकाराख्यं धर्मं वक्ष्ये शृणुष्व तम् ।
स शान्तिधारकस्त्र्यक्षो नागयज्ञोपवीतवान् ।। 6

चतुर्मुखश्चतुर्बाहुः सितभस्मावगुण्ठितः ।
वरो वरेण्यो वरदो वामदेवो महेश्वरः ।। 7

त्रैलोक्यनमितः श्रीमान् शान्तिमाशु करोतु मे ।
सर्वावयवमुख्येन गात्रेण तनुमध्यमा ।। 8

पीतश्यामातिसौम्येन शिवरूपेण शोभिता ।
ललाटतिलकोपेता चन्द्ररेखार्धधारिणी ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

दिव्याम्बरधरादेवी सर्वाभरणभूषिता ।
वरस्त्री सर्वनारीणां शोभागुणमहास्पदा ।। 10

भावनामात्रसन्तुष्टा उमा देवी वरप्रदा ।
साक्षादागत्य रूपेण शान्तानामिव तेजसा ।। 11

शान्तिं करोतु मे प्रीता भक्तानां भक्तवत्सला ।
पद्मरागद्युतिः सौम्यो रक्तमाल्यानुलेपनः ।। 12

अबालो बालरूपेण षण्मुखः शिखिवाहनः ।
पूर्णेन्दुवदनः सौम्यस्त्रिशिखाशक्तिसंयुतः ।। 13

कृत्तिकोमाग्निरुद्राङ्गगङ्गोद्भूतः सुरार्चितः ।
कार्तिकेयो महातेजा वरदानैकतत्परः ।। 14

शान्तिं करोतु मे प्रीतो बलं सौख्यं च सर्वदा ।
महोदरो महाकायः स्निग्धाञ्जनसमप्रभः ।। 15

एकदंष्ट्रोत्कटो देवो गजवक्त्रो महाबलः ।
नागयज्ञोपवीती च नागाभरणभूषितः ।। 16

सर्वार्थसम्पदाधारो गणाध्यक्षो वरप्रदः ।
रुद्रस्य तनयो देवो नायकोऽथ विनायकः ।। 17

करोतु मे महाशान्तिं कर्मसिद्धिं च सर्वदा ।
इन्द्रनीलनिभाक्षोऽग्निपशुशूलायुधोद्यतः ।। 18

रक्ताम्बरधरः श्रीमान् कृष्णाङ्गो नागभूषणः ।
पापापनोदनः शुद्धस्त्वलक्ष्मीमलनाशनः ।। 19

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

करोतु मे महाशान्तिं महाकालो महाबलः ।
पूतवस्त्रपरीधाना कन्या पुष्पैःस्वलङ्कृता ।। 20

गणनाथाम्बिका त्र्यक्षा पुण्या गौरी सुरेश्वरी ।
सर्वसिद्धिप्रदा देवी प्रसादपरमा परा ।। 21

शान्तिं करोतु मे शान्ता सिद्धिमाशु प्रयच्छतु ।
स्निग्धा श्यामलवर्णेन महिषासुरमर्दिनी ।। 22

धनुश्चक्रप्रहरणा शङ्खयष्ट्यसिधारिणी ।
अतर्जनोद्यतकरा सर्वोपद्रवनाशिनी ।। 23

सर्वमङ्गलमाता मे शिवमाशु प्रयच्छतु ।
निर्मांसेन शरीरेण सुस्नाय्वस्थिनिबन्धनः ।। 24

अतिसूक्ष्मोऽतिविक्रान्तस्त्र्यक्षो भृङ्गिरिटिर्महान् ।
रुद्रात्मजो रुद्रवीरो रुद्रैकगतमानसः ।। 25

सोऽपि शान्तात्मभावेन शान्तिमाशु करोतु मे ।
प्रचण्डगणसैन्येशो महाकालास्त्रधारकः ।। 26

अक्षमालार्पितकरस्त्र्यक्षश्चण्डेश्वरः प्रभुः ।
प्रचण्डपापहरणो बृहस्पत्यादिशोधकः ।। 27

करोतु मे महायोगी कल्याणं परमं शुभम् ।
पद्मासनः पद्मनिभश्चतुर्वदनपङ्कजः ।। 28

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कमण्डलुधरः श्रीमान् देवगन्धर्वपूजितः ।
शिवध्यानैकनिरतः शिवसद्भावभावितः ।। 29

ब्रह्मशब्देन दिव्येन ब्रह्माशन्तिं करोतु मे ।
शङ्खकुन्देन्दुवर्णाभिः कण्ठे मरकतप्रभः ।। 30

अक्षमालाशिरा उग्रशिवज्ञानव्यवस्थितः ।
चतुर्मुखश्चतुष्पादस्त्रिणेत्रः सर्वदोज्जवलः ।। 31

क्षितेः पतिर्वृषो देवो धर्मो धर्मोत्तमोत्तमः ।
ईशं वहति पृष्ठेन तस्माद्धर्मो जगत्प्रभुः ।। 32

वृषो वृषपतिश्रीमान् देवगन्धर्वपूजितः ।
शिवज्ञानैकसम्पन्नः शिवसद्भावभावितः ।। 33

वृषशब्देन दिव्येन वृषः शान्तिं करोतु मे ।
ताक्ष्यासनश्चतुर्बाहुः शङ्खचक्रगदाधरः ।। 34

श्यामः पीताम्बरधरो वनमालाविभूषितः ।
यज्ञो देवोत्तमो देवो माधवो मधुसूदनः ।। 35

शिवप्रसादसम्पन्नः शिवध्यानपरायणः ।
शिवार्चनरतो नित्यं विष्णुः शान्तिं करोतु मे ।। 36

पद्मरागप्रभो देवी चतुर्वदन पङ्कजा ।
अक्षमालार्पितकराकमण्डलुधरा शिवा ।। 37

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ब्रह्माणी सौम्यवदना शिवपूजापरायणा ।
शान्तिं करोतु मे प्रीता ब्रह्मशब्देन निर्मला ।। 28

मयूरवाहना देवी सिन्दूरारुणविग्रहा ।
शक्तिहस्ता महारूपा सर्वाभरणभूषिता ।। 29

रुद्रभक्ता महापुण्या रुद्रार्चनरता सदा ।
कौमारी वरदा देवी क्षेमारोग्यं ददातु मे ।। 30

शङ्खचक्रगदाहस्ता श्यामा पीताम्बरप्रिया ।
चतुर्भुजा ताक्ष्यर्रथा वैष्णवी सुरपूजिता ।। 31

शिवार्चनरता भक्ता रुद्रैकगतमानसा ।
शान्तिंकरोतु मे नित्यं सर्वासुरविमर्दिनी ।। 32

हिमसेतुनिभा देवी महावृषभवाहिनी ।
त्रिशूलहस्ता वरदा नानाभरणभूषिता ।। 33

रुद्रभक्ता महावीर्या रुद्रार्चनरता सदा ।
चतुर्भुजा चतुर्वक्त्रा त्रिणेत्रा पापहारिणी ।। 34

आर्तिं हरतु मे प्रीता माहेशी नित्यमुज्ज्वला ।
वराहघोणविकटा वराहवरवाहना ।। 35

श्यामाङ्गा वरदा देवी शङ्खचक्रगदाधरा ।
तर्जयन्ती सदा विघ्नान् अर्चयन्ती सदाशिवम् ।। 36

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

वाराही वरदा देवी क्षेमारोग्यं ददातु मे ।
ऐरावतगजारूढा वज्रहस्ता महाबला ।। 37

नेत्राणां च सहस्रेण भूषिता काञ्चनप्रभा ।
ऐन्द्रदेवी सदाकालं शान्तिमाशु करोतु मे ।। 38

ऊर्ध्वकेशोत्कटा क्षामा निर्मांसस्नायुबन्धना ।
करालवदना घोरा खड्गखेटायुधोद्यता ।। 39

कपालमालिनी देवी क्रूरा खट्वाङ्गधारिणी ।
आरक्तपिङ्गनयना गजचर्मावगुण्ठिता ।। 40

नानानागपरीताङ्गी प्रेतोपरि निवासिनी ।
शिवरूपेण घोरेण शिवारावभयङ्करी ।। 41

चामुण्डा चण्डरूपेण चित्रा त्रासयते ननु ।
भूतप्रेतपिशाचेभ्यो मम रक्षां करो तु सा ।। 42

आकाशमातरो देव्यस्तथा भूलोकमातरः ।
भूतानां मातरः सर्वास्तथान्याः पितृमातरः ।। 43

सर्वमातृगणा देव्यः स्वायुधव्यग्रपाणयः ।
जगद्व्याप्यावतिष्ठन्त्यो बलिकामा महादयाः ।। 44

रुद्रभक्ता महावीर्या रुद्रार्चनपरायणाः ।
शान्तिं कुर्वन्तु मे नित्यं मातरः सुरपूजिताः ।। 45

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ये रुद्रा रौद्रकर्माणो रुद्रस्थाननिवासिनः ।
सौम्याश्चैव तु ये केचित् सौम्यस्थाननिवासिनः ।। 46

मातरो रुद्ररूपाश्च गणानामधिपाश्च ये ।
विघ्नभूतास्तथैवान्ये दशदिक्षु समाचि(श्रि)ताः ।। 47

सर्वे सुप्रीतमनसः प्रतिगृह्णन्त्विमं बलिम् ।। 48

ईश्वर उवाच

माध्यामद्यं च(?)शान्तिं सुत तति धनगो वाजिमातङ्गयूथे-
राष्ट्रे ग्रामे पुरे वा सुविहितमधुना शान्तिदाःसन्तु सर्वाः ।।

।। इति श्रीशिवरहस्ये एकादशाम्शो
शान्त्यध्यायो नाम
सप्तत्रिंशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। अष्टत्रिंशोऽध्यायः ।।

स्कन्द उवाच -

सिद्धिं पुष्णन्तु मे नित्यं भयेभ्यः पान्तु मां सदा ।
ऐन्द्र्यां दिशि गणा ये तु वज्रहस्ता महाबलाः ।। 1

सुपीताक्षा पीतनिभास्तथा वै पीतलोहिताः ।
दिव्यान्तरिक्षभौमाश्च पातालतलवासिनः ।। 2

रुद्रार्चनरता नित्यं शान्तिं कुर्वन्तु मे सदा ।
आग्नेय्यां ये गणाः सर्वे शक्तिहस्ता निषङ्गिणः ।। 3

शिवप्रणामपरमाः शान्तिं कुर्वन्तु मे सदा ।
याम्यां दिशि गणाः ये तु सततं दण्डपाणयः ।। 4

सुकृष्णाक्षाः कृष्णनिभास्तथा वै कृष्णलोहिताः ।
दिव्यान्तरिक्षभौमाश्च पातालतलवासिनः ।। 5

परमेशार्चनरताः शान्तिं कुर्वन्तु मे सदा ।
निर्ऋत्यां ये गणाः सर्वे राक्षसाः खड्गपाणयः ।। 6

सुनीलाक्षा नीलनिभास्तथा वै नीललोहिताः ।
दिव्यान्तरिक्षभौमाश्च पातालतलवासिनः ।। 7

रुद्रैकध्यान निरताः शान्तिं कुर्वन्तु मे सदा ।
वारुण्यां ये गणाः सर्वे सततं पाशपाणयः ।। 8

सश्यामाक्षाः श्यामनिभास्तथा वै श्यामलोहिताः ।
दिव्यान्तरिक्षभौमाश्च पातालतलवासिनः ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

परमेशार्चनरताः शान्तिं कुर्वन्तु मे सदा ।
वायव्यां ये गणाः सर्वे सततं ध्वजपाणयः ।। 10

सूधूम्राक्षा धूम्रनिभास्तथा वै धूम्रलोचनाः ।
दिव्यान्तरिक्षभौमाश्च पातालतलवासिनः ।। 11

शिवभक्तिपराः सर्वे क्षेमं कुर्वन्तु मे सदा ।
कौबेर्यां ये गणाः सर्वे सततं निधिपाणयः ।। 12

सुपीताक्षाः पीतनिभास्तथा वै पीतलोहिताः ।
दिव्यान्तरिक्षभोमाश्च पातालतलवासिनः ।। 13

शिवभक्तिपराः सर्वे क्षेमं कुर्वन्तु मे सदा ।
ईशान्यां ये गणाः सर्वे प्रशान्ताः शूलपाणयः ।। 14

सुसूक्ष्माक्षाः सूक्ष्मनिभास्तथा वै सूक्ष्मलोहिताः ।
दिव्यान्तरिक्ष भौमाश्च पातालतलवासिनः ।। 15

रुद्रप्रणामपरमाः शान्तिं कुर्वन्तु मे सदा ।
अघोभागे गणा ये तु सततं चक्रपाणयः ।। 16

सुधूम्राक्षा धूम्रनिभास्तथा वै धूम्रलोहिताः ।
दिव्यान्तरिक्षभौमाश्च पातालतलवसिनः ।। 17

शिवभक्तिरताः सर्वे शान्तिं कुर्वन्तु मे सदा ।
ऊर्ध्वं भागे स्थिता ये तु सततं पद्मपाणयः ।। 18

सुपद्माक्षाः पद्मनिभास्तथा वै पद्मलोहिताः ।
दिव्यान्तरिक्षभौमाश्च पातालतलवासिनः ।। 19

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शिवपूजासमायुक्ताः शान्तिं कुर्वन्तु मे सदा ।
एते गणा महात्मानो महाबलपराक्रमाः ।। 19

शिवं सम्पूज्य यत्नेन स्वं स्वं पदमवापिरे ।
ततः सुप्रीतमनसः शान्तिमायुर्बलं श्रियम् ।। 21

प्रयच्छन्त्वाशु मर्त्यानां तद्भक्तानां विशेषतः ।
नाम्नाऽमरावती पूज्या पूर्वभागे व्यवस्थिता ।। 22

विद्याधरगणाकीर्णा सिद्धगन्धर्वसेविता ।
रत्नप्राकाररचिता महारत्नोपशोभिता ।। 23

तत्र देवपतिः श्रीमान् वज्रहस्तो महाबलः ।
नेत्राणां तु सहस्रेण शोभनेन विराजितः ।। 24

ऐरावतगजारूढो हेमवर्णो महाद्युतिः ।
देवेन्द्रः परमो हृष्टः परमेशार्चने रतः ।। 25

शिवध्यानैकसम्पन्नः शिवभक्तिपरायणः ।
शिवभक्तैस्तथा चान्यैर्देवैरिह सहानुगैः ।। 26

शिवप्रणामपरमः करोतु मम शान्तिकम् ।
आग्नेय्यास्तु दिशोभागे पुरी तेजोवती शुभा ।। 27

नानादेवगणाकीर्णा रत्नज्वालासमाकुला ।
तत्र ज्वालापरीताङ्गो दीप्त्याङ्गारसमद्युतिः ।। 28

भूतिकृद्देहिनां देवो ज्वलनः पापनाशनः ।
शिवपूजासमायुक्तः शिवध्यानविभावितः ।। 29

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शान्तिं करोतु मे देवस्तथा पापपरिक्षयम् ।
वैवस्वतपुरीनाम दक्षिणस्यां व्यवस्थिता ।। 30

लोहप्राकारसंयुक्ता प्रासादैर्गोपुरैः शुभा ।
सुरासुरशतानीकपितृयक्षोरगालयः ।। 31

तत्रेन्द्रनीलसङ्काशो रत्नस्रग्वस्त्रभूषणः ।
खड्गपाणिर्महातेजाः करालवदनोज्जवलः ।। 32

राक्षसेन्द्रश्च निर्ऋतिः शिवार्चनरतः सदा ।
करोतु मे महाशान्तिं शिवभक्तिसमुत्सुकः ।। 33

पश्चिमे तु दिशो भागे पुरी शुद्धवती(शुद्धिमती) शुभा ।
नानारत्नसमाकीर्णा नानाकिन्नरसेविता ।। 34

तेजः प्राकारसङ्कीर्णा निरौपम्या सदोज्ज्वला ।
तत्र मौक्तिकसङ्काशः परिपिङ्गललोचनः ।। 35

श्वेतवस्त्रपरीधानः पाशहस्तो महाद्युतिः ।
वरुणः परया भक्त्या शिवैकाऽऽहितमानसः ।। 36

रोगशोकार्तिसन्तापं विनाशयतु मे सदा ।
वायव्ये तु दिशो भागे पुरीगन्धवती शुभा ।। 37

ऋषिसिद्धगणाकीर्णा हेमप्राकारतोरणा ।
तथा धूम्रेण देहेन कृष्णपिङ्गललोचनः ।। 38

पटवासान्तरालीनो ध्वजयष्ट्यायुधोज्ज्वलः ।
पवनः परमो देवः परमेश्वरभावितः ।। 39

क्षेमारोग्यबलं शान्तिं करोतु मम सर्वदा ।
महोदया नाम पुरी उत्तरेण व्यवस्थिता ।। 40

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अनेकयक्षसङ्कीर्णा नानारत्नोपशोभिता ।
तत्र देवो गदाहस्तश्चित्रस्रग्वस्त्रभूषणः ।। 41

ह्रस्वबाहुर्महातेजाः परिपिङ्गललोचनः ।
कुबेरः श्रीमुखः श्रीमान् हरपादार्चने रतः ।। 42

शान्तिं करोतु मे प्रीतः शमशान्तेन चेतसा ।
यशोवती पुरी रम्या ऐशान्यां दिशि संस्थिता ।। 43

नानागणसमकीर्णा नानाकृतसुरालया ।
तेजःप्राकारपर्यन्ता निरौपम्यगुणान्विता ।। 44

तत्र मौक्तिकसङ्काशः शशाङ्ककृतशेखरः ।
त्रिणेत्रः शान्तरूपात्मा ह्यक्षमालाधरो हरः ।। 45

ईशानः परमो देवः शिवध्यानैकतत्परः ।
सोऽपि सर्वात्मभावेन शान्तिमाशु करोतु मे ।। 46

शान्ताः शिवार्चनरताः शिवपादसक्ताः
युक्ता मखायुतफलैर्वरभस्मभूषाः ।
रुद्राक्षवक्षस इमे शिवलिङ्गभक्ता
एते मदर्चनफलेन गणातामुपेताः ।। 47

।। इति श्रीशिवरहस्ये एकादशाम्शे शान्त्यध्यायो नाम
अष्टत्रिंशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। एकोनचत्वारिंशोऽध्यायः ।।

ईश्वर उवाच -

भूलोके च भुवर्लोके स्वर्लोके च वसन्ति ये ।
देवदिव्यप्रभायुक्ताः शान्तिं कुर्वन्तु मे सदा ।। 1

महर्लोके जनोलोके तपोलोके च संस्थिताः ।
ते तु प्रमुदिता देवाः शान्तिं कुर्वन्तु मे सदा ।। 2

सत्यलोके च ये देवाः प्रभाज्वलितविग्राः ।
शिवभक्ताः सुमनसः भयार्तिं नाशयन्तु मे ।। 3

तपोलोके च ये देवाः शुद्धाः स्फटिकविग्रहाः ।
रुद्रभक्ता महात्मानः शिवं कर्वन्तु मे सदा ।। 4

जनोलोके च ये देवा धौतचामीकरप्रभाः ।
ईशानं प्रणता नित्यं शान्तिं कुर्वन्तु मे सदा ।। 6

भुवर्लोके च ये देवा भासयन्तो दिशो दश ।
शिवैकशरणा देवाः पापं प्रशमयन्तु मे ।। 7

गिरिकन्दरदुर्गेषु निवसन्ति च ये नराः ।
रुद्रार्चनरता नित्यं शान्तिं कुर्वन्तु मे सदा ।। 8

शरच्चन्द्रांशुगौरेण देहेनामिततेजसा ।
सरस्वती शिवे भक्ता शान्तिमाशु करोतु मे ।। 9

चारुचामीकरप्रख्या सरोजकरपल्लवा ।
शिवभक्ता च श्रीदेवी श्रीमद्भुक्तिं ददातु मे ।। 10

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

चारुणा मुखचन्द्रेण विचित्रकनकोज्ज्वला ।
जया देवी शिवे भक्ता सर्वान् कामान् ददातु मे ।। 11

हारेण सुविचित्रेण भास्वत्कनकमेखला ।
पराजिता रुद्रभक्ता करोतु विजयं मम ।। 12

सिन्दूरारुणवर्णेन देहेनायतलोचनः ।
सहस्त्रकिरणः श्रीमान् सप्तसप्तिकवाहनः ।। 13

गभस्तिमाली भगवान् शिवपादार्चने रतः ।
करोतु मे महाशान्तिं ग्रहपीडानिवारणम् ।। 14

जगदाप्यायनकरोऽप्यमृतांशुः सुशीतलः ।
सोमः सौम्येन भावेन ग्रहपीडां व्यपोहतु ।। 15

पद्मरागेण देहेन देवः पिङ्गललोचनः ।
अङ्गारकस्तु सततं रुद्रपूजापरायणः ।। 16

रुद्रसद्भावसम्पन्नो रुद्रध्यानैकतत्परः ।
ग्रहपीडाभयं सर्वं विनाशयतु मे सदा ।। 17

कुङ्कुमछविना श्रीमान् देहेनाऽऽरक्तपिङ्गलः ।
बुधोऽपि शिवधामात्मा ग्रहपीडां व्यपोहतु ।। 18

तप्तचामीकराभो यः सर्वज्ञानसुधालयः ।
बृहस्पतिः सदाकालमीश्वरार्चनतत्परः ।। 19

सोऽपि शान्तात्मचित्तेन परमेण समाधिना ।
ग्रहपीडां विनिर्जित्य करोतु विजयं मम ।। 20

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

हिमकुन्देन्दुतुल्याभोऽसुरदैत्येन्द्रपूजितः ।
शुक्रः शिवार्चको नित्यं ग्रहपीडां व्यपोहतु ।। 21

भिन्नाञ्जनसमच्छायः सुरक्तनयनद्युतिः ।
शनैश्चरः शिवे भक्तः ग्रहपीडां व्यपोहतु ।। 22

धूम्रायमाणः सततं सर्वोत्पातसमन्वितः ।
नीलाञ्जनसमः श्रीमान् सैह्मिकेयो महाद्युतिः । 23

शिवपूजारतो राहुः ग्रहपीडां व्यपोहतु ।
धूम्रायमाणः सततं सर्वोत्पातसमन्वितः ।। 24

शिवार्चनरतः केतुर्ग्रहपीडां व्यपोहतु ।
एते ग्रहा महात्मानः शिवार्चनपरायणाः ।। 25

शान्तिं कुर्वन्तु मे हृष्टाः सदाकालं हितैषिणः ।
मुखे यस्य स्थितो नित्यं व्युष्टिर्नाम महाबलः ।। 26

सुमुखो विघ्नकारी च पृष्ठे च विजयङ्करः ।
रुद्रप्रणामपरमः शान्तिमाशु करोतु मे ।। 27

तृतीया सप्तमी चैव दशमी च चतुर्दशी ।
चतुर्थी चाष्टमी चैव एकादशी च पूर्णिमा ।। 28

एता विघ्नकरा भक्ताः शुक्लकृष्णसमुद्भवाः ।
भवन्तु मे श्रियो नित्यं कुर्वन्तु विजयं सदा ।। 29

अमावास्या महापुण्या पितृदेवसमन्विता ।
शिवा ह्येषा तु परमा शिवस्य परमात्मनः ।। 30

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शिवतेजःसमायुक्ताः करोतु मम शान्तिकम् ।
प्रतिपद्वह्निसंयुक्ता अष्टमी रुद्रसंयुता ।। 31

नवमी तिथिरत्युग्रा दुर्गादेव्यधिदेवता ।
दशमी धर्मसंयुक्ता रुद्रेणैकादशीयुता ।। 32

द्वादशी विष्णुसंयुक्ता मदनेन त्रयोदशी ।
चतुर्दशी महेशेन पूर्णिमा तुहिनांशुना ।। 33

एतस्तु तिथयः सर्वा ईशानार्चनतत्पराः ।
शान्तिं कुर्वन्तु मे नित्यं सदाकालं हितैषिणः ।। 34

विष्कम्भः प्रीतिरायुष्मान् सौभाग्यं शोभनं तथा ।
अतिगण्डः सुकर्मा च धृतिः शूलस्तथैव च ।। 35

गण्डो वृद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा ।
वज्रंसिद्धिर्व्यतीपातो वरीयान् परिघः शिवः ।। 36

सिद्धः साध्यः शुभः शुभ्रो ब्राह्ममाहेन्द्रवैधृताः ।
चन्द्रस्य भानोरुत्पन्ना ये ते योगा महाबलाः ।। 37

शिवशक्तियुताः सर्वे शिवशक्तिविधायिनः ।
शान्तिं कुर्वन्तु मे नित्यं शिवध्यानपरायणाः ।। 38

कृत्तिका परमा देवी रोहिणी रुचिरानना ।
श्रीमान् मृगशिरा भद्रा आर्द्रा च परमोज्ज्वला ।। 39

पुनर्वसुस्तथा पुष्य आश्लेषा च महोज्ज्वला ।
नक्षत्रमातरो ह्येताः प्रभामालावभासकाः ।। 40

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

महादेवार्चनरता महादेवानुभाविताः ।
पूर्वभागे स्थिताश्चैताः शान्तिं कुर्वन्तु मे सदा ।। 41

मघा सर्वगुणोपेता पूर्वा चैव तु फल्गुनी ।
उत्तरा फल्गुनी चेष्टा हस्तचित्रस्थोत्तमा ।। 42

स्वाती विशाखा वरदा दक्षिणस्थानसंस्थिता ।
अर्चयन्त्यः सदा कालं देवं त्रिणयनं प्रभुम् ।। 43

ममापि शान्तिं चैवैताः कुर्वन्तु शिवचोदिताः ।
अनूराधा तथा ज्येष्ठा मूला बुद्धिसमत्विता ।। 44

पूर्वाषाढा महावीर्या आषाढात्युत्तरा शुभा ।
अभिजिन्नाम नक्षत्रं श्रवणं परमोत्तमम् ।। 45

एताः पश्चिमतो दीप्ताः राजन्त्यश्चारुमूर्तयः ।
ईशानं पूजयन्त्येताः सर्वकालं सुमैः शिवे ।। 46

प्रशान्तिं मम कुर्वन्तु विभूतिं च समाहिताः ।
श्रविष्ठा शतभिषक् चैव पूर्वा भाद्रपदा तथा ।। 47

उत्तरा भाद्ररेवत्यावश्विनी च महर्धिका ।
भरणी च महावीर्या नित्यमुत्तरतः स्थिताः ।। 48

शिवार्चनरता नित्यं शिवैकगतमानसाः ।
शान्तिं कुर्वन्तु मे नित्यं सर्वकालं सुखोदयाः ।। 49

अथ मेषो मृगाधीशो धनुर्दीप्तिमतां वरः ।
पूर्वेण भासयन्त्येते शिवपूजापरायणाः ।। 50

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शान्तिं कुर्वन्तु मे नित्यं बलं सौभाग्यमेव च ।
वृषः कन्या च वरदा मकरश्च महार्थकः ।। 51

हरपादरता नित्यं शिवभावेन भाविताः ।
एते दक्षिणदिक्संस्थाः पूजयन्ति सदाशिवम् ।। 52

भक्त्या च परया नित्यं शान्तिं कुर्वन्तु मे सदा ।
मिथुनं च तुलाकुम्भौ पश्चिमस्यां दिशि स्थिताः ।। 53

शिवपादार्चनरताः शान्तिं कुर्वन्तु मे सदा ।
कर्कटो वृश्चिको मीनो ह्येते उत्तरतः स्थिता ।। 54

यजन्त्येते सदा कालं रुद्रं भुवननायकम् ।
शान्तिं कुर्वन्तु मे नित्यं शिवज्ञानविधायिनः ।। 55

ऋषयः सत्य विख्याता ध्रुवान्ताः परमेज्ज्वलाः ।
भस्मरुद्राक्षभूषाढ्या त्रिपुण्ड्रपरिमण्डिताः ।। 56

शिवलिङ्गार्चनपरास्त्रिकालममितौजसः
कश्यपो गालवो गार्ग्यो विश्वामित्रो महामुनि ।
भृगुर्दक्षो वसिष्ठश्च मृकण्डुः पुलहः क्रतुः
नारदो मुनिरत्रिश्च भरद्वाजोऽङ्गिराः मुनिः ।। 58

वाल्मीकिः कौशिकः कर्णः शाकल्योऽथ पुनर्वसुः ।
शाकलायन(आश्वलायन)इत्याद्या मुनयोऽथ तपस्विनः ।।59

शिवध्यानार्चनोद्युक्ताः शान्तिं कुर्वन्तु मे सदा ।
ऋषिपत्न्यो महाभागाः ऋषिकन्याः कुमारकाः ।। 60

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शिवार्चनरता नित्यं शान्तिं कुर्वन्तु मे सदा
कुर्वन्तु शान्तिं विविधां सुरोत्तमाः ।
शिवार्चका भस्मत्रिपुण्ड्रभूषिताः ।
लिङ्गार्चकाः शाश्वतधर्मयुक्ताः
युक्ता भवन्त्येव शिवप्रसादात् ।।

।। इति श्रीशिवरहस्ये एकादशाम्शे
शान्त्यध्यायो नाम
एकोनचत्वारिंशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। चत्वारिंशोऽध्यायः ।।

ईश्वर उवाच -

सिद्धाश्च सिद्धतपसो गन्धर्वाप्सरसां गणाः ।
विद्याधरा महात्मानो गरुडश्च महार्थकः ।। 1

महेश्वरपरा ह्येते महेश्वरपदार्चकाः ।
सिद्धिमाशु प्रयच्छन्तु शिवधर्मपरायणाः ।। 2

नमुचिर्दैत्यराजेन्द्रः शम्भुपूजापरायणः ।
महानादोऽपि विख्यातो दैत्यः परमवीर्यवान् ।। 3

हाटकेश्वरदेवस्य नित्यं पूजापरायणः ।
बलं वीर्यं च मे क्षिप्रं प्रयच्छन्तु महार्थकाः ।। 4

महाजम्भोहयग्रीवः प्रह्लादो दैत्यपुङ्गवः ।
तारकाग्निमुखा दैत्या कालनेमिर्महाबलः ।। 5

एते दैत्या महात्मानः शिवसद्भावभाविताः ।
पुष्टिं बलं तथा वीर्यं प्रयच्छन्तु च मे सुखम् ।। 6

वैरोचनो हिरण्याक्षः सुपर्वा च सुलोमकः ।
मुचुकुन्दः सुकण्ठश्च दैत्यो रोचनकस्तथा ।। 7

भावेन परमेणाशु यजन्तः सर्वदा शिवम् ।
सततं शितभावेन पुष्टिं कुर्वन्तु मे सदा ।। 8

आरक्तेन शरीरेण रक्तान्तायतलोचनः ।
महाभोगकृताटोपः शङ्खाब्जकृतलाञ्छनः ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अनलो नागराजेन्द्रः शिवपादार्चने रतः ।
महापापविषं हृत्वा शान्तिमाशु करोतु मे ।। 10

सुखेन सुशरीरेण सुश्वेतोत्पलशेखरः ।
चारुभोगकृताटोपश्चारुहारविभूषणः ।। 11

वासुकिर्नागराजेन्द्रः शिवपादार्चने रतः ।
सर्वरोगविषं हृत्वा क्षेमारोग्यं ददातु मे ।। 12

अतिप्रीतेन देहेन प्रस्फुरद्भोगसम्पदा ।
तेजसा चातिदीप्तेन कृतस्वस्तिकलक्षणः ।। 13

नागेन्द्रस्तक्षकः श्रीमान्नागकोट्या समन्वितः ।
विषशस्त्रादिसन्तापं हत्वा शान्तिं करोतु मे ।। 14

पद्मवर्णेन देहेन पद्मपत्रायतेक्षणः ।
पद्मबिन्दुकृताभासो ग्रीवायामेकरेखया ।। 15

ख्यातः पद्मो महानागः शिवपादार्चनेरतः ।
करोतु मे महाशान्तिं महापापविषक्षयम् ।। 16

पुण्डरीकनिभेनापि देहेनामिततेजसा ।
शङ्खशूलाब्जरुचिरैर्भूषितो मूर्ध्नि बिन्दुभिः ।। 17

महापद्मोमहानागो हरपादार्चने रतः ।
विनिहत्य विषं घोरं शान्तिमाशु करोतु मे ।। 18

शङ्खपालः श्रिया दीप्तः शिवपादाब्जपूजकः ।
महाविषं महाघोरं शान्तिमाशु करोतु मे ।। 20

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अतिगौरेण देहेन चन्द्रार्धकृतशेखरः ।
दीप्तभोगः कृताटोपः शम्भुलक्षणलक्षितः ।। 21

गुलिको नागराजेन्द्रो नित्यं हरपरायणः ।
अपहृत्य विषं घोरं करोतु विषशान्तिकम् ।। 22

अन्तरिक्षे च ये नागा ये नागा भुवि संस्थिताः ।
पाताले संस्थिता नागाः सर्वेऽप्यत्र समन्विताः ।। 23

रुद्रपादार्चनोद्युक्ताः शान्तिं कुर्वन्तु मे सदा ।
नागिन्यो नागकन्याश्च तथा नागकुमारिकाः ।। 24

शिवभक्ताः सुमनसः शान्तिं कुर्वन्तु मे सदा ।
य इदं नाग संस्थानं कीर्तयेद्वा श्रृणोति वा ।। 25

न तं नागा विहिंसन्ति विषं नाक्रमते सदा ।
गङ्गा पुण्या महादेवी यमुना नर्मदा नदी ।। 26

गोमती चापि कावेरी वरुणा देवकी तथा ।
सर्वभूतपतिं देवं परमेशं महेश्वरम् ।। 27

पूजयन्ति सदा नद्यस्सदा तद्भावभाविताः ।
शान्तिं कुर्वन्तु मे नित्यं सदा पापपरीक्षकाः ।। 28

चन्द्रभागा महापुण्या नदी गोदावरी शुभा ।
सरयूः गण्डकी श्रेष्ठा कौशिकी च सरस्वती ।। 29

पम्पा वेगवती पुण्या श्रेष्ठा विष्णुनदी तथा ।
एता नद्यो महाभागाः शिवपादार्चने रताः ।। 30

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शान्तिं कुर्वन्तु मे नित्यं शिवध्यानैकमानसाः ।
नैरञ्जना नाम नदी शोणश्चापि महाह्रदः ।। 31

मन्दाकिनी च परमा सदा सन्निहिता शुभा ।
एताश्चान्या महानद्यो भूमिदिव्यन्तरिक्षगाः ।। 32

रुद्रार्चनपरा नद्यः कुर्वन्तु मम शान्तिकम् ।
गुह्यानि यानि तीर्थानि आसमुद्रात्सरांसि च ।। 33

कुर्वन्तु शान्तिकं तानि कीटकाधिष्ठितानि च ।
महावैश्रवणो देवो यक्षराजो महार्धिकः ।। 34

यक्षकोटिपरीवारः यक्षाऽसङ्ख्येय संयुतः ।
महाविभवसम्पन्नो हरपादार्चने रतः ।। 35

शान्तिं करोतु मे प्रीतः पद्मपत्रायतेक्षणः ।
माणिभद्रो महायक्षो मणिरत्नविभूतः ।। 36

मनोहरेण हारेण कण्ठलग्नेन राजते ।
शिवध्यानपरो नित्यं शिवपादाब्जपूजकः ।। 37

शान्तिं करोतु मे नित्यं सर्वरोगनिवारणम् ।
यक्षिणी यक्षकन्याभिः परिवारितविग्रहा ।। 38

रुद्रार्चनरता नित्यं करोतु मम शान्तिकम् ।
सुवीरो नाम यक्षेन्द्रो मणिकुण्डलभूषणः ।। 39

ललाटहेमपट्टेन शोभनेन विराजितः ।
बहुयक्षसमाकीर्णो यक्षैर्नमितविग्रहः ।। 40

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शिवपूजारतो नित्यं करोतु मम शान्तिकम् ।
पञ्चगो नाम यक्षेन्द्रः कर्णिकाकटकोज्ज्वलः ।। 41

मकुटेन विचित्रेण केयूराभ्यां विराजितः ।
यक्षकन्यासमायुक्तो यक्षकोटिसमन्वितः ।। 42

हरार्चनरतः श्रीमान् करोतु मम शान्तिकम् ।
श्रीमान् विभण्डको यक्षो नानारत्नविभूषितः ।। 43

चारुकुण्डलयुग्मेन कर्णे नित्यं विराजितः ।
यक्षेन्द्रो यक्षनमितो यक्षसेनापतिर्बुधः ।। 44

हरपादार्चनरतः करोतु मम शान्तिकम् ।
धृतराष्ट्रो महातेजाः यक्षो यक्षाधिपः प्रभुः ।। 45

दिव्यपट्टांशुकछन्नो मणिकाञ्चनभूषणः ।
शिवप्रसादसमपन्नः करोतु मम शान्तिकम् ।। 46

शिवप्रसादसम्पन्नः करोतु मम शान्तिकम् ।
पूर्णभद्रो महायक्षो सर्वालङ्कारभूषितः ।। 47

रत्नदीप्तेन देहेन पट्टेनातिविराजितः ।
यक्षकोटिसहस्रेण परिवारितविग्रहः ।। 48

रुद्रप्रणामपरमो रुद्रभक्तिसमन्वितः ।
रुद्रार्चनसमायुक्तः करोतु मम शान्तिकम् ।। 49

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सूत उवाच -

शान्तिं कुर्वन्तु सर्वे हरपदकमलोदारभावैक भृङ्गा
यक्षास्त्र्यक्षपदाम्बुजार्चनरता नागाःसदा पान्तु माम् ।
सद्योजातप्रियाभिः गिरिवरजनिता पुण्यनद्योऽपि सद्यः
पापं मे प्रविनाशयन्तु सततं शर्वार्चनासूद्यताः ।। 50

।। इति श्रीशिवरहस्ये एकादशांशे
शान्त्यध्यायो नाम नाम
चत्वारिंशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। एकचत्वारिंशोऽध्यायः ।।

ईश्वर उवाच -

विरूपाक्षश्च यक्षेन्द्रः श्वेतवासा महाद्युतिः ।
चारुकाञ्चनमालाभिः किङ्किणीरवकाञ्चितः ।। 1

विभूषितः सदाकालं वरदानैकतत्परः ।
रुद्रपूजाकरो नित्यं करोतु मम शान्तिकम् ।। 2

अन्तरिक्षे च ये यक्षा ये यक्षाः सर्वसंस्थिताः ।
गिरिकन्दरदुर्गेषु ये यक्षा भूतिवासिनः ।। 3

पातालवासिनो यक्षा नानारूपायुधोद्यताः ।
शिवभक्ताः सुमनसः शिवपूजासमुत्सुकाः ।। 4

शान्तिं कुर्वन्तु मे हृष्टाः शान्ताः शान्तेन तेजसा ।
यक्षिण्यो विविधाकारास्तथा यक्षकुमारकाः ।। 5

यक्षकन्या महाभागाः शिवध्यानैकतत्पराः ।
शान्तिं स्वस्त्ययनं क्षेमं बलं कल्याणमेव च ।। 6

सिद्धिमाशु प्रयच्छन्तु नित्यमेव समाहिताः ।
पर्वताः सर्वतः सर्वे पर्वत्यश्च महर्धिकाः (?) ।। 7

शिवभक्ताः सुमनसः शान्तिं कुर्वन्तु मे सदा ।
समुद्राः सरितः सर्वे सागराश्च महर्धिकाः ।। 8

रत्नगर्भाश्च विविधा ये चान्ये सागरा भुवि ।
रुद्रपूजापरा नित्यं कुर्वन्तु मम शान्तिकम् ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

राक्षसाः सर्वतः सर्वे राक्षसा घोरारूपिणः ।
राक्षसा ये महावीर्या राक्षसाश्च महाबलाः ।। 10

स्थलस्था राक्षसा ये च अन्तरिक्षे च राक्षसाः ।
पाताले राक्षसा ये तु नित्यं रुद्रार्चने रताः ।। 11

भैरवं यस्य रूपं तु प्रेतभस्मावगुण्ठितम् ।
अनेकरूपधारिण्यो डाकिन्यश्च महाबलाः ।। 12

अन्तरिक्षगता याश्च डाकिन्यः स्वर्गसंस्थिताः ।
पाताले भूतले याश्च गिरिदुर्गेषु याः स्थिताः ।। 13

रुद्रप्रणामपरमा रुद्रपूजापराः स्थिताः ।
तृतीयं लोचनं खड्गं त्रिशूलं करपल्लवे ।। 14

तेजसा तस्य देवस्य शान्तिं कुर्वन्तु मे सदा ।
सर्वतो भूतरूपाढ्या महाभूता महोज्ज्वलाः ।। 15

सर्वभूतस्थिताः सौम्याः सर्वे भूता मनोजवाः ।
अन्तरिक्षे च ये भूता ये भूता भुवि संस्थिताः ।। 16

पाताले भूतले भूता ये च भूतास्त्रिधामकाः ।
खट्वाङ्गं यस्य विमलं कपालं करपल्लवे ।। 17

तेजसा तस्य देवस्य शान्तिं कुर्वन्तु मे सदा ।
प्रेताः प्रेतगणाः सर्वे सुप्रीताः सर्वतोमुखम् ।। 18

अन्तरिक्षे च ये प्रेता ये प्रेता दिवि संस्थिताः ।
पाताले भूतले चैव ये प्रेताः कामरूपिणः ।। 19

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

स्मशानं निलयो यस्य वृषभो यस्य वाहनम् ।
तेजसा तस्य देवस्य शान्तिं कुर्वन्तु मे सदा ।। 20

ये पिशाचा महावीर्या ये पिशाचा महर्धिकाः ।
ये पिशाचा भीषणाश्च पिशाचाः कामरूपिणः ।। 21

नानारूपधराः सर्वे सर्वे सत्वगुणोत्तराः ।
अन्तरिक्षे पिशाचा ये स्वर्गे ये च पिशाचकाः ।। 22

भूतले ये पिशाचा ये पातालतलवासिनः ।
चन्द्रार्धं मस्तके यस्य यस्य भस्म विभूषणम् ।। 23

तेजसा तस्य देवस्य शान्तिं कुर्वन्तु मे सदा ।
अपस्मारग्रहाः सर्वे सर्वे चापि ज्वरग्रहाः ।। 24

गर्भबालग्रहा ये तु नानारोगग्रहाश्च ये ।
अन्तरिक्षे ग्रहा ये च स्वर्गे ये च ग्रहोत्तराः ।। 25

पाताले भूतले ये च ये ग्रहाः सर्वतो दिशः ।
कण्ठे यस्य महानीलं भूषणं यस्य पन्नगाः ।। 26

तेजसा तस्य देवस्य शान्तिं कुर्वन्तु मे सदा ।
इति देवादयः सर्वे शिवज्ञानविधायिनः ।। 27

कुर्वन्तु शान्तिं जगतः शिवपक्तेषु सर्वदा ।
शिवज्ञानपरो भूत्वा स्तुत्वैवं शिवभक्तकान् ।। 28

शिवध्यानपरो भूत्वा एतत्स्तोत्रमुदीरयेत् ।
इत्युक्त्वा देवदेवस्य सन्निधौ नन्दिकेश्वरः ।। 29

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कृताञ्जलिपुटो भूत्वा देवं तुष्टाव हृष्टधीः ।

नन्दिकेश्वर उवाच -

जयात्मयोगसंस्थाय जय संशुद्धचेतसे ।। 30

जयदानेकरूपाय जयेशाय नमोऽस्तु ते ।
जयोत्तमाय देवाय जयकल्याणरूपिणे ।। 31

जय प्रणष्टमोहाय जयाजय्याय ते नमः ।
जय शर्वाय देवाय सर्वेशाय महात्मने ।। 32

जयलक्ष्मीविधानाय जय कीर्तिविधायिने ।
जय वाक्यविशुद्धाय अतीताय नमो नमः ।। 33

जय विष्विन्द्रवन्द्याय शिवशान्ताय ते नमः ।
जय विज्ञानशुद्धाय सर्वव्यापिन्नमो नमः ।। 34

जय कान्तार्धदेहाय जय चन्द्रार्धधारिणे ।
जय देवाधिदेवाय जय रुद्राय ते नमः ।। 35

जय त्रिभुवनेशाय जय विख्यातमूर्तये ।
जयाधाराय शर्वाय जगत्कर्त्रे नमो नमः ।। 36

जय निर्मलदेहाय जय सर्वार्थदायिने ।
जय भर्त्रे च हन्त्रे च जय त्रिपुरभेदिने ।। 37

जय मन्मथनाशाय सर्वेशाय नमो नमः ।

स्कन्द उवाच -

जैगीषव्य महाभाग शिवप्रोक्ताश्च शान्तयः ।। 30

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सर्वेषां शान्तिकाध्यायान् श्रुत्वा भक्तियुताश्च ये ।
इत्येवं शान्तिकाध्यायं यः पठेच्छृणुयादपि ।। 39

विधूय सर्वपापानि शिवलोके महीयते ।
कन्यार्थी लभते कन्यां जयार्थी जयमाप्नुयात् ।। 40

मोक्षार्थी लभते मोक्षं धनार्थी धनमाप्नुयात् ।
अर्थकामो लभेदर्थं पुत्रकामो बहून् सुतान् ।। 41

विद्यार्थी लभते विद्यां योगार्थी योगमाप्नुयात् ।
राज्यार्थी लभते राज्यं ग्रामार्थी ग्राममाप्नुयात् ।। 42

गर्भिणी लभते पुत्रं कन्या विन्दति सत्पतिम् ।
यो यान् कामयते कामान् मानवः श्रवणादिह ।। 43

तत्सर्वं शीघ्रमाप्नोति देवानां च प्रियो भवेत् ।
श्रुत्वाऽध्यायमिमं पुण्यं सङ्ग्रामं प्रविशेन्नृपः ।। 44

स निर्जित्याशु शत्रून् वै कल्याणैः परिपूर्यते ।
अक्षयं मोदते कालं अतिरस्कृतशासनः ।। 45

सर्वव्याधिविनिर्मुक्तः पुत्रपौत्रैः प्रतिष्ठितः ।
शान्त्यध्यायमिमं पुण्यं उद्दिश्यापि सकृत्पठेत् ।। 46

तस्य रोगा न बाधन्ते वातपित्तादिसम्भवाः ।
नाऽकालमरणं तस्य सर्पैश्चापि न दश्यते ।। 47

विषं नाक्रमते देहे न जडत्वं न मूकता ।
नोपसर्गभयं तस्य नचोत्पातभयं तथा ।। 48

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नाभिचारकृतैर्दीर्घैर्लिप्यते स कदाचन ।
सर्वकामसमृद्धार्थो यः पठेत्तु दिने दिने ।। 49

नित्यमूर्जितभक्त्या च *व्याघातादि विवर्जितः ।
यत्पुण्यं सर्वतीर्थानां गङ्गादीनां विशेषतः ।। 50

यत्पुण्यं कोटिगुणितं प्राप्नोति श्रवणादिह ।
दशानां राजसूयानां अग्निष्टोमशतस्य च ।। 51

श्रवणात्फलमाप्नोति कोटिकोटिगुणोत्तरम् ।
कोटिजन्मसु यत्पुण्यं जनार्दनसुपूजया ।। 52

तत्पुण्यं कोटिगुणितं प्राप्नोति श्रवणादिह ।
अवध्यः सर्वभूतानां अन्येषां च विशेषतः ।। 53

जीवेद्वर्षशतं साग्रं सर्वव्याधिविवर्जितः ।
गोघ्नश्चैव कृतघ्नश्च भ्रूणहा गुरुतल्पगः ।। 54

शरणागतघाती च मित्रविश्वासघातकः ।
दुष्टपापसमाचारः मातृहा पितृहा तथा ।। 55

श्रवणादस्य भावेन मुच्यते सर्वपातकैः ।
शान्त्यध्यायमिमं पुण्यं न देयं यस्य कस्यचित् ।। 56

शिवभक्ताय दातव्यं शिवेन कथितं पुरा ।
नित्यमूर्जितभक्तिश्च भक्तिव्याघातवर्जितः ।। 57

---

* दुर्गव्याघातवर्जितः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सर्वकामसमृद्धार्थो यः पठेत्तु दिने दिने ।
तस्माद् भक्त्या पुण्यदोऽयं श्रोतव्यः शिवमिच्छता ।। 58

ईश्वर उवाच -

शान्त्यध्यायवरान् शिवे हृदि गतान् कुर्वन् स शान्तिं लभेत्
रोगाणामयुतात् तथा नृपभयाद्भूपोऽपि मुक्तो भवेत् ।
चोरारिप्रभवादथोग्रहभवापस्मारदोषाद् ग्रहै-
सद्यो मुच्यत एव शान्तिकजपाद्भतोऽथ मुक्तो भवेत् ।। 59

युक्ता एव भवन्ति शुद्धहृदया मय्येव सक्ताः शिवे
शश्वत्ते भुवनावने द्विजवराःस्वालोकने किम्पुनः ।
व्यक्ताव्यक्तगतीषु तेषु सुलभो मोक्षोऽक्षताङ्गेषु वै
वक्तव्यं किमुमासहाय चरणाम्भोजप्रभावादराः ।। 60

।। इति श्रीशिवरहस्ये एकादशाम्शो
शान्त्यध्यायफलकथनं नाम
एकचत्वारिंशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। द्विचत्वारिंशोऽध्यायः ।।

स्कन्द उवाच -

ये स्मरन्ति सदाकालमीशानं पूजयन्ति वा ।
रुद्रलोकात्परिभ्रष्टा विज्ञेयास्ते गणेश्वराः ।। 1

अग्निहोत्राश्च वेदाश्च यज्ञाश्च बहुदक्षिणाः ।
शिवलिङ्गार्चनस्यैव कोट्यंशेनापि नो समाः ।। 2

सदा यजति यज्ञेन सदा दानं प्रयच्छति ।
सदा स वायुभक्षः स्यात् सदा योगं चरेदपि ।। 3

यः शिवं पूजयेन्नित्यं प्रणमेद्वापि भक्तितः ।
तस्य योगं च मोक्षं च शिवः प्रीतः प्रयच्छति ।। 4

यः कुर्यादर्चनं मासमेकाहारो जितेन्द्रियः ।
स यत्फलमवाप्नोति न तत्सर्वैर्महामखैः ।। 5

पौर्णमास्याममावास्यां चतुर्दश्यष्टमीषु च ।
(पूर्णिमायाममायां च चतुर्दश्यष्टमीषु च ।)
स्नापयित्वाम्भसा नित्यं सर्वयज्ञफलं लभेत् ।। 6

कृष्णपक्षे त्रयोदश्यामुपोष्य परमेश्वम् ।
प्रातर्मध्याह्नयोः पूजां चतुर्दश्यां समारभेत् ।। 7

पञ्चगव्यं सकृत्पीत्वा हविर्भुञ्जीत वाग्यतः ।
दशानामश्वमेधानां फलं प्राप्नोति मानवः ।। 8

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कृष्णाष्टम्यामुपोष्याथ शङ्करं योऽर्चयेत्तु सः ।
प्राप्नोति परमं स्थानं यत्र देवो महेश्वरः ।। 9

ब्रह्मचारी शुचिर्भूत्वा त्रिसन्ध्यं योऽर्चयेच्छिवम् ।
त्रिसप्तकुलमुद्धृत्य शिवलोके महीयते ।। 10

दानोपवासनियमैः पूजाजागरभोजनैः ।
महास्नानादिविधिना शिवं पर्वसु पूजयेत् ।। 11

यावच्च सर्वकालेषु यावदर्चयते शिवम् ।
तावत्कालार्चनं पुण्यं तावत्कालार्चनाल्लभेत् ।। 12

स्नात्वा पर्वसु यत्नेन यथाविभवविस्तरैः ।
पूजनीयः शिवो नित्यं महापुण्यजिगीषया ।। 13

नैरन्तर्येण षण्मासान् विधिना पूज्य शङ्करम् ।
पुण्यं तदेव लभते त्रिकालं विषुवार्चनात् ।। 14

एवमेव फलं ज्ञेयं ग्रहणायनयोरपि ।
सङ्क्रान्तौ च दिने छिद्रे षडशीतिमुखेषु च ।। 15

मासैश्चतुर्भिर्यत्पुण्यं विधिना पूज्य शङ्करम् ।
तत्कार्तिक्या भवेत्पुण्यं पौर्ममास्यां शिवार्चनात् ।। 16

पुण्यं तदेतत्फाल्गुन्याममसायामेवमेव च ।
चातुर्मास्यार्चनादेतन्महत्पुण्यफलं भवेत् ।। 17

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

माघमासे समुद्दिश्य त्रिसन्ध्यमर्चयेच्छिवम् ।
लभेत् षाण्मासिकं पुण्यं मासेनैव न संशयः ।। 18

यथा माघे तथाऽऽषाढे मासे चैव तु कार्तिके ।
त्रिषु पुण्यं समं ज्ञेयं मासेष्वेतेषु यत्कृतम् ।। 19

चातुर्दश्याममायां च पौर्णमास्यां च पाक्षिकम् ।
पुण्यमष्टगुणं ज्ञेयमष्टम्यामर्चयेच्छिवम् ।। 20

यः प्रदद्याद्गवां लक्षं दोग्ध्रीणां वेदपारगे ।
एकाहं योऽर्चल्लिङ्गं तस्य पुण्यं ततोऽधिकम् ।। 21

मासे मासे तु योऽश्नीयाद्यावज्जीवं सकृन्नरः ।
यश्चार्चयेत्सकृल्लिङ्गं सममेव न संशयः ।। 22

एतेन क्रमयोगेन पुण्यवृद्धिर्दिने दिने ।
यः पुनः सङ्गमुत्सृज्य इदमब्दं प्रपूजयेत् ।। 23

नैरन्तर्याच्छतगुणं तस्य पुण्यविवृद्धये ।
पञ्चाशद्गुणितं पुण्यमब्दोर्ध्वं योऽर्चयेच्छिवम् ।। 24

ऋतावृतौ तदर्धं स्यान्मासे मासे तदर्धकम् ।
मासार्धमपि यो लिङ्गं नैरन्तर्येण पूजयेत् ।। 25

पुरुषोत्तमः शिवो ज्ञेयो नैरन्तर्यं हि दुष्करम् ।
प्रातरुत्थाय यो लिङ्गं सकृद्भक्त्या प्रपूजयेत् ।। 26

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कपिलानां शतं दत्वा यत्पुण्यं तदवाप्नुयात् ।
मध्यं दिनकरे प्राप्ते यो लिङ्गं पूजयेन्नरः ।। 27

सम्पूर्णां पृथिवीं दत्वा यत्पुण्यं तदवाप्नुयात् ।
वारुणीमाश्रिते सूर्ये यः शिवं सम्प्रपूजयेत् ।। 28

गवां शतसहस्रस्य दत्तस्य फलमाप्नुयात् ।
यो लिङ्गमर्धरात्रे तु शुचिर्भूत्वा प्रपूजयेत् ।। 29

अग्निष्टोमसहस्रस्य धर्मस्य लभते फलम् ।
एवं वेलासु सर्वासु अवेलास्वापि शङ्करम् ।। 30

सम्पूजयेन्नरो भक्त्या सर्वान् कामानवाप्नुयात् ।
शिवलिङ्गं महापुण्यं सर्वदेवनमस्कृतम् ।। 31

यः स्पृशेदपि पाणिभ्यां न स पापैः प्रलिप्यते ।
न ते भूयः प्रयास्यन्ति योनिमार्गं सुकण्टकम् ।। 32

क्रमान्मोक्षं गमिष्यन्ति ये नरा लिङ्गमाश्रिताः ।
काञ्चनं मेरुमात्रं च सर्वां दत्वा वसुन्धराम् ।। 33

सागरान् वस्तुपूर्णांश्च न लिङ्गार्चयितुः समम् ।
मेरुमन्दरतुल्योऽपि राशिः पापस्य कर्मणः ।। 34

ईश्वरं वैद्यमासाद्य नश्यते दुष्टरोगवत् ।
शिवार्चनरतो नित्यं महापातकसंयुतैः ।। 35

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

दोषैः कृतैर्न लिप्येत पद्मपत्रमिवाम्भसा ।
छित्वा छित्वा च भूतानि हत्वा सर्वमिदं जगत् ।। 36

यजेदेकं विरूपाक्षं न स पापैः प्रलिप्यते ।
सर्वावस्थां गतो वापि युक्तो वा सर्वपातकैः ।। 37

शिवमिष्ट्वा नरः सोऽपि प्रयाति परमां गतिम् ।
शिवं सर्वत्र सम्पूज्य सविशेषं सविस्तरम् ।। 38

अश्वमेधायुतं पुण्यं लभते नात्रसंशयः ।
सरित्समुद्रतीरेषु पर्वतेषु वनेषु च ।। 39

गिरिकन्दरदुर्गेषु गह्वरेषु वनेषु च ।
पुष्करिण्यां तथाऽन्यत्र तीर्थायतनसंश्रये ।। 40

यत्र वा रमते बुद्धिस्तत्रैव शिवमर्चयेत् ।
सर्वयज्ञेषु यत्पुण्यं लभते नात्र संशयः ।। 41

यः समर्चयते भक्त्या तस्य पुण्यं ततोऽधिकम् ।
अतो विनापि मन्त्रेण पुण्यराशिः प्रकीर्तितः ।। 42

स्यादयं मन्त्रसंयुक्तः पुण्यं शतगुणाधिकम् ।
तस्मान्मन्त्रेण शर्वाय स्नानगन्धफलादिकम् ।। 43

भूम्यश्वरथवस्त्रं च हेमाद्यादि निवेदयेत् ।
जप्यो नमः शिवायेति मन्त्रः सर्वार्थसाधकः ।। 44

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सर्वमन्त्राधिकश्चायं ओङ्काराद्यः षडक्षरः ।
शिवो नान्तर्बहिर्यस्माद् व्याप्तं सर्वं चराचरम् ।। 45

जगदोमिति यद् ब्रूते तस्मादोमिति स स्मृतः ।
अयमर्थो हि तिसृभिर्मातृभिः परिगीयते ।। 46

ब्रह्मा हरिश्च रुद्रश्च मातृभिस्तत्प्रकीर्तिताः ।
दक्षिणाङ्गे भवेद्ब्रह्मा हरिर्वामाङ्गसम्भवः ।। 47

हृदयान्निर्गतो रुद्रो ब्रह्मविष्णुप्रबोधकः ।
जगत्सृष्टिकरो ब्रह्मा विष्णुर्लोकविमोहनः ।। 48

अनुग्रहपरो नित्यं नीलरुद्रः शिवात्मकः ।
त्रिभिरेतैर्जगद् व्याप्तं कारणैरात्ममूर्तिभिः ।। 49

शिवस्य मातरश्चैताः सर्वलोकप्रपूजिताः ।
एता एव त्रयो वेदास्त्रयो लोकास्त्रयो गुणाः ।। 50

त्रयोऽग्नयः त्रिवर्गश्च यच्चान्यज्जगति स्थितम् ।
अर्धमात्रापरो रुद्रः शिवः परमकाराणः ।। 51

तस्मादेतत्समुत्पन्नं जगतः कारणत्रयम् ।
सर्वयज्ञपरः शुद्धो नमस्कारो महामखः ।। 52

नमस्कारात्मयज्ञेन तस्मात्सम्पूजयेच्छिवम् ।
अज्ञानमशिवं त्वस्य सर्वदुःखालयं यतः ।। 53

स्वभावात्तदपायो हि तस्माद्बुदः परः शिवः ।
नमः शिवाय शान्ताय कारणत्रयहेतवे ।। 54

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

निवेदयामि चात्मानं मुक्त्यै च परमेश्वरम् ।
उक्त्वा नमः शिवायेति मुच्यते सर्वबन्धनात् ।। 55

यस्मात्तस्मात्सदा मन्त्रं ओंकाराद्यं मनुं स्मरेत् ।
सर्वदा सर्वकार्येषु क्षुतनिष्ठो वनादिषु ।। 56

धन्यो नमः शिवायेति गिरमुक्त्वा शिवं पदम् ।
यः सर्ववित्प्रबुद्धात्मा प्राणान्ते तु सकृत्स्मरेत् ।। 57

भक्त्यों नमः शिवायेति स गच्छेत्परमां गतिम् ।
पाठ्येनापि नमस्कारः प्रयुक्तः शूलपाणये ।। 58

संसारस्थर्णबन्धानामुच्छेदनकरो भवेत् ।
अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।। 59

यः स्मरेत्संयतो नित्यं स बाह्याभ्यन्तरः शुचिः ।
स्मरणादेव रुद्रस्य पापसङ्घातजं परम् ।। 60

शतधा भेदमायाति गिरिर्वज्रहतो यथा ।
सर्वेषां शिवभक्तानां अशेषार्थप्रसिद्धये ।। 61

मन्त्रमाह शिवः साक्षादशेषार्थनिबन्धनम् ।
सद्बीजं सर्वविद्यानां आद्यं ब्रह्म परात्परम् ।। 62

सर्वसाधनको मन्त्रः शिवसूत्रं षडक्षरः ।
तस्मादनेन मन्त्रेण प्रकुर्वीत शिवार्चनम् ।। 63

तत्र देशे न दुर्भिक्षं न च मारी प्रवर्तते ।
नाकाले म्रियते कश्चित् पूज्यते यत्र शङ्करः ।। 64

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

दीक्षितः सूत्रमन्त्रज्ञो योऽर्चयेत्तु सदाशिवम् ।
स च यत्फलमाप्नोति तदेकाग्रमनाः शृणु ।। 65

ईश्वर उवाच -

यः पूजयेच्छशिकलाऽमलमौलि लिङ्गं
भस्माक्षधृत् प्रथितपर्वसु शर्वमेकम् ।
सर्वैश्च पातकवरैः स विमुक्त ईशे
संसारघोरविषसर्पमुखाभिलग्नः ।। 66

।। इति श्रीशिवरहस्ये एकादशांशे
पर्वपूजाकथनं नाम
द्विचत्वारिंशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। त्रिचत्वारिंशोऽध्यायः ।।

ईश्वर उवाच -

सर्ववेदेषु सत्प्रोक्तं सर्वयज्ञेषु यत्फलम् ।
तत्फलं कोटिगुणितं लभते नात्र संशयः ।। 1

यः शिवं पूजयेन्नित्यमन्त्यजोऽपि जितेन्द्रियः ।
भावेन तु समायुक्तः स गच्छेत्परमां गतिम् ।। 2

*नोपनीतसहस्रेभ्यो ब्रह्मचारी विशिष्यते ।
ब्रह्मचारिसहस्रेभ्यो वेदाध्यायी विशिष्यते ।। 3

वेदाध्यायिसहस्रेभ्यो ह्यग्निहोत्री विशिष्यते ।
अग्निहोत्रिसहस्रेभ्यो यज्ञयाजी विशिष्यते ।। 4

यज्ञयाजि सहस्रेभ्यः सर्वविद्यार्थपारगः ।
सर्वविद्यार्थवित्कोट्याः शिवभक्तो विशिष्यते ।। 5

तस्मादेव शिवं भक्त्या पूजयेच्छान्तमानसः ।
शिवभक्तो जितक्रोधः शिवभक्तिपरायणः ।। 6

मैत्रीकारुणिकोजस्रं प्राप्नोति सततं शिवम् ।
क्षणार्धेनापि यत्पुण्यं कुर्यान्मित्रेषु भावितः ।। 7

न तद्वर्षशतेनापि तपोयज्ञशतैरपि ।
सर्वप्राणिषु कारुण्यादीनाऽनाथेषु भावयेत् ।। 8

---

* नोपनीतसहस्रेभ्यः - अनुपनीतसहस्रेभ्यः । न शब्देन सामासः न तु नञा ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सर्वप्राणिषु मैत्रीस्यान्मुदिता पुण्यशालिषु ।
अपुण्यवत्सु चोपेक्षात्(?)सर्वेषां च वदेच्छिवम् ।। 9

इत्येवं पञ्चधा चित्तं भावयिता यजेच्छिवम् ।
सम्पूज्य पशुभर्तारं प्रहृष्टेनान्तरात्मना ।। 10

ध्यानं कुर्यादथोच्छिष्टं सर्वपापनिकृन्तनम् ।
कृताञ्जलिपुटो भूत्वा स्तोत्रमेतज्जपेन्नरः ।। 11

स्तुताय स्तुतिरूपाय स्तूयमानाय सर्वदा ।
स्तुतिहेतुनिधानाय(निदानाय)नमस्त्रिणयनाय ते ।। 12

देवाय दिव्यरूपाय नमो दिव्यतमाय ते ।
पराय परमेशाय परमार्थैकहेतवे ।। 13

परापरविमुक्ताय नमः परतराय ते ।
पूज्याय पूज्यपूज्याय सर्वपूज्यैकहेतवे ।। 14

पूज्यानामपि पूज्याय नमः पूज्यतमाय ते ।
नित्याय नित्यनित्याय सर्वनित्यैकहेतवे ।। 15

नित्यानामपि नित्याय नमो नित्यतमाय ते ।
दीप्ताय दीप्तदीप्ताय सर्वदीप्त्येकहेतवे ।। 16

दीप्तनामपि दीप्ताय नमो दीप्ततमाय ते ।
साराय साररूपाय सर्वसारैकहतवे ।। 17

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सारारणामपि साराय नमः सारतराय ते ।
शान्ताय शान्तरूपाय सर्वशान्त्येकहेतवे ।। 18

शुद्धानामपि शुद्धाय नमः शुद्धतमाय ते ।
कालाय काल रूपाय सर्वकालैकहेतवे ।। 19

कालानामपि कालाय नमः कालतमाय ते ।
सर्वमन्त्रशरीराय सर्वमन्त्रैकहेतवे ।। 20

मन्त्राणामपि मन्त्राय नमो मन्त्रतमाय ते ।
व्योमप्रमाणरूपाय ईशानाय नमो नमः ।। 21

व्योमप्रमाणभासाय अघोराय नमो नमः ।
व्योमप्रमाणसद्याय सद्योजाताय ते नमः ।। 22

व्योमप्रमाणविद्याय विद्येशाय नमो नमः ।
व्योमप्रमाणकालाय कालेशाय नमो नमः ।। 23

व्योमप्रमाणधर्माय धर्मेशाय नमो नमः ।
व्योमप्रमाणभोगाय भोगेशाय नमो नमः ।। 24

व्योमप्रमाममोक्षाय मोक्षेशाय नमो नमः ।
व्योमप्रमाणविश्वाय विश्वेश्वर नमोऽस्तु ते ।। 25

एकदेहद्विदेहाय बहुदेहाय ते नमः ।
देहातीतामरज्ञाय विश्वेशाय नमोऽस्तु ते ।। 26

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

एककालद्विकालाय बहुकालाय ते नमः ।
कालसङ्ख्या स्वरूपाय त्रिणेत्राय नमो नमः ।। 27

एकवक्त्रद्विवक्त्राय बहुवक्त्राय ते नमः ।
*वक्त्रासङ्ख्येययुक्ताय वक्त्रेशाय नमो नमः ।। 28

एकनेत्रद्विनेत्राय बहुनेत्राय ते नमः ।
नेत्रासङ्ख्येययुक्ताय त्र्यम्बकाय नमो नमः ।। 29

एककण्ठद्विकण्ठाय बहुकण्ठाय ते नमः ।
एकनासद्विनासाय बहुनासाय ते नमः ।। 30

नासाऽसङ्ख्येययुक्ताय नित्यं शर्वाय ते नमः ।
एकजिह्वद्विजिह्वाय बहुजिह्वाय ते नमः ।। 31

जिह्वाऽसङ्ख्येययुक्ताय नीलकण्ठाय ते नमः ।
एकहस्तद्विहस्ताय बहुहस्ताय ते नमः ।। 32

हस्तासङ्ख्येय युक्ताय शङ्कराय नमो नमः ।
एकशस्त्रद्विशस्त्राय बहुशस्त्राय ते नमः ।। 33

शस्त्रासङ्ख्येययुक्ताय ईशानाय नमोनमः ।
एकपादद्विपादाय बहुपादाय ते नमः ।। 34

---

* असङ्ख्यवक्त्रयुक्तायेत्यर्थे ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पादासङ्ख्येययुक्ताय महादेव नमोऽस्तु ते ।
अव्यक्ताय नमसतुभ्यं शाश्वताय नमो नमः ।। 35

महेश्वर नमस्तेऽस्तु महायोगिन्नमोऽस्तु ते ।
महोत्तम नमस्तेऽस्तु महारूप नमोऽस्तु ते ।। 36

सदाशिव नमस्तेऽस्तु सदा शुद्ध नमोऽस्तु ते ।
सदोज्ज्वल नमस्तेऽस्तु महादेव नमोऽस्तु ते ।। 37

नमस्ते भगवन् शान्त नमस्ते भगवन् ध्रुव ।
नमस्ते भगवन् दीप्त नमस्ते भगवन् हर ।। 38

अजिताय नमस्तुभ्यं भस्माङ्गाय नमोऽस्तु ते ।
अनन्ताय नमस्तुभ्यं सर्वगाय नमोऽस्तु ते ।। 39

इति स्तवेन दिव्येन यः स्तौति परमेश्वरम् ।
स विधूयाशु पापानि शिवलोके महीत्यते ।। 40

भोगार्थी लभते भोगान् राज्यार्थी राज्यमाप्नुयात् ।
कन्यार्थी लभते कन्यां योगार्थी योगमाप्नुयात् ।। 41

मुच्यते व्याधितो रोगीर्दुःखी दुःखात्प्रमुच्यते ।
बन्धनान्मुच्यते बद्धो यशोऽर्थी च यशो लभेत् ।। 42

यान् यांश्चिन्तयते कामान् तांस्तान् प्राप्नोति मानवः ।
शिवस्य पदमाप्नोति नित्यं पठति यो नरः ।। 43

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तस्यार्चनादपि तथा श्रवणादपि मानवः ।
अध्यायं यस्तु पठते शृणोति शिवभक्तिमान् ।। 44

सोऽपि शैवपदं लब्ध्वा प्रयाति परमां गतिम् ।। 45

इत्थं स्तुवीत भगवन्तमुपासहायं
दुःखं विहाय सततं ह्युरुगायमीशम् ।
तस्यायमीश्वरपदं प्रददाति देवि
पापौघतापमपहाय गतिं लभेत ।। 46

।। इति श्रीशिवरहस्ये एकादशाम्शे
शिवस्तुतिर्नाम
त्रिचत्वारिंशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। चतुश्चत्वारिंशोऽध्यायः ।।

ईश्वर उवाच -

पृथिव्यां यानि तीर्थानि पुण्यान्यायतनानि च ।
लीयन्ते तानि लिङ्गे तु तस्माल्लिङ्गं प्रपूजयेत् ।। 1

तस्मात्सर्वत्र तीर्थेषु सर्वयज्ञेषु दीक्षितः ।
पूजयेच्च महालिङ्गं पुण्यं सर्वार्थसिद्धिदम् ।। 2

शतेन स्थापितं देवं सहस्रेण न चालयेत् ।
दुस्थितं सुस्थितं वापि शिवलिङ्गं न चालयेत् ।। 3

घृताभिषेकं यः कुर्यात् अहोरात्रं शिवस्य तु ।
पुण्यमासे समुद्युक्ते नियतं श्लक्ष्णधारया ।। 4

गीतनृत्योपहारेण शङ्खवादित्रनिः स्वनैः ।
कुर्याज्जागरणं तत्र प्रदीपादिसमाकुलम् ।। 5

समस्तपापनिर्मुक्तः समस्तगुणसंयुतः ।
समस्तकामसम्पूर्णः समस्तकुलसंयुतः ।। 6

चलद्भिः सुमहायानैरसङ्ख्येयैरनूपमैः ।
युक्तः शिवपुरे नित्यं मोदते शिववत्सुखी ।। 7

ग्रहणे विषुवे चैव पुण्येषु दिवसेषु च ।
घृताभिषेकं यः कुर्यात् महापुण्यमवाप्नुयात् ।। 8

घृताभिषेकं यः पश्येदासमोप्तेरुपोषितः ।
विधूय सर्वपापानि शिवलोके महीयते ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

एकः पूजयते भक्त्या भक्त्या चान्यः प्रपश्यति ।
तुल्यमेव फलं ताभ्यां भक्तिरेवात्र कारणम् ।। 10

यः कुर्यात्पर्वकालेषु महापूजाप्रवर्तनम् ।
शिवस्य रथयात्रां वा नगरान्तपरिभ्रमात् ।। 11

महाचित्रध्वजैश्छन्त्रैः किङ्कणीरवकान्वितैः ।
वितानध्वजमालाभिर्घण्टाचामरदर्पणैः ।। 12

शङ्खभेर्यादिनिर्घोषैर्गीतवादित्रसङ्कुलैः ।
[1]लख्यदारुमयैर्यन्त्रैर्मातृयक्षमणादिभिः ।। 13

[2]उदगायनयन्त्रैश्च बह्वाश्चर्यैरनेकशः ।
स्त्रीडोलाचक्रयन्त्रैश्च रथमन्दिरशोभितैः ।। 14

दध्यन्नपानकाद्यैश्च महासत्रसमाहितैः ।
महाजनसमाकीर्णं यथाविभवविस्तरम् ।। 15

सर्वदानानि पुण्यानि सर्वयज्ञफलानि च ।
अत्युग्रतपसा पूर्णं सर्वतीर्थफलानि च ।। 16

लब्ध्वा नरवरः श्रीमान् शिवयात्राप्रवर्तनात् ।
शिवलोके महाभागैः शिववन्मोदते चिरम् ।। 17

तस्यान्ते देवराजत्वं स्थिरं कालमवाप्नुयात् ।
जम्बूद्वीपाधिपो भूत्वा तस्यान्ते च महीपतिः ।। 18

---

1. लख्य - Movable
2. उदगायन (यन्त्रैः) Turned or going upwards

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

त्रिलिङ्गवेदिपर्यन्तं यो दद्याद्धृतकम्बलम् ।
घृतधाराफलं तस्य माघे पूर्णे तु पर्वणि ।। 19

जागरं गीतनृत्ताद्यैः सकृत्कृत्वा तु पर्वणि ।
मन्वन्तरशतं साग्रं शिवललोके महीयते ।। 20

चित्राभिरामनाट्याढ्यं शिवस्यायतनाग्रतः ।
सम्यक् प्रेक्षणकं दत्वा रुद्रलोके महीयते ।। 21

सुरूपः सुभगः श्रीमान् परिभ्रष्टोऽत्र जायते ।
सप्तद्वीपसुमुद्रायाः क्षितेरधिपतिर्भवेत् ।। 22

रूपं पिष्टमयं कृत्वा त्रिणेत्रं रत्नभूषितम् ।
शुक्लोपवीतसंयुक्तं एकपादं विभूषितम् ।। 23

दन्तेषु मौक्तिकं तस्य प्रवालं च तथौष्ठयोः ।
दद्याद्वक्त्रे च नेत्राभं वैडूर्यं चापि मस्तके ।। 24

हेमरूपं च हस्ताभ्यां ताम्रं पादं च कल्पयेत् ।
अण्डजैः कृमिजैर्वस्त्रैर्विचित्रैः परिवेष्टयेत् ।। 25

सुगन्धैश्चित्रवर्णैश्च पुष्पैश्चापि विभूषयेत् ।
विविधैर्भक्ष्यभोज्यैश्च बलिं तत्रोपकल्पयेत् ।। 26

भोजयेच्छिवभक्तांश्च विद्वान् शक्त्या च तर्पयेत् ।
प्रियकामः शिवो नित्यमित्युक्त्वोत्थापयेद् द्विजान् ।। 27

तैरेव सार्धं विप्रेन्द्रैस्तद्रूपं तु शिवालये ।
नीत्वा समर्पयेद्वेद्यां शिवलिङ्गसमीपतः ।। 28

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सर्वयज्ञफलं प्राप्य सर्वदानफलानि च ।
सुरूपो रूपदानेन शिवलोके महीयते ।। 29

भाजनं घृतसङ्कीर्णं मधुना परिशोभितम् ।
दद्यात्कृष्णतिलानां तु प्रस्थमेकं तु मागधम् ।। 30

द्विगुणं तण्डुलानां च पृथक् प्रस्थं प्रकल्पयेत् ।
अण्डजैः कृमिजैर्वस्त्रैर्विचित्रैः परिवेष्टयेत् ।। 31

सुगन्धैश्चित्रवर्णैश्च पुष्पैश्चापि विभूषयेत् ।
लिङ्गं संवेष्ट्य वस्त्राभ्यां बलिमेतं निवेदयेत् ।। 32

अर्चयित्वा विमानेन पौर्णमास्यां विशेषतः ।
युगकोटिसहस्राणि शिवलोके महीयते ।। 33

पुण्यक्षयादिहागत्य समृद्धे जायते कुले ।
मेधावी सुभगः श्रीमान् वेदवेदाङ्गपारगः ।। 34

ताम्रपात्रे पयः पूर्णं कृत्वा चान्तःस्तकाञ्चनम् ।
प्रच्छाद्योपरि यत्नेन गन्धपुष्पार्चितं महत् ।। 35

शिवभक्तं द्विजं सम्यक् भोजयित्वा सदाक्षिणम् ।
प्राचीसमुद्रान्तगे सोमे प्रतीचीं च रवौ गते ।।। 36

पौर्णमास्यां तु वैशाख्यां नीत्वा पात्रं शिवाग्रतः ।
प्रीयतां मे महादेवः सोममूर्तिर्जगत्पतिः ।। 37

इत्युक्त्वा वचनं ध्यायेद्देवदेवमुमापतिम् ।
तस्मै विप्राय तत्पात्रमर्पयेद्भक्तितः शनैः ।। 38

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

एतसोमव्रतं नाम कृत्वा रुद्रान्तिकं व्रजेत् ।
रुद्रलोकात्परिभ्रष्टो भवेज्जातिस्मरो नरः ।। 39

पूर्वाभ्यासेन तेनैव पुनः शिवपदं व्रजेत् .
पूर्णिमायामवस्यां शिवं सम्पूज्य यत्नतः ।। 40

उपवीतं शिवे दद्यात् शिवभक्तांश्च पूजयेत् ।
पुनरेव तु कार्तिक्यां पूज्यं शम्भुं क्षमापयेत् ।। 41

यतीनां दक्षिणां दद्यात्सूत्रवस्त्रादिपूर्विकाम् ।
यत्कुर्यात्सकृदप्येवं चातुर्मास्ये पवित्रकम् ।। 42

कल्पकोटिशतं दिव्यं रुद्रलोके महीयते ।
इच्छया वा भवेद्राजा गुणरूपसमन्वितः ।। 43

भूमिदानस्य यत्पुण्यं कन्यादानस्य यत्फलम् ।
मुखवाद्येन यत्पुण्यमुभयं लभते नरः ।। 44

तदेव पुण्यं गीतस्य नृत्तस्य च विशेषतः ।
तदेव जायते शब्दाद्धस्ततालध्वनेस्तथा ।। 45

यो गां पयस्विनीं दधात्तरुणीं वृषसंयुताम् ।
शिवाय तेन दत्तं स्याज्जगत्सर्वं चराचरम् ।। 46

वृषं च परिपूर्णाङ्गं उदारं च शशिप्रभम् ।
गोपतिं धूर्वहं वापि शिवाय विनिवेदयेत् ।। 47

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

यावन्ति देहे रोमाणि तत्प्रसूतिः कुलेषु च ।
तावद्युगसहस्राणि रुद्रलोके महीयते ।। 48

सूत उवाच -

यो धर्मवाहपरमेश्वरमीशितारं-
सम्पूजयेद्यदिह भूमिगतः सभक्त्या ।
तस्योत्तमायुरथ सौधकलत्रपुत्र-
मित्रातिरात्रकरणं लभते शिवेऽत्र ।।

।। इति श्रीशिवरहस्ये एकादशाम्शे
शिवधर्मकथनं नाम
चतुश्चत्वारिंशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। पञ्चचत्वारिंशोऽध्यायः ।।

ईश्वर उवाच -

शिवाग्निकार्यमुद्दिश्य सुरूपां च पयस्विनीम् ।
कुलीनां कपिलां दत्वा दत्तं भवति गोशतम् ।। 1

गिरिकान्तारदुर्गेषु सदा मातेव रक्षति ।
यत्नेन कपिलां यत्नात् शिवाय विनिवेदयेत् ।। 2

शिवस्नानादि कार्यार्थं उत्पन्ना कपिला यथा ।
तस्मात्तत्रैव सा योज्या कपिला शुभमिच्छता ।। 3

कपिलायाः पिबेच्छूद्रः पयः संसारवर्जितः ।
स प्रयाति महाघोरं नरकं नात्र संशयः ।। 4

हुतशेषं पिबेद्विप्रः स्वर्गः स्यादन्यथा पशुः ।
संस्कारेण वियुक्तश्च संस्कारो दुर्लभः शिवे ।। 5

गामालभ्य नमस्कृत्य यः कुर्यात्तां प्रदक्षिणाम् ।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा ।। 6

गवां हुङ्कारशब्देन दर्शनस्पर्शनेन च ।
पापं प्रणश्यते यत्नात्तस्मात्पश्येच्चगां स्पृशेत् ।। 7

कुतस्तेषां हि पापानि येषां गृहमलङ्कृतम् ।
सततं बालवत्साभिर्गोभिः श्रीभिरिव स्वयम् ।। 8

यानि तीर्थानि मेदिन्यामासमुद्रात्सरांसि च ।
गवां शृङ्गोदकस्नानात् कलां नार्हन्ति षोडशीम् ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

न लङ्घयेद्गवामस्ति मृतगन्धं न वर्जयेत् ।
यावज्जिघ्रति तद्गन्धं तावत्पुण्यैः स पूर्यते ।। 10

गवां कण्डूयनं धूपं गोप्रदानसमं भवेत् ।
तुल्यं च गोप्रदानेन ह्यस्या रोगादिपालनम् ।। 11

तृणोदकादिसंयुक्तां यः प्रद्याद्गवां महीम् ।
स गोमेधफलं पुण्यं लभते नात्र संशयः ।। 12

बहुनाऽत्र किमुक्तेन गावः पाल्याः प्रयत्नतः ।
गावो देयाः सदा रक्ष्याः स्पृश्या दृश्याश्च सर्वदा ।। 13

ये ताडयन्ति गां पादैः सर्व लोकस्य मातरम् ।
आक्रोशयति यो मोहात् आक्रुष्टं ताडितं जगत् ।। 14

ताडयेद्यदि गां मोहात् यो गां क्रोशेन्नराधमः ।
नरकाग्नौ स पच्येत गोनिःश्वासप्रपीडितः ।। 15

स पलाशेन दण्डेन ताड्येत्तां निवारयेत् ।
गच्छ गच्छेति तां ब्रूयान्मा मा इति निवारयेत् ।। 16

वृषोत्सर्गं तु यः कुर्यात्पक्षयोरुभयोरपि ।
द्वादश्यां पौर्णमास्यां वा चतुर्दश्यष्टमीषु च ।। 17

तस्यगावो वृषो विष्णुः शिवः सर्वाश्च देवताः ।
शान्तिं कुर्वन्ति सुप्रीताः स्वर्गमायुः श्रियो बलम् ।। 18

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

दास्यन्ति च सदा नित्यकल्याणं भद्रमेव च ।
गोमयो(यः प्रीतो) वर्तते गोषु ताडनक्रोधवर्जितः ।। 19

महतीं श्रियमाप्नोति रुद्रलोकं स गच्छति ।
गोब्राह्मणार्थमुद्युक्तः प्राणैर्यदि वियुज्यते ।। 20

प्राप्नोति परमं स्थानं यत्र देवो महेश्वरः ।
ब्राह्मणश्चैवधेनुश्च कुलमेकं द्विधाकृतम् ।। 21

एकत्र मन्त्रास्तिष्ठन्ति हविरन्यत्र तिष्ठति ।
न चमन्त्रैर्विना यज्ञो हविषा च प्रवर्तते ।। 22

तस्माद्विप्राश्च गावश्च पुण्यात्पुण्यतराः सदा ।
गोभिर्यज्ञाः प्रवर्तन्ते गोषु देवाः प्रतिष्ठिताः ।। 23

गोभिर्वेदाः समुत्कीर्णाः सर्षसङ्घपदक्रमः ।
शृङ्गमूले गवां नित्यं ब्रह्मा विष्णुश्च सांस्थितौ ।। 24

शृङ्गाग्रे सर्वतीर्थानि स्थावराणि चराणि च ।
शिरोमध्ये महादेवः फाले सर्वोपरि स्थितः ।। 25

सरस्वती च हुङ्कारो यमत्रक्षौ च गण्डयोः ।
सन्ध्याद्वयं तथैवौष्ठौ ग्रीवामिन्द्रः समाश्रितः ।। 26

ललाटाग्रे स्थिता देवी नासावंशे च षण्मुखः ।
कम्बलाश्वतरौ नागौ नासापुटसमाश्रितौ ।। 27

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कर्णयोरश्विनौ देवौ चक्षुषी शशिभास्करौ ।
दन्तेषु वायवः सर्वे जिह्वायां वरुणः स्थितः ।। 28

ऋक्षाणि च ककुद्देशे साध्याश्चोत्तरसंस्थिताः ।
चतुष्पादास्तथाग्निश्च धर्मो जङ्घाव्यवस्थितः ।। 29

खुरमध्येषु गन्धर्वाः खुराग्रेषु च पन्नगाः ।
खुराणां पश्चिमे गोषु गणाश्चाप्सरसां स्थिताः ।। 30

साक्षाद् गङ्गा च गोमूत्रे गोमये यमुना स्थिता ।
ऋषयश्च सदा सर्वे रोमकूपेषु संस्थिताः ।। 31

उदरे पृथिवी देवी सशौलवनकानना ।
चत्वारः सागराः पूर्णाः गवाङ्गे च पयोधराः ।। 32

जठरे गार्हपत्योऽग्निर्हृदये दक्षिणाग्निकः ।
मुखे चाहवनीयोऽग्निस्तथाचाङ्गे पतिव्रताः ।। 33

अस्थिशुक्लास्रसङ्घेषु ह्यश्वमेधादिकः क्रतुः ।
यच्चान्यत्कथितं पूर्वैस्तच्च गोषु प्रतिष्ठितम् ।। 34

गोषु दत्तं हुतं भुक्तं गोषु सर्वं चराचरम् ।
तस्माद्गावो न हिंस्याः स्युः पालनीयाश्च सर्वदा ।। 35

गावः स्तुत्याश्च वन्द्यास्च गवो मां पान्तु नित्यशः ।
ब्रह्मणा ब्रह्मशब्देन स्तूयते प्रणवेन यः ।। 36

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

स शिवः शाश्वतो देवो गोषु मारीं व्यपोहतु ।
लम्बोदरेण देवेन गजवक्त्रेण योऽर्चितः ।। 37

श्रीमता सुस्तिराङ्गेण घण्टाकर्णेन चेश्वरः ।
नित्यं प्रणम्यते भक्त्या सम्प्रहृष्टेन चेतसा ।। 38

स शिवः शाश्वतो देवो गोषु मारीं व्यपोहतु ।
नित्यं रुद्रबलोपेतो रुद्रशक्तिसमन्वितः ।। 39

घण्टाकर्णगणो देवः शिवज्ञानविधायकः ।
शिवतेजोऽनुभावेन गोषु मारीं व्यपोहतु ।। 40

शिवाय देवदेवाय महादेवाय योगिने ।
रुद्राय स्थाणवे नित्यं हरायोग्राय ते नमः ।। 41

परमेशाय सिद्धाय सर्वसिद्धिप्रदायिने ।
त्र्यम्बकाय महेशाय अतिशान्ताय ते नमः ।। 42

अभिमन्त्र्य सदा तोयमेतैर्मन्त्रैर्यथाक्रमम् ।
प्रोक्षयेत्तु गवां देहे ततः शान्तिर्भविष्यति ।। 43

य इमां पठते गोषु रोगर्तासु विशेषतः ।
गोसावित्रीं महापुण्यां गवां शान्तिर्भविष्यति ।। 44

यः समुत्थाय सततं गोसवित्रीमिमां पठेत् ।
गवां चोत्सर्गकालेषु प्रस्थाने वा समागमे ।। 45

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

आयुष्मान् बलवान् श्रीमान् गोमानर्थपतिर्भवेत् ।
देहान्ते शिवसारूप्यं लभते नात्र संसयः ।। 46

ईश्वर उवाच -

योऽलङ्कृत्य शिवे गां वै सवत्सां च निवेदयेत् ।
सोऽश्वमेधस्य यज्ञस्य फलं प्राप्नोति निष्कलम् ।। 47

प्रभूततोयेषु जलाशयेषु
सपुङ्गवा नित्यमरोगवत्साः ।
चरन्तु गावः सुखिता वनेषु
क्षीरं प्रयच्छन्तु सुखंह्यदन्त्यः ।।

।। इति श्रीशिवरहस्ये एकादशाम्शे
गोसावित्रीकथनं नाम
पञ्चचत्वारिंशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। षट्चत्वारिंशोऽध्यायः ।।

ईश्वर उवाच -

सुविनीतां स्त्रियं दासीं भृत्यं वा यो निवेदयेत् ।
नरमेधस्य यज्ञस्य फलं प्राप्नोति पुष्कलम् ।। 1

निवेदयति यो नागं भक्त्या भद्रमलङ्कृतम्
शिवाय पर्वदिवसे तस्य पुण्यफलं शृणु ।। 2

समदैरावतप्रख्यैर्गजै युक्तैः सुशोभनैः ।
प्रकीडते महायानैः शतसङ्ख्यैरनेकशः ।। 3

कल्पकोटिसहस्राणि कल्पकोटिशतानि च ।
रुद्रलोकगतश्चान्ते भवेदिन्द्रः सुराधिपः ।। 4

चतुर्युगसहस्रान्ते स गां प्राप्य नराधिपः ।
भवेदिन्द्रसमः श्रीमान् रूपवीर्यश्रुतान्वितः ।। 5

यः शिवाय जलोपेतां सर्वसस्य प्ररोहिणीम् ।
महीं महीपतिर्दद्यात् तस्य पुण्यफलं शृणु ।। 6

यावद्गङ्गा भवेद्भूमौ यावद्वायुः प्रवर्तते ।
तावत्कल्पसहस्राणि रुद्रलोके महीयते ।। 7

एवं सर्वत्र विज्ञेयं फलं दण्डप्रमाणतः ।
ग्रामखेटपुरक्षेत्रविषयादि निवेदयेत् ।। 8

सर्वसस्यजलोपेतं सर्वबाधाविवर्जितम् ।
ग्रामं शिवाय यो दद्यात् तस्य पुण्यफलं शृणु ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सर्वतीर्थेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम् ।
सर्वदानेषु यत्पुण्यं ग्रामदानेन तद्भवेत् ।। 10

सूर्यकोटिप्रतीकाशैर्दिव्यस्त्रीकोटिसंयुतैः ।
संयुक्तैः कोटिशो यानैः सर्वकामसमन्वितैः ।। 11

सोऽनेन ग्रामदानेन त्रिःसप्तकुलसंयुतः ।
यथेष्टमैश्वरे लोके क्रीडते कालमक्षयम् ।। 12

पुण्यं नगरदानस्य ग्रामदानाच्छताधिकम् ।
देशदानेन चानन्त्यं न शक्यं तत्र कीर्तितुम् ।। 13

रत्नवत्यां गवाश्वाद्यैः सर्वभूमौ प्रजायते ।
तस्माद्भूमिप्रदानेन नरो भवति सर्वदा ।। 14

योऽन्यदत्तां स्वदत्तां वा हरेद्भूमिं नरादिपः ।
स पच्यतेऽक्षयं कालं नरकेषु क्रमेण सः ।। 15

सर्वं वा भूमिहरणे हृतमेव न संशयः ।
भूमेर्हर्ता वसेत्तस्मान्नरके कालमक्षयम् ।। 16

देवस्वानपहर्तारो नरा नरकनिर्भयाः ।
ब्रह्मस्वापहरा मोहात्पच्यन्ते नरकेषु ते ।। 17

देवब्रह्मस्वपुष्टानि वाहनानि महीपतेः ।
युद्धकाले विशीर्यन्ते सैकताः सेतवो यथा ।। 18

भूमिप्रदो वसेत्स्वर्गं यावत्कालस्य सङ्ख्यया ।
तस्माच्छतगुणं कालं तद्धर्ता नरके वसेत् ।। 19

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नरके ते विपच्यन्ते देवब्रह्मस्वहारिणः ।
कल्पान्ते च समुत्तीर्णा वृककीटादियोनिषु ।। 20

भ्रमन्ति सुचिरं कालं क्षुत्पिपासादिपीडिताः ।
केनचिच्छिवभक्तेन शिवार्चायतनादिषु ।। 21

उपयुक्ता भवन्तीह यावत्तावच्च पादपाः ।
ततो निर्धूतपापाश्च ते नराः शिवतेजसा ।। 22

दिव्यं प्रयान्ति सन्त्यज्य शरीरं यातनात्मकम् ।
देवब्रह्मस्वहरणं तस्मात्सन्त्यज्य शङ्करम् ।। 23

ये पूजयन्ति भूदेवास्ते यान्ति परमं पदम् ।
य इमं पठतेऽध्यायं शृणुयाद्वा समाहितः ।। 24

स विधूयाशु पापानि शिवलोके महीयते ।
अतः परमिदं गुह्यं वक्ष्यामि मुनिसत्तम ।। 25

पुण्यातिशयसंयुक्तं सर्वदेवैरनुष्ठितम् ।
ब्रह्मणा विष्णुना देव्या स्कन्देन्दुभ्यां यमेन च ।। 26

वरुणादित्यसोमाग्निमरुद्भूनरनारदैः ।
धर्मश्रीशुकनक्षत्रविलोहितशतैश्चरैः ।। 27

विश्वामित्रवसिष्ठात्रिबृहस्पतिबुधादिभिः ।
श्वेतागस्त्यदधीचाद्यैः सर्वैश्च मुनिसत्तमैः । 28

भृङ्गिमातृमहाकालतण्डेश्वरगणाधिपैः ।
शेषवासुकिकार्कोटगुलिकानन्ततक्षकैः ।। 29

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पद्मशङ्खमहाशङ्खैरन्यैश्चापि महोरगैः ।
अनुष्ठितं शिवप्रीतिजनकं सर्वदा मुने ।। 30

शिवे गतिर्यथा प्राप्ता सर्वगत्यतिशायिनी ।
मया चेशप्रसादेन तथा शृणु विधिं परम् ।। 31

शीतचन्दनतोयेन स्नाप्य लिङ्गं विलिप्य च ।
श्वेतैर्विकसितैः पद्मैः सम्पूज्य प्रणिपत्य च ।। 32

तत्र पद्मासने सौम्यें निष्छिद्रे सुमनोहरे ।
मध्ये केसरजालस्य स्थाप्य लिङ्गं कनीयसम् ।। 33

अङ्गुष्ठप्रतिमं लिङ्गं सर्वगन्धमयं शुभम् ।
स्थाप्य दक्षिणमूर्तौ तु बिल्वपत्रैः समर्चयेत् ।। 34

अगरुं दक्षिणे पार्श्वे पश्चिमे तु मनः शिलाम् ।
उत्तरे चन्दनं दद्यात् सागरुं चापि गुग्गुलुम् ।। 35

वासांसि चाथ सूक्ष्माणि विकासानि भवानि च ।
पायसं घृतसंमिश्रं घृतदीपांश्च दापयेत् ।। 36

सर्वं निवेद्य मन्त्रेण दक्षिणामूर्तिमाश्रितः ।
अनेन विधिना देवाः सर्वे देवत्वमागताः ।। 37

देवी देवीत्वमापन्ना स्कन्दः स्कन्दत्वमागतः ।
ब्रह्मा ब्रह्मत्वमापन्नो हरिर्विष्णुत्वमागतः ।। 38

इन्द्रश्च देवराजत्वं गणाश्च गणतां गताः ।
एवं योऽर्चयते लिङ्गं पद्मगन्धमयं शुभम् ।। 39

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सर्वपापविनिर्मुक्तः शिवलोके महीयते ।
एतद्गुह्यतमं पुण्यं शिवलिङ्गमहाव्रतम् ।। 40

भक्तस्य ते मयाऽऽख्यातं न देयं यस्य कस्यचित् ।
शिवभक्ते सदा देयं शिवेन कथितं पुरा ।। 41

चिरेण ग्रथितं माल्यं शिवस्योपनयेत्तु ।
गोसहस्रफलं तस्य भवतीति न संशयः । 42

अचिराल्लभते हृष्टिं शिवलोकं च विन्दति ।। 43

ये वार्चयेयुरनिशं शशिखण्डमौलि-
लिङ्गार्चनेन सततं किल शाङ्गचर्याः ।
पापानुषङ्गमतिभङ्गमतङ्गकुम्भ-
विद्रावणैकसुधियः प्रभवन्ति रुद्राः ।। 44

।। इति श्रीशिवरहस्ये एकादशाम्शे
षट्चत्वारिंशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। सप्तचत्वारिंशोऽध्यायः ।।

ईश्वर उवाच -

अल्पवीर्यैस्तथामर्त्यैरल्पसत्वैस्त्रिभिः शिवे ।
संवत्सरसहस्त्रैश्च सदा मां पूजयन्नुमे ।

न पश्यन्ति सुराः सर्वे नरा एव नरोत्तमाः ।
कथं मां भक्तिरहिताः निर्भाग्याः पूजयन्त्यपि ।। 2

तथापि श्रद्धया दृश्यः पूज्योऽहं सर्वभावतः ।
प्रसङ्गाच्चैव सम्पूज्य भक्तिहीनैरपि द्विजैः ।। 3

भावानुरूपफलदो भगवानिति कीर्तितः ।
उच्छिष्टः पूजयन् प्रैति पैशाचं तु द्विजाधमः ।। 4

सङ्क्रुद्धो रक्षसां स्थानमालस्याद्गौह्यकं शिवे ।
अभक्ष्यभक्ष्यः सम्पूज्य याक्षं प्राप्नोति मानवः ।। 5

गानशीलश्च गान्धर्वं नृत्तशीलस्तथाप्सरम् ।
ब्राह्मं हि प्रणवेनैव वैष्णवं चाभिमन्त्रकः ।। 6

श्रद्धया सकृदेवापि समभ्यर्च्य महेश्वरम् ।
गायत्र्या च समभ्यर्च्य सोमस्थानमवाप्नुयात् ।। 7

पञ्चाक्षरेणाभिपूज्य रुद्रलोके वसेन्नरः ।
कल्पमेकं दिव्यदेहः शिवरूपेण सङ्गतः ।। 8

पञ्चभिर्ब्रह्मभिः पूज्य शिवं शिवगणो भवेत् ।
संशोध्य च शुभं लिङ्गं हेमपीठं शुभोदकैः ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अद्भिः पूते तथा पीठे लिङ्गे चावाह्य शङ्करम् ।
दृष्ट्वा देवं तथा लिङ्गे सुपुष्पं मस्तके क्षिपेत् ।। 10

कल्पिते चासने तत्र निर्माल्यमपनोद्य च ।
पाद्यमाचमनं चार्घ्यं दत्वा रुद्राय शम्भवे ।। 11

स्नापयेद्गन्धतोयेन पाटलीमिश्रितेन च ।
क्षीरेण च गवां नित्यं घृतेन च सुगन्धिना ।। 12

दध्ना च मधुना चैव कीटहीनेन शङ्करि ।
ऐक्षव्या सितया चापि स्नापयेद्देवमीश्वरम् ।। 13

नारिकेलोदकैः स्नाप्य मोचाम्ररकसुपानसैः ।
जम्बीरसारैर्गन्धोदैः कुशपुष्पहिरण्यजैः ।। 14

अखण्डनीरधाराभिः स्नापयेत्परमेश्वरम् ।
रुद्रेण चमकेनैव तथा पौरुषसूक्तकैः ।। 15

कद्रुद्रैः पवमानैश्च वामदेवादिसामभिः ।
रथन्तरैस्तथा रौद्रैः शिवेऽथर्वशिखादिभिः ।। 16

स्नापयेद्देवदेवेशं तर्पयेदष्टनामभिः ।
शुद्धवस्त्रेण सम्मृज्य पीठे स्थाप्य महेश्वरम् ।। 17

भस्मना चन्दनाद्यैश्च लेपयेत्साक्षतादिभिः ।
रोचनाद्यैश्च सम्पूज्य चन्द्रैश्चैव महेश्वरम् ।। 18

बिल्वपत्रैरखण्डैश्च दूर्वापामार्गदर्भकैः ।
नीलोत्पलैस्तथा पद्मैर्नन्द्यावर्तशिरीषकैः ।। 19

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मल्लिकाचम्पकैर्जाजीवकुलार्कशमीसुमैः ।
करवीरैश्च कुटजैः पाटलैर्द्रोणसम्भवैः ।। 20

केतकी बृहतीपुष्पैः पुष्पैरारग्वधोद्भवैः ।
पूजयेन्नामभिर्देवि निधनेत्यादिभिः शिवे ।। 21

दत्वा पञ्चविधं धूपं तगजागरुकेसरम् ।
देवद्रुसद्घंजैर्बैल्वगुग्गुलं सधृतं शिवे ।। 22

दीपान् प्रज्वाल्य घृतजान् पायसं च निवेदयेत् ।
दधिभक्तं च मध्वाज्यपरिप्लुतमुमापतेः ।। 23

शुद्धान्नं चैव मुद्गान्नं माषान्नं च निवेदयेत् ।
माषापूपं गुडापूपं गोधूमापूपमेव च ।। 24

खेजिका लड्डुकाष्चैव मोदकाः फेणिकाः शिवे ।
मण्डकाभक्ष्यभोज्यं च निवेद्यं स्यात्सदा शिवे ।। 25

शाकसूपादिदध्यन्नं गुडान्नं विनिवेदयेत् ।
क्रमेणैव फलैः श्रेष्ठैः पानकैर्मजिकां (?) तथा ।। 26

ताम्बूलमथ गन्धाढ्यं सकलं विनिवेदयेत् ।
नीराजयेत्ततो दीपैः शतसाहस्रवर्तिकम् ।। 27

वृषकुम्भगजाकारं नागमानुषरूपकम् ।
नाक्षत्रं दीपकं दत्वा सद्योजातादिपञ्चकैः ।। 28

पञ्चपात्रेषु देयं स्यात्ततः कर्पूरखण्डजम् ।
रक्षाबन्धं ततः कुर्याद्भस्मना त्रिः क्रमेण तु ।। 289

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ऋक्सामयाजुषाथर्वमन्त्रैःस्तुत्वा महेश्वरम् ।
पौराणैर्वा तथा वाक्यैः स्तुवीत परमेश्वरम् ।। 30

ईशानं पुरुषं चैवमघोरं वाममेव च ।
सद्योजातं जपेत्पश्चात्पञ्चभिः पूजयेच्छिवम् ।। 31

छत्रं च चामरे दिव्ये व्यजनादर्शकध्वजम् ।
वीणावेणुमृदङ्गादीन् शङ्खदुन्दुभिकाहलम् ।। 32

चार्मं तन्त्रीमयं श्रेष्ठं तथैव च मुखोद्भवम् ।
वाद्यं च श्रेष्टमित्याहुः शिवार्चासु महेश्वरि ।। 33

अलाभे सर्ववाद्यानां घण्टाघोषः प्रशस्यते ।
रत्नस्वर्णोद्भवं पात्रं राजतं ताम्रजं तथा ।। 34

कांस्यपैत्तलसम्भूतं दारवं चाश्मसम्भवम् ।
शौक्तिकं पत्रसम्भूतं मृन्मयं वाप्यलाभतः ।। 35

कल्पयेच्छिवपूजायां फलं स्यादुत्तरोत्तरम् ।
पञ्चामृतं चान्यगवां कापिलं स्यात्ततोऽधिकम् ।। 36

नारिकेलं तथैवान्यत् श्वेतं तत्र प्रशस्यते ।
रम्भाः सुवृत्तपीताच्छाः प्रशस्तास्त्वभिषेचने ।। 37

इक्षुभ्यः पौण्ड्रकं चेक्षु प्रशस्तं स्नपने शिवे ।
गुलवल्मीकसम्भूतान्मधु पार्वतमुत्तमम् ।। 38

कृष्णं निषिद्धं देवेशि पैतृके विनियोजयेत् ।
ताटाकात्कूप्यमुत्कृष्टं ततः कुल्योद्भवं शिवे ।। 39

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ततो नदीभवं पुण्यं सागराभिमुखासु च ।
शङ्खोदकं ततोत्कृष्टं(?) सर्वपात्रजलैरपि ।। 40

सर्वतैलैरपि शिवे तिलजं श्रेष्ठमुच्यते ।
प्रहरं तिष्ठते जाती दिवारात्रौ च मल्लिका ।। 41

पद्मं नीलोत्पलं चैव मुकुलं वा दिनत्रयम् ।
न पर्युषितदोषोऽस्ति बिल्वपत्रे शिवप्रिये ।। 42

न पर्युषितदोषोऽस्ति हैमे रत्नोपकल्पिते ।
अलाभे बिल्वपत्राणां निर्माल्यैः क्षालितैर्यजेत् ।। 43

पुष्पाणामप्यलाभे तु तत्पत्राणि निवेदयेत् ।
कुटजैर्नार्चयेदीशं यस्य कस्य सुमस्य च ।। 44

विना नीलोत्पलं देवि साम्बं मन्दारकैर्यजेत् ।
मल्लिकाभिर्जातिकाभिः प्रातश्चम्पकनन्दिकैः ।। 45

मध्याह्ने कर्णिकारैश्च करवीरैश्चपाटलैः ।
पुन्नागैः पारिजातैश्च पुष्पैरन्यैर्यथाबलम् ।। 46

कनकं केतकीपुष्पं निशि कादम्बजैर्यजेत् ।
सर्वदा बिल्वपत्रं मे प्रियं शैलेन्द्रकन्यके ।। 47

बिल्वपत्रे च कमले कमला सुप्रतिष्ठता ।
नीलोत्पलेऽम्बिका साक्षात् अल्लकेरक्तसन्धितः ।। 48

पुण्डरीके महादेवो गणेशः शतपत्रके ।
कणिकारे स्थितो वेधा मल्लिकासु हरिः स्थितः ।। 49

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कर्णिकारे स्थितो नन्दी दुर्गा पाटलकेषु च ।
श्वेतार्के चैव चण्डीश पुष्पेषु गणपाः स्थिताः ।। 50

यमो नालिषु(नीलेषु)पुष्पेषु रक्तेऽपर्णा प्रतिष्ठिता ।
श्वभ्रपुष्पार्चने मुक्तिर्भुक्तिरत्र समर्चने ।। 51

पीतं वश्यकरं देवि नीलकं मारणे भवेत् ।
अनेन विधिना देवः प्रसीदति महेश्वरः ।। 52

कृष्णागरूद्भवं धूपं सर्वपापनिकृन्तनम् ।
साम्राणिजं गुग्गुलुजं धूपं वश्यकरं भवेत् ।। 53

सर्वरोगहरं बैल्वं सधृतं धूपमुत्तमम् ।
मारणोच्चाटने नैव धूपो दीपोऽपि सत्तमे ।। 54

कौसुम्भतैलं वश्यं स्यात् शिवदीपप्रदानतः ।
सार्षपं रोगनाशाय माधूकं राजवश्यकम् ।। 55

नारीकेलोद्भवं तैलं स्त्रीवशीकरणं शिवे ।
नीलतैलं ज्ञानदायि शिवाग्रे दीपदापने ।। 56

हैरण्डे बुद्धिमान्द्यं स्यात् शिवाग्रे दीपदानतः ।
गव्यमाज्यं मुक्तिदायि माहिषं पुष्टिकृद्भवेत् ।। 57

एवं धूपादिदीपेषु पुष्पेषु फलमम्बिके ।
यथालाभं प्रकुर्वीत *तानयुक्तो न दुष्यति ।। 58

वृक्षाः पुष्पाणि पत्राद्यै वल्लयश्च महेश्वरि ।
उपयुक्ता शिवार्चायां गावो या लोकमातरः ।। 59

---

* तान =Thread

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

गतिं प्रयान्ति परमां किम्पुनर्मानवाः शिवे ।
द्विजाः क्षत्रा विशः शूद्राः स्त्रियो वापि च शङ्कराः ।। 60

शङ्करार्चासु निरताः प्रयान्ति परमं पदम् ।
पूजयेद्यः शिवं रुद्रं शर्वं शिवमजं सकृत् ।। 61

स याति शिवसायुज्यं त्रिः सप्तकुलसंयुतः ।
पूजितं वा महादेवं पूज्यमानमथापि वा ।। 62

दृष्ट्वा प्रयाति वै मर्त्यो रुद्रलोकं न संशयः ।
अर्चितं प्रातरीक्षेत लिङ्गं देवमुमापतिम् ।। 63

नैशपापं द्विमुच्येत मध्याह्ने हयमेधभाक् ।
सायं जन्मायुतोद्भूतं दृष्ट्वा तत्पापनाशकृत् ।। 64

निशीथे तु महादेवमभिवीक्ष्य विमुक्तिभाक् ।
दृष्ट्वा नत्वाभिगच्छेद्वा स याति गणतां मम ।। 65

स कृत्प्रसङ्गतो लिङ्गमनघः स्याद्धरस्य हि ।
दृष्ट्वा नत्वाभिगच्छेद्वा प्रादक्षिण्येन शङ्करि ।। 66

एकप्रदक्षिणं लिङ्गे चण्डेशादर्शनं तथा ।
अदीपदर्शनं चैव शिवस्यार्धनमस्क्रिया ।। 67

ब्राह्मणानां परीवादो हन्ति पुण्यं पुराकृतम् ।

ईश्वरः उवाच -

इत्येष ते समासेन फलाफलविनिर्णयः ।। 68

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पुण्यं च दर्शनं शम्भो र्धूपदीपनिवेदने ।
कथितं प्रथितं देवि महितं शाम्भवं वरम् ।। 69

नानायोनिषु सञ्चरन् विधिवशाद्विप्रत्वमेत्यादरात्
वर्णित्वेऽखिलवेदजालकलनाद्दाराग्निहोत्रे रतः ।
अग्निष्टोममखादिभिः क्रतुवरैरिद्वेष्टिभिश्चान्तिमे
वानप्रस्थगतो विरज्य विषये त्यक्तेषणो मस्करी ।।

।। इति श्रीशिवरहस्ये एकादशाम्शे
सप्तचत्वारिंशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। अष्टाचत्वारिंशोऽध्यायः ।।

शिव उवाच -

अथ सङ्क्षेपतो वक्ष्ये शिवभक्तानुकम्पया ।
अद्य शाखोपशाखार्थं शिवधर्मसमन्वितम् ।। 1

क्वचिद् गच्छेद्यदा पश्येच्छिवलिङ्गमपूजितम् ।
ग्रामे वा नगरे वापि विपिने पर्वते पथि ।। 2

नदीतीरे शिवक्षेत्रे शून्यलिङ्गालये स्थितम् ।
तदा सम्पूज्य नत्वाऽऽवां यो गच्छेत्स गणोत्तमः ।। 3

स्नाननैवेद्यवस्त्राद्यमाददीत प्रियाणि च ।
दत्तं यच्छिवमुद्दिश्य सर्वदानात्परं हि तत् ।। 4

दृष्ट्वा शिवलयं दूरे प्रणमन् पापयुङ्नरः ।
सर्वपापैः प्रमुच्येत नात्र कार्या विचारणा ।। 5

चतुष्पद्यं नदीशैलं शिवभक्तं शिवं तथा ।
त्वरया भक्तिमान् गच्छन् भावयुक्तो यदिप्रिये ।। 6

तत्रस्थोऽपि नमस्कृत्वा(?) शिवलोके महीयते ।
सोष्णीषकञ्चुको वापि प्रविशेद्यः शिवालयम् ।। 7

तत्पापेन प्रमुच्येत त्वरायुक्तो विभूतिधृक् ।
मृगांश्च मांसं [1]लशुनं [2]कलञ्जं [3]गृञ्जनं तथा ।। 8

---

1. लशुन -garlic. 2. कलञ्जम्-Flesh of a deer or other animal.
3. गृञ्जन - A small red variety of garlic or onian prohibited as food for द्विजः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

आरनालं[1] च [2]सौवीरमभक्ष्यं च विवर्जयेत् ।
शिवार्चकसर्ववर्णो मधुमांसं विवर्जयेत् ।। 9

सर्वदानोग्रतपासामश्वमेधाऽयुतस्य च ।
फलमाप्नोति यत्नेन मत्स्यमांसविवर्जनात् ।। 10

सर्वदोषाश्रयं मद्यमतिदूरे विवर्जयेत् ।
क्व मद्यं क्व शिवे भक्तिः क्व मांसं क्व शिवार्चनम् ।। 11

मांसमद्यप्रसक्तानां दूरे तिष्ठति शङ्करः ।
सर्वतीर्थेषु यत्पुण्यं सर्वयज्ञेषु यत्फलम् ।। 12

तत्फलं लभते सर्वं यो मद्यं परिवर्जयेत् ।
अभक्ष्यमपि भक्ष्यं स्यात् औषधार्थं नृभिः प्रिये ।
अन्तरेण सुरामांसमिति सर्वश्रुतीरितम् ।
गर्भादिसर्वसंस्कारे स्मशानद्ये व भोजनम् ।।। 14

सर्वश्राद्धानि नित्यात्मा शिवभक्तो विवर्जयेत् ।
रजस्वलादिसंस्पृष्टिमन्त्यजश्वानसूकरम् ।। 15

न लङ्घते(लङ्गेत) च निर्माल्यं शिवस्य परमात्मनः ।
धारयेच्छिवनिर्माल्यं भक्त्या लोभान्न धारयेत् ।। 16

भक्षणान्नरकं गच्छेत्तद्विलङ्घ्य च मूढधीः ।
न तस्य स्नाननैवेद्यं प्रतिगृह्णाति शङ्करः ।। 17

---

1. आरनालम् - Gruel made from the fermentation of boild rice.

2. सौवीरम् - Antimony

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

यत्र नैवेद्यनिर्माल्यं भुक्त्वा नैव प्रपूजयेत् ।
यत्र नैवेद्य निर्माल्यमलभुक् पूजयेच्छितम् ।। 18

तत्स्पृष्टि भीत्या देवोऽपि गच्छत्यत्यन्तदूरतः ।
असंस्पृश्यो भवेत्सोऽपि यो निर्माल्यमलं स्पृशेत् ।। 19

तस्मान्न संस्पृशेल्लिङ्गं नरो निर्माल्यदूषितः ।
निर्माल्यं निर्मलेनैव भोक्तव्यं स्याच्छिवस्य हि ।। 20

स्वेष्टलिङ्गे च यद्दत्तं गन्धपुष्पफलादिकम् ।
पापं सापूभक्ष्यादि भक्षयेच्छिवभक्तिमान् ।। 21

स्वायम्भुवे बाणलिङ्गे रत्नलिङ्गेषु(च)पार्थिवे ।
विनाभिषेकेद्रव्यादि नैवेद्यं भोज्यमेव हि ।। 22

धातुजेषु च लिङ्गेषु नैव दोषो निवेदने ।
मलोदरैर्नैव भोज्यमशैवैर्दूषितात्मभिः ।। 23

स्त्रीशूद्रयतिभिः पूज्ये मानुषस्थापिते स्थिरे ।
नैवेद्यं नैव गृह्णीयात्प्राणैः कण्ठगतैरपि ।। 24

चण्डेशाधिकृतिर्यत्र तत्र निर्माल्यदूषणम् ।
चण्डेश्वरस्याभिमतं निर्माल्यं भक्षितं नृभिः ।। 25

सर्वत्राधिकृतः सोऽपि महात्मा शिवभक्तिमान् ।
तस्यैव जीर्णं नैवेद्यं मद्ध्याननिहताशुभः ।। 26

न चण्डेश्वरतुल्योऽस्ति भक्तोऽन्यो भुवनत्रये ।
शिवनैवेद्यभुक्त्यर्थं स हि पात्रं शिवे सदा ।। 27

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नान्येषां ग्रहणे देवि अधिकारोऽस्ति सर्वदा ।
न भोज्यं शिवनिर्माल्यमशुद्धानां शिवे सदा ।। 28

यतो मलोदरैर्देवि न भोज्यं स्यान्निवेदितम् ।
अवैदिकोऽत्यशैवोऽपि भुक्त्वा नरकमृच्छति ।। 29

मूर्तयोऽष्टौ शिवस्यैतास्तासु निन्दां विवर्जयेत् ।
भूमिरापोऽनलो वायुःस्वं [1]ब्रध्नो दीक्षितो [2]द्विजः ।। 30

गुरौ च शिवभक्तेषु तपसा धूतपाम्मसु ।
अष्टम्यादिषु सर्वेषु भूतास्वपि च पर्वणि ।। 31

सोमवारेषु सर्वेषु नक्तभुक् पर्ववर्जितम् ।
एकादश्यां च कृष्णायां शिवमर्च्याथ नक्तभुक् ।। 32

कुर्याद्विशेषतः पूजां शुक्लायामुपता सकृत् ।
द्वादश्यां कुत्सितर्क्षे च दुर्वारेषु कदाचन ।। 33

श्मश्रुकर्माञ्जनाभ्यङ्गप्रयाणानि विवर्जयेत् ।
स्त्रीधूर्तमत्स्यमांसाद्यं सर्वपर्वसु वर्जयेत् ।। 34

त्रिकालं वा द्विकालं वा स्नानं नैत्यकमाचरेत् ।
रुद्रसूक्तैर्मार्जनादि कुर्वन् कूर्चैर्विधानतः ।। 35

शौचं च मृज्जलैः कुर्याद्गन्धलेपक्षयावधि ।
अस्नातो योऽश्नुते देवि पापमद्यात्स केवलम् । 36

---

1. ब्रध्नः – The Sun. 2. द्विजः- The Moon.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पञ्चाक्षरं च गायत्रीं रुद्रं च शतशाखगम् ।
अजपन् कृमिभुक् स स्यादजुह्वन् शोणितं पिबेत् ।। 37

अस्नातो योऽर्चयेल्लिङ्गं परेतः पापभुक् भवेत् ।
अभोजयन् वाप्यतिथिं विष्ठापूर्णमुखो भवेत् ।। 38

तस्मात्स्नात्वैव भुञ्जीत अशक्तो भस्ममज्जनः ।
प्रातः स्नात्वाम्भसा पूर्वं भस्मस्नानं समाचरेत् ।। 39

सन्ध्यामुपास्य विधिवद् वैताने जुहुयाद्यजेत् ।
पञ्चाक्षरं च गायत्रीं श्रीरुद्रं प्रणवं तथा ।। 40

लिङ्गेऽर्चयन् महादेवं त्रिसन्ध्यं बिल्वपल्लवैः ।
देवर्षीन् पितृमुख्यांश्च सन्तर्प्याधीतवेदकः ।। 41

कन्दमूलफलान्नैश्च वर्तयेदतिथिप्रियः ।
त्रिसन्ध्यमाचरेद्यस्तु शिवार्चनमनुत्तमम् ।। 42

सन्ध्ययोर्भोजनं देवि मन्नैवेद्याविशेषतः ।
निषिद्धं शोषयेद्देहं स्वीयं वाप्यतिथेरपि ।। 43

एवमाचरते धन्यः शिवभक्तः शिवार्चकः ।
पापकञ्चुकमुत्सृज्य जीर्णां त्वचमिवोरगः ।। 44

स्ववंश्यपितृभिः सार्धं शिवलोके महीयते ।
कुर्याद्वर्षं चतुर्मासं महापूजाप्रवर्तते ।। 45

आषाढे श्रावणे देवि कार्तिके मार्गशीर्षके ।
एकभक्तेन नक्तेन भुक्तिकामी शिवार्चकः ।। 46

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

भोजयेच्छिवभक्तांश्च शक्त्या दानं च दापयेत् ।
आषाढे फलपूजा स्यात् यस्य कस्य शताष्टकम् ।। 47

श्रावणे पारिजातैश्च पूजयेल्लक्षसङ्ख्यया ।
कार्तिके दीपमालाभिर्द्योतयेच्छिवमन्दिरम् ।। 48

सेवन्तिभिर्मार्गशीर्षे भक्त्या सम्पूजयेच्छिवम् ।
वसेच्छिवपुरे रम्ये चातुर्मास्यार्चको नरः ।। 49

त्रिः सप्तकुलसंयुक्तः सर्वभोगसमृद्धिभाक् ।
एवं पर्वोत्सवे श्राद्धे मासेषु नियताशनः ।। 50

भोजयञ्अछिवनैवेद्यं शिवं सम्पूज्य वाग्यतः ।
पितरः सर्वदेवाश्च शिवमाश्रित्य संस्थिताः ।। 51

प्रीते शिवे तु ते सर्वे सुप्रीताः स्युर्नसंशयः ।
वृक्षस्य मूलसेकेन शाखाः पुष्प्यन्ति वै यथा ।। 52

शिवे शिवार्चनप्रीते पुष्प्यत्यस्य वपुर्जगत् ।
नाऽनिष्टमाचरेत् किञ्चित् सर्वदेहेषु सर्वदा ।। 53

मनोवाक्कायजैर्दोषैर्नियतात्मापि पापिषु ।
यदि कुर्यात्प्रमादेन सोऽष्टमूर्तेरनिष्टकृत् ।। 54

किम्पुनः सर्वदेहेषु शिवात्मसु महेश्वरि ।
ज्ञानवैराग्यसम्पन्नं भस्मनिष्ठं जितेन्द्रियम् ।। 55

वश्यात्मानं यतात्मानं शान्तं दान्तं तपस्विनम् ।
भोजयेच्छाम्भवं देवि वेदवेदान्तपारगम् ।। 56

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पङ्क्तिपावनमूर्धन्यं श्राद्धेषु शिवयोगिनम् ।
यतीश्वरादितत्वानां परिज्ञातारमीश्वरि ।। 57

नानिष्टं द्वेष्टि सम्प्राप्तं न चेष्टमभिनन्दति ।
भवेत्साधर्म्यवैधर्म्यमेतज्ज्ञानस्य लक्षणम् ।। 58

वर्णेष्वप्यधिको विप्रो विप्राद्वेदविदुत्तमः ।
वेदविद्भ्योऽर्थविच्छ्रेष्ठस्तस्माद्याजी विशिष्यते ।। 59

ततोऽपि सत्रयाजीस्याद्वर्णिभ्योऽप्यधिको गृही ।
वनी गृहिभ्योऽप्यधिकः सन्न्यासी च ततोऽधिकः ।। 60

ततो वेदान्तनिष्कृष्टो रुद्रजापी ततोऽधिकः ।
सर्वेषामेव वर्णानां त्रैवर्णपुरुषा नराः ।। 61

पुरुषेभ्यो द्विजश्रेशष्ठस्ततो वै ग्रन्थपारगः ।
ग्रन्थज्ञाद्वेदविद्वांसस्तेभ्यस्तत्त्वार्थचिन्तकाः ।। 62

तत्वविद्भ्योऽपि देवज्ञो विशिष्ट इति मे मतिः ।
वेदान्तविद्भ्यः कोटिभ्यो विशिष्टाः शिवयोगिनः ।। 63

योगज्ञा योगनिष्ठाश्च पितरो योगसम्भवाः ।
[1]भुङ्क्ते प्रीणाति ते तस्माद् विशिष्टाः शैपिविष्टकाः ।। 64

सर्वयज्ञतपोदानैः कृतैः साङ्गैश्च यत्फलम् ।
शाम्भवो वेदविप्रो यो भस्मनिष्ठोऽत्रभुज्यते[2] (?) 65

---

1. भुक्त्वा प्रीणन्ति ते तस्मात् - .....
2. भुङ्क्ते भस्मसुनिष्ठधीः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नतेन किं गृहस्थेन प्राप्तं क्रतुशतैरपि ।
त्रिविद्यावेदिनः श्रेष्ठा नियमाध्यायिनोऽपि च ।। 66

ततोऽपि याजुषाः श्रेष्ठास्तोवाजसनेयिनः ।
साम्नां पदस्वराभिज्ञाश्छन्दोगास्तु ततोऽम्बिके ।। 67

ततोऽथर्वविदः श्रेष्ठास्ततो मन्त्रविदः स्मृताः ।
कद्रुद्रजाप्यनिरताः शतरुद्रीयजापकाः ।। 68

भस्मनिष्ठा रुद्रजाप्यनिरताः पापवर्जिताः ।
ज्येष्ठार्चनरतो विद्वान् ततो वैज्येष्ठसामगः ।। 69

षडङ्गवित्ततो देवि ततोऽप्युपनिषत्परः ।
बृहज्जाबालनिरतः पुराणेषु च निष्ठितः ।। 70

इतिहासार्थविच्छ्रेष्ठस्ततो धर्मविदुत्तमः ।
तथाऽथर्वशिरोऽध्येता शिखाध्यायी ततोऽपि च ।। 71

कैवल्योपनिषद्ध्यानाध्यायी मेऽद्य विशिष्यते ।
कालाग्निरुद्रजापी स्यात्ततोदेवि विशिष्यते ।। 72

ततः शिवरहस्यज्ञः शाम्भवः श्रेष्ठ उच्यते ।
वश्येन्द्रियः प्रसन्नात्मा यो न द्वेष्टि न काङ्क्षते ।। 73

शब्दादिविषयान् भोगान् यो जानाति गुणागुणम् ।
ज्ञानवैराग्यसम्पन्नः प्रसन्नः संयतेन्द्रियः ।। 74

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

युक्तो ह्यष्टाङ्गयोगेन संज्ञानी श्रेष्ठ उच्यते ।
शिवधर्मोद्भवज्ञानाद् ज्ञानवैराग्यसम्भवः ।। 75

ज्ञानवैराग्ययुक्तस्य शिवयोगः प्रवर्धते ।
शिवयोगेन सर्वज्ञः परिपूर्णः स्थिरो भवेत् ।। 76

स्वात्मन्यवस्थितः सर्वः शिववत्सर्वगो भवेत् ।
स्वात्मारामस्त्वसङ्गश्च सर्वत्रैव न संसयः ।। 77

तादृशं भोजयित्वा तु जगद्भोज्य फलं लभेत् ।
यो वा दोषविनिर्मुक्तां गां च दद्यात्पयस्विनीम् ।। 78

घण्टाभरणवस्त्राढ्यां सवत्सां च दृढाङ्गकाम् ।
दद्याद्गोदानमुत्कृष्टं शाम्भवेषु यतात्मसु ।। 79

मध्यमोत्तमवसत्राणि यो दद्यात्तु नवानि च ।
शिवभक्तेषु वस्त्राणि यावत्तत्तन्तुसङ्ख्यया ।। 80

तावद्वर्षशतं देवि स्वर्गलोके महीयते ।
ब्रह्मचर्यसमोपेतः(?) शान्तः शीलपरायणः ।। 81

अहोरात्रं न भुञ्जीत उपवासस्य लक्षणम् ।
अहःसु चाप्युपोष्यैव सायं यामे च भोजयन् ।। 82

तन्नक्तमिति च प्रोक्तं छायानक्तं दिनान्तिमे ।
अयाचितं केनचिद्वा दत्तं यद्भुज्यते हि तत् ।। 83

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सक्तून् प्राश्य न दुष्येत वचनात् ब्राह्मणस्य हि ।
षाण्मासं च हविः क्षारवर्जितं संस्तुतं व्रतम् ।।। 84

चन्द्रायणं तद्विज्ञेयं ह्रासवृद्ध्या तु पक्षयोः ।
शिशुचन्द्रायणं देवि पक्षयोः शुक्लकृष्णयोः ।। 85

कुर्वन् कृच्छ्रं शिवं पूज्य लभते फलमुत्तमम् ।

ईश्वर उवाच -

एवं कुर्वन् शिवाचारं वसेतैवं गृहाश्रमे ।। 86

वर्णी वनी गृहस्थो वा यतिश्चैव विशेषतः ।
शिवलोके महीयेत यावद्ब्रह्मा दिवा शिवे ।। 87

यो वा मम(दा)चारपरायणः शिवे
वसेद्गृही वा विपिनाश्रमी वा ।
यतिश्च वर्णी विधवाः स्त्रियो वा
शूद्राश्च वर्णाश्च तथैव सङ्कराः ।। 88

शमान्विताः शीलगुणोपपन्नाः
प्रसन्नवाक्कायमनोभिरेवम् ।
शिवार्चनासूद्यतचित्तवृत्तयः
विमुक्तये ते हि यतन्ति सर्वे ।। 89

चतुर्दशीसोमदिनेऽष्टमीषु
पर्वस्वपीष्टाः शिपिविष्टपूजकाः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शिष्टा विशिषाटाश्च त एव लोके
गणेन्द्रमुख्यास्त्त इहैव लोके ।। 90

ये भस्मनिष्ठाः शिपिविष्टसंश्रया
योगैकनिष्ठा अपि मे सदेष्टाः ।
अष्टाकृतेः स्वर्चनतः प्रतुष्टाः
कष्टाद्विहीना न हि दुष्टभावाः ।। 91

।। इति श्रीशिवरहस्ये एकादशाम्शे शिवगौरीसंवादे
शिवधर्माचारोनाम
अष्टाचत्वारिंशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। एकोनपञ्चाशोऽध्यायः ।।

ईश्वर उवाच -

देवैश्च मुनिभिश्चैव सेवितानि विमुक्तये ।
क्षत्रे तीर्थानि पुण्यानि चित्तशुध्यर्थमादरात् ।। 1

प्रकाश्यन्ते मया तानि शृणु पद्मसमानने ।
रुद्रावतारस्थानानि शिवक्ष्त्राणि दर्शयेत् (?) ।। 2

मृतानां तत्र रुद्रत्वं शिवक्षेत्रेषु देहिनाम् ।
आधायाग्निं शिवक्षेत्रे सम्पूज्य परमेश्वरम् ।। 3

स्वदेहं पिण्डवद्वह्नौ जुह्वन् पञ्चाक्षरेण तु ।
शिवक्षेत्रे महादेवि शिवसायुज्यमाप्नुयात् ।। 4

छित्वा पदद्वयं वापि शिवक्षेत्रेषु यो वसेत् ।
स याति शिवतां देवि नात्र कार्या विचारणा ।। 5

क्षेत्राणां दर्शनं पुण्यं प्रवेशस्तच्छताधिकः ।
तस्माच्छतगुणं पूजा जलस्नानं ततःपरम् ।। 6

क्षीरस्नानमतो देवि शताधिकमनुत्तमम् ।
दध्ना सहस्रमाख्यातं मधुना तच्छताधिकम् ।। 7

घृतस्नानेन चानन्त्यं उपवासेन सत्तमे ।
तस्मात्कोटिगुणं देवि देहान्तं शिवसन्निधौ ।। 8

शिवक्षेत्रसमीपस्तथां नदीं वापि तटाककम् ।
कूपवापिप्रशस्येत शिवतीर्थमिति स्मृतम् ।। 9

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

स्नात्वा तेषु नरो भक्त्या नरकं नैव विन्दति ।
शाम्भवान्भोजयेत्तत्र यथायोग्यं यथाबलम् ।। 10

श्रद्धया श्राद्धदानेन पितॄन् तारयते हि सः ।
भस्मत्तिपुण्ड्ररुद्राक्षधृगेव निवसेच्छिवे ।। 11

रुद्रपञ्चाक्षरपरो रुद्रलिङ्गार्चनप्रियः ।
नियतो नियमोपेतः शान्तो दान्तः स्थिरासनः ।। 12

उमाकान्तपदध्यायी नितान्तं मुक्त एव सः ।
वस्त्रापदं(?) रुद्रकोटिरविमुक्तं महाभयम् ।। 13

गोकर्णभद्रकर्णौ च स्वर्णाक्षं त्र्यक्षदीप्तिमत् ।
स्थाण्वीश्वरं च विख्यातं त्रिषुलोकेषु विश्रुतम् ।। 14

स्थानाष्टकमिदं देवि अष्टमूर्तिप्रियं परम् ।
वस्त्रापदादि स्थाण्वन्तं शिवसायुज्यदायकम् ।। 15

छगण्डलो द्विरण्डश्च कामोदं माण्डलेश्वरम् ।
कालञ्जरं शङ्कुकर्णं स्थलेशश्च जलेश्वरः ।। 16

पवित्राष्टकमित्येतच्छैवं क्षेत्रं महाघभित् ।
मृताः प्रयान्ति तत्रैव शिवस्य परमं पदम् ।। 17

पिण्डारकं कुरुक्षेत्रं तथा कनखलं शिवे ।
विमलेशाट्टहासं च महाकालमहेन्द्रकम् ।। 18

भीमेश्वराख्यं तत्पुण्यमेतद्गुह्याष्टकं शिवे ।
मृताः प्रयान्ति गणतां पापाः पुण्या अपि स्थिरम् ।। 19

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

श्रीपर्वतो हरिश्चन्द्रः केदारो मन्त्रकेश्वरः ।
ओङ्कारो भैरवेशश्च मध्यमेशः सितेश्वरम् ।। 20

एतद्गुह्याष्टकं क्षेत्रं शिवसायुज्यदायकम् ।
सन्तर्प्य च पितॄन् श्राद्धे प्रीणयेद्देवि शाम्भवान् ।। 21

अमरेशं प्रभासं च नैमिशं पुष्करं तथा ।
आपाटं पडिमण्डी च हरभूमिर्भवानकः (?) ।। 22

एतच्छैवाष्टकं क्षेत्रं शिवसायुज्यदायकम् ।
लकुलीशः प्रवाजश्च करञ्जं त्रयम्बकेश्वम् ।। 23

नागेश्वरं वैद्यनाथं सोंमेशं घुसृणीश्वरम् ।
क्षेत्राष्टकमिदं देवि मम प्रियकरं सदा ।। 24

अत्र यान्ति मृताः सर्वे रुद्रस्य परमं पदम् ।
पञ्चाष्टकमिदं ज्ञेयं शिवक्षेत्रं सलक्षणम् ।। 25

यत्रैव भावसंसक्ता भावा यान्त्यपुनर्भवम् ।
स्नानं दानं तथा श्राद्धं ये कुर्युश्चात्र भावतः ।। 26

शिवावसथकूपाद्यं तदक्षय्यफलं भवेत् (व्रजेत्) ।

स्कन्द उवाच -

इत्युक्त्वा सर्वतोदृष्टिं प्रसार्य परमेश्वरः ।। 27

शिवायतनमुख्यानि दिवि भूमौ गिरिष्वपि ।
कैलालस्थो महादेवस्तद्देव्यै दर्शयच्छिवः (?) ।। 28

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

गङ्गाद्वारं च केदारं गङ्गासागरसङ्गमम् ।
आकाशलिङ्गं परमं तीर्थं चाप्यचलेश्वरम् ।। 29

पूर्वद्वारं हरिश्चन्द्रं त्रिपुरान्तकरं हरम् ।
प्रभासं च विभासं च प्रकाशं काशकेश्वरम् ।। 30

अमरेश्वरं च वरदं देवैः पूर्वं प्रतिष्ठितम् ।
गोप्रेक्षेश्वरमीशानं तथा चन्द्रेश्वरं शुभम् ।। 31

कर्मेश्वरं च विधसं सृष्ट्यर्थं ब्रह्मणा गतम् ।
श्रीमदधिवटं चैव काटकं वारणाह्वयम् ।। 32

अनेन निर्मितं दिव्यं पुण्यं त्विलिबिलेश्वरम् ।
तत्रैव पादुकामेध्यपुण्ये त्विलिबिलेश्वरे ।। 33

ततः शृङ्गात्यकाषाटं गोरटप्राणिकेश्वरम् ।
देव्यावर्तेश्वरं पुण्यं तद्देव्या सुप्रतिष्ठितम् ।। 34

मल्लिकार्जुनसंज्ञं च ममावासनगोत्तमम् ।
राजेश्वरं च पर्यायं भद्रेश्वरमथाव्ययम् ।। 35

गतीश्वरं च वैशाखं कपोतेश्वरमन्ययम् ।
कोटिरुद्रेश्वरं क्षेत्रं रुद्रकोटिप्रतिष्ठितम् ।। 36

विष्णुनात्र तपस्तप्तं चतुर्युगमनुत्तमम् ।
विष्णवीश्वरं त्रिकूटाख्यं कोटिभद्राख्यमुत्तमम् ।। 37

सर्वेश्वरं भारभूतं अलंगृहमथापि वा ।
मध्याङ्गेशकदम्बेशौ स्कन्देनैव प्रतिष्ठितम् ।। 38

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

गोमण्डलेश्वरं चैव गन्धर्वैः पूजितं परम् ।
विद्याधरेश्वरं चैव पार्वतीशं त्वयार्चितम् ।। 39

सुरेश्वरं च त्रिदशैः पूजितं क्षेत्रमुत्तमम् ।
अवर्दिनीश्वरं चैतन्नागैः सम्पूजितं मुदा ।। 40

यक्षेश्वरं यक्षगणैः किम्पूर्षैः पुरुषेश्वरम् ।
वृषेश्वरं च धर्मेण पूजितं सर्वकामदम् ।। 41

बृहद्रथेश्वरं देवं राज्ञा तेनार्चितं मुदा
गदाधरेश्वरं देवं गन्धद्वारेश्वरं परम् ।
वेणुधारीश्वरं चैव पापहारीश्वरं तथा
गणगीतेश्वरं पुण्यं तुङ्गेसं नार्मदेश्वरम् ।। 43

यमप्रमथनेशं च भगाक्षिहरशङ्करम् ।
कर्पूरेशं मयूरेशं पुण्यं पञ्चनदाभिधम् ।। 44

कुशावर्तं तृणावर्तं गङ्गावर्तं गयेश्वरम् ।
मन्दरेशं सुन्दरेशं वामभागेश्वरं शिवे ।। 45

कृत्तिवासेश्वरं पुण्यं गजो यत्र निपातितः ।
नृसिह्महरणं पुण्यं शारभेशं महाद्भुतम् ।। 46

वामनागप्रमथनं मनमथान्तकरं परम् ।
हैरण्यगर्भं नान्दीशं मायापुर्यां प्रतिष्ठितम् ।। 47

विरजेशं विशोकेशं भगप्रमथनेश्वरम् ।
अचलेश्वरसंज्ञं च अचलैः परिपूजितम् ।। 48

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

चण्डेश्वरं च भेरुण्डगण्डकीतीरसंस्थितम् ।
व्याधेश्वरं बाहुदायास्तीरे क्षेत्रं सनातनम् ।। 49

भीमाशङ्करसंज्ञं च देवदारुवनेश्वरम् ।
हस्तीशं पात्रिकेशं च भङ्गहारीश्वरं तथा ।। 50

तुङ्गेश्वरं च तुङ्गायालिङ्गं तुङ्गप्रतिष्ठितम् ।
चर्मण्वत्याः परे पारे क्षेत्रेषु जिष्टकेश्वरः ।। 51

सरस्वतीशं तन्नद्यास्तीरे क्षेत्रं शिवालयम् ।
यामुनेशं च यमुनामनुतिष्ठति मत्प्रिये ।
गङ्गेश्वरं च गङ्गायाः प्रभवे सुप्रतिष्ठितम् ।। 52

यमुनागङ्गयोः सन्धौ सन्धीशं पुण्यदायकम् ।
माधवीशमनन्तेशं नीरातीरेप्रतिष्ठितम् ।। 53

भीमेशं भीमरथ्याश्च तटे कुञ्जहरेस्वरम् ।
वृन्दावने च वृन्देशं मधुरायामतेश्वरम् ।। 54

विपाशायां विपाशेशं नैमिशे नैमिशेश्वरम् ।
शोणातीरे शोणकेशं नार्मदं नर्मदेश्वरम् ।। 55

यत्र बाणः समाराध्य भेजे भुजसहस्रकम् ।
ओङ्कारेशं च तत्तीरे अपर्णेशप्रतिष्ठितम् ।। 56

सरय्वां च सरस्येशं गोमत्यां गोमतीश्वरम् ।
वेण्यां वेणीश्वरं पुण्यं निषधेशं नगस्थितम् ।। 57

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

असिक्नीतीरगं देवि गह्वरेश्वरसंस्थितम् ।
द्वारवत्यां द्वारकेशं कृष्णेनार्चितमीश्वरि ।। 58

अवन्तीशमवन्त्यां तु शतद्रुत्यां शतेश्वरम् ।
परादनेश्वरं कालं कालकञ्जेश्वरं परम् ।। 59

हरिभद्रेश्वरं पुण्यं गङ्गातीरे प्रतिष्ठितम् ।
असीतीरे महादेवं वरणावरुणेश्वरम् ।। 60

वायुसम्पूजितं क्षेत्रं वायवीशं सुपुण्यदम् ।
अनङ्गमथनं पुण्यं यत्रानङ्गो निपातितः ।। 61

कर्दमीतीरगं क्षेत्रं कर्दमेशं सुपुण्यदम् ।
यतीश्वरं प्रभासे च कालकालेश्वरं परम् ।। 62

मतङ्गेशं मतङ्गायास्तीरे लिङ्गं प्रतिष्ठितम् ।
गोप्रेक्षतीर्थे गोप्रेक्षं त्र्यक्षं मोक्षप्रदायकम् ।। 63

सारेशं तथा शार्वं भद्रकर्णेश्वरं परम् ।
मलयेशं कुजम्भेशं हननेतीश्वरं (?)तथा ।। 64

माण्डिकर्णेश्वरं चैव कामदं वैद्यनाथकम् ।
कृष्णेश्वरं च कृष्णायास्तीरे क्षेत्रं मनोहरम् ।। 65

पम्पेश्वरं च पम्पायास्तीरे देवि शिवालयम् ।
निदानेशं दानवत्यास्तीरे क्षेत्रं सनातनम् ।। 66

भृतुतुङ्गे तु कुन्देशं पापहारीश्वरं तथा ।
वज्रावतेश्वरं चैव फणिकायास्तटे शुभम् ।। 67

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

बलप्रमथनेशं च कालमूलेश्वरं तथा ।
व्योमकेशं हरीशं च तङ्गणेषु प्रतिष्ठितम् ।। 68

क्षिप्रेश्वरं च क्षिप्रायास्तटे क्षिप्रप्रसादकृत् ।
कालव्यालेश्वरं चैव तक्षकेण प्रतिष्ठितम् ।। 69

त्रिजटेश्वरसंज्ञं च त्रिजटानिम्नगा यतः ।
मेरुधन्वीश्वरं क्षेत्रं मेरौ वसुधनेश्वरम् ।। 70

द्रुतीश्वरं धृतावर्ते कोङ्कणे च प्रतिष्ठितम् ।
भृग्वीश्वरं च रामेण *पूजितं क्षत्रियान्तकृत् ।। 71

कोलापुरे कोलकेशं त्वया देवि प्रतिष्ठितम् ।
अन्धकेनाऽर्चितं लिङ्गमन्धकेश्वरसंज्ञितम् ।। 72

मुकुटेशं च कङ्कोललोकहारीश्वरं शिवम् ।
यमेश्वरं च साम्बेशमरण्येशं व्रतेश्वरम् ।। 73

पारणातीरगं क्षेत्रतारणेशाभिधं शिवे ।
कामलेशं दिगीशं च भासेशं प्रकटेश्वरम् ।। 74

हलाहलेश्वरं पुण्यं यत्र जातो गरादनः ।
विनायकेश्वरश्चैव पर्णादेशान्धकेश्वरः ।। 75

शतावर्तेश्वरो देवि विना भोगैर्धनेश्वरः ।
अर्धनारीश्वरश्चैव त्वया यत्राहमास्थितः ।। 76

---

* क्षत्रियान्तकृताऽर्चितम् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

विडूरथेश्वरश्चैव शिवे दशरथेश्वरः ।
कन्याकुब्जेश्वरश्चैव कान्यकुब्जे प्रतिष्ठितः ।। 77

अरुन्धतीश्वरश्चैव सिनीवालीश्वरस्तथा ।
अखण्डेशोऽप्यदाभेशो रावणेशः सुरेश्वरः ।। 78

त्रिकद्रुकेश्वरो देवि धिष्ठितापरतंगणे (?) ।
सौराष्ट्रे सोमनाथेशो राष्ट्रावर्धनपूजितः ।। 79

गोशफेशेश्वरो देवि गौतमीशो रतीश्वरः ।
यत्र हारेश्वरो देवि आनर्ते च प्रतिष्ठितः ।। 80

उमेश्वरः सोमचूडः खण्डपर्शुर्हलेस्वरः ।
मुसलेशो गलेशश्च कोसलेषु प्रतिष्ठितः ।। 81

अवन्येशो हतन्येशो वधीशो वैधृतीश्वरः ।
धिष्ठिताः सर्वदेवैश्च पूजितास्तारकोसले ।। 82

भर्गेशोथ विदर्भेशः कनकेशः प्रभादनः ।
विदर्भेऽधिष्ठता ह्येते क्षेत्रेष्वर्च्यास्त्रिशूलिनः ।। 83

कणादेशः कहोलेशः प्रतार्येशो महेश्वरः ।
मालवेषु स्थिता ह्येते साल्वेष्वेते प्रतिष्ठिताः ।। 84

कवाटहारणेशश्च दानवेशो रमेश्वरः ।
वदान्येशः कार्तिकेशो विजङ्घेशो गरेश्वरः ।। 85

रोगहारीश्वरश्चैव पुण्ड्रेष्वेते प्रतिष्ठिताः ।
काश्यां विश्वेश्वरश्चैव अविमुक्तेश्वरस्तथा ।। 86

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

त्रिलोचनेशो वीरेशः कपर्दीशो मणीश्वरः ।
व्यासेश्वरो विरूपाक्षः कर्दमेश्वर एव च ।। 87

जनार्दनेशो ब्रह्मेशो वीरहर्षेश्वरस्तथा ।
त्वयान्नपूर्णया देवि सेवितो गणपैस्तथा ।। 88

अविमुक्तो निवत्स्यामि पारयन् जनतारजः ।
सौवीरे बिल्वकेशश्च वृषाद्रीशः शिलेश्वरः ।। 89

तङ्गणेषु यतीशश्च फणीश्चेति संस्थितः ।
सैन्धवेषु महादेवः वारणेशः कुशेश्वरः ।। 90

सिह्मलेऽथ पिनाकीशः कारुण्येशः स्थितः शिवे ।
अरट्टकरहट्टेशः खान्ये वैखानसेश्वरः ।। 91

बैदम्बे बिन्दुकेशश्च प्रसन्नेशः प्रसन्नके ।
कुणिकुम्भे प्रमाथेशः सारणे सरणेश्वरः ।। 92

अङ्गेषु फणिभद्रेशो रोमहारीश्वरस्तथा ।
वङ्गेषु वागुरीशोऽथ वनेशोऽथ नदीश्वरः ।। 93

कलिङ्गेषु विरूपाक्षो गणगीतेश्वरस्तथा ।
काश्मीरेशस्तुरङ्गेश .... प्रसादनः ।। 94

वर्धनेशो महावीरो गन्धर्वेशःशतेश्वरः। -
पौराणेशो मतीशानः फणिकण्ठेश्वरः शिवः।। 95

उदयेशोऽथ .... पारियात्रे महेश्वरः ।
अस्ताचले तथास्तेशो भगमालीश्वरस्तथा ।। 96

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शिलानद्यास्तटे देवि वैद्युतेशः प्रतिष्ठितः ।
कोटीश्वरो महाकालो मुनेर्देशस्थितः शिवे ।। 97

मरुदेशे विडेशश्च सुकेशो रजनीश्वरः ।
बिल्वजे मणिचित्रेश पौण्ड्रे पौण्ड्रेश्वरः स्थितः ।। 98

सार्वके सुन्दरेशानः प्रतर्दननगार्दिनौ ।
उदुम्बरेऽम्बरेशानः कहोले होलकेश्वरः ।। 99

कोसले कमलेशश्च तस्करेशो धुनीश्वरः ।
कारण्डे ताण्डवेशश्च विसर्गेशश्च संस्थितः ।। 100

गरुडेशः पन्नगेशः कालकेषु प्रतिष्ठितः ।
पारिजातेश्वरश्चैव गन्धभद्रेश्वरस्तथा ।। 101

उत्तरापथगो देवि प्रमोदेवो भगेश्वरः ।
फुल्लेशः करुणेशश्च चित्रखण्डे व्यवस्थितौ ।। 102

दारके दारकेशश्च प्रमाथीशोरगेश्वरौ ।
करोडपालकेशश्च तरङ्गेशो व्यवस्थितः ।। 103

महाराष्ट्रे नध्यमेशः सिन्धुरीशो गणेश्वरः ।
मारेश्वरो नमित्रेशो गुर्जरे कुञ्जरेश्वरः ।। 104

वर्धनीशः स्वर्धुनीशः पारशीकेषु शङ्करः ।
तुरम्भेशः करम्भेशो दलितेशोऽवनीश्वरः ।। 105

मार्गदेशो रात्रिकेशो वेणुदारीश्वरस्तथा ।
मोसले तु हरीशानः काद्रवेशो धनाधिपः ।। 106

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

बलेषु धान्यकेशानः सुपायेशः प्रसन्नकः ।
गोनर्दे नर्दकेशानश्चीने हीनहनेश्वरः ।। 107

जाङ्गले मङ्गलेशानस्तुण्डिरे काण्डकेश्वरः ।
हूणेषु फलिकेशश्च सद्गुणेषु जटेश्वरः ।। 108

मीनाशनेषु मौनीश मैत्रे मित्रायणीश्वरः ।
बाल्वलेषु प्रधानेशः कान्देषु प्रकटेश्वरः ।। 109

तुहुण्डेषु तुहुण्डीशो होडेशः पारदेश्वरः ।
मांसादनेषु दानेशो गण्डेषु पुरुकेश्वरः ।। 110

लङ्गहेषु फणीन्द्रेषु विस्तार्येषु प्रकाशकृत् ।
मध्वादनेषु मध्वीशो गौडेषु श्रुतकेश्वरः ।। 111

चारुदेष्णेषु सोष्णीशो कुरण्टेषु लतेश्वरः ।
पावनेषु फनश्येशो राघवेशो द्रुमेश्वरः ।। 112

श्वफल्केषु सपत्नीशो नागचारीषु नागधृक् ।
फणाफणीश्वरः कौले अङ्कोलेषु जिनेश्वरः ।। 113

मनस्येषु पुरन्ध्रीशः पौष्ट्रेषु प्रथितेश्वरः ।
मिथिलेषु कनक्येश गोप्रक्ष्येशो निरिन्द्रियः ।। 114

वात्येषु भौतिकेशश्च कण्ठेषु मणिकण्ठकः ।
ताण्येषु काणवेशश्च करन्धेषु महेश्वरः ।। 115

तगरेषु महाभद्रो दर्दरेषु कृतीश्वरः ।
वैराटेषु कठोरेश विस्तडेषु कुथेश्वरः ।। 116

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पारियात्रे पात्रिकेश वितस्तीशः कुरुस्थले ।
भारते पुरभद्रेश पुरुहूतेश्वरस्तथा ।। 117

गाणेषु च गणेशानः कुमारी(श्शः)शः कुमारके ।
शतशृङ्गे महेशानः पर्जन्येशः पिलप्पिले ।। 118

कालजङ्घे रुद्रकेशः जातूकर्णेश्वरः शिवे ।
वर्धने पारिभद्रेशो बिन्ध्ये साध्येश्वरस्तथा ।। 119

विरोधेशः कोङ्कणेशस्तमालेषु महेश्वरः ।
गर्गरीषु यवीशान उद्दामे चोग्रसेनजित् ।। 120

काण्डेषु पाण्डलीशानो ब्रध्नेषु ब्रध्नकेश्वरः ।
कुरुम्भेषु सुधन्वीशो गोपनिश्च महेश्वरः ।। 121

उर्वरीशो वामनेशः शिञ्जने कुञ्जनेश्वरः ।
शातकुम्भेषु कुम्भीशो मथनेशोऽमृतेस्वरः ।। 122

पन्थावृतेश्वरश्चैव माणिकेशः प्रसोमकः ।
सोमचूडेश्वरः सैह्मे सिह्मकेशश्च शङ्करः ।। 123

काकेश्वरःस्तारकेशो भाल्लकेषु महेश्वरौ ।
वीणापाणीश्वरो नीले सौम्ये सोमेश्वरो महान् ।। 124

हेमकूटे च कूटेशः त्रिकूटे कर्कटेश्वरः ।
सह्मे सह्मेश्वरो देवि हिमवत्यङ्कुरेश्वरः ।। 125

केदारश्चैव भौमेशो गर्गरीशोऽथ चन्दने ।
हरिशैले हरीशश्च कर्पटे कर्पटीश्वरः ।। 126

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सत्येश्वरो वैनतेशो गारुडे पर्वतोत्तमे ।
प्रजापतीशो वेदीशस्त्रिधामेशो रतीश्वरः ।। 127

हारे गर्भेश्वरश्चैव ब्रह्मगर्भेश्वरस्तथा ।
रत्नाद्रौ रत्नगर्भेशो विद्येशो वैद्यपर्वते ।। 128

कन्दर्पेशश्च सर्पेशो गोवर्धनगिरिस्थितौ ।
प्रतार्येशस्ताम्रकेशस्ताम्रशैलस्थितावुभौ ।। 129

कुकुभे ककुभेशश्च दिग्वासेशः पवित्रके ।
वृषदर्भेश्वरश्चैव तोयकेशः शिवे गिरौ ।। 130

हरिकेशशिखण्डीशौ गोपर्वतगतावुभौ ।
प्रभामण्डलकेशश्च विधामेशश्च शङ्करः ।। 131

करञ्जपर्वतगतास्ताम्रभूमौ पिलःपिलः ।
उण्डरीशस्तुण्डरीशो गह्वरे पर्वते स्थिताः ।। 132

मार्गपाणीश्वरश्चैव सौधन्वे पर्वते स्थितः ।
स्वर्णवेत्रधरश्चैव शक्तीशो मेरुमैलिगः ।। 133

देवेश्वरो देवकूटे वृषभेशो वृषाचले ।
ककुद्मतीश्वरश्चैव ककुद्मति स्थितः शिवः ।। 134

कपालेशः पालगोरश्चित्रघण्टे नगेश्वरः ।
वप्राणसेश्वरश्चैव दण्डपाणीश्वरस्तथा ।। 135

भाद्रे गिरौ भद्रकेशो मन्दरे सुन्दरेश्वरः ।
कलशेशकुलालेशौ कैलासे दक्षिणे स्थितौ ।। 136

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मनस्वीशगणेशानौ हरिद्वर्णनगस्थितौ ।
वासन्तिकेशो वेदेशो गतीशो अरुणेश्वरः ।। 137

स्तेनेश वातभद्रेशः कुमुदे कुमुदेश्वरः ।
वातेशो धनदेशानो वीतिहोत्रेश्वरस्तथा ।। 138

दुन्दुभे पर्वतवरे दुन्दुभीयो महेश्वरः ।
सङ्गहारीश्वरश्चैव ज्वालागर्भेश्वरस्तथा ।। 139

वातुलेशः पन्नगेशः कार्कोटः कुक्कुटेश्वरः ।
बकेश्वरः सारसेश शक्रेशो गन्धपर्वते ।। 140

सुनाभे पर्वतवरे सुनाभेशस्तथेश्वरः ।
कर्मारि पर्वतवरे कर्मारेशः स्थितः शिवः ।। 141

क्रौञ्चे क्रौञ्चेश्वरो देवि हरिते हरिकेशशकः ।
वह्निशैले च वह्नीशो मलये मलयेश्वरः ।। 142

वैतसे वैतसेशानो वृषभे वृषभेश्वरः ।
कपालमोचकः कान्ते रोहिते रोहितेश्वरः ।। 143

कन्धरे भूधरेशानः विद्युत्ये वैद्युतेश्वरः ।
वे भाण्डे भाण्डवीशानः करमर्दे सनातनः ।। 144

तुहिण्डे काण्डकेशश्च चन्द्रेशश्चन्द्रपर्वते ।
विनन्दने सुनन्दीशः कणवाद्रौ कणेश्वरः ।। 145

एते प्राधान्यतः शैला विगाढा ये महार्णवम् ।
तन्मौलिलिङ्गान्येतानि संदृष्टान्यपराणि मे ।। 146

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नदीनदसमुद्रेषु द्वीपेषु द्वीपकेश्वरः ।
तव पीठान्यनन्तानि पञ्चाशत्तेषु मुख्यतः ।। 147

तन्नामानि वदाम्यद्य शृणुष्व कमलानने ।
मणिद्वीपे च कैलासे अविमुक्ते च मङ्गला ।। 148

सनातने सिनीवाली भद्रे भद्रवटेश्वरी ।
कालञ्जरे जरा देवी जवाले(?)जालकेश्वरी ।। 149

ओङ्कारके महादेवी पर्जन्या गोमतीतटे ।
विपाशा पाशमथनी आर्यावर्ते च मेनका ।। 150

कलावती कान्तशैले मरुधा मरुधामनि
ज्वालामुखी प्रभासे त्वं कान्यकुब्जे च कन्यका ।
कोकामुखे देविका त्वं सहजन्या घृतादिने (?)
पार्वती रमणे शैले तुङ्गायां तुङ्गका शिवे ।। 152

पर्णादने वेगवती रुद्रकोटौ महेश्वरी ।
गोढके गोमती देवि वनेशे रमणीमणिः ।। 153

तालजङ्घे खण्डकेशी दर्दरे त्वमरावती ।
प्रसादिनी प्रसन्नास्ये गारुडे गरुडेश्वरी ।। 154

अनन्तेऽनन्तशक्तिस्त्वं सिह्मले सिह्मवाहिनी ।
चन्द्रले चन्द्रला देवी वदर्यां कान्तिदायिनी ।। 155

विरजे वीतशोका त्वं कलिन्दे कालिका शिवा ।
महेशी त्वमरावत्यां नन्दिनी गोनगे स्मृता ।। 156

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तेजोवती करम्भास्ये कङ्कोले लकुलीश्वरी ।
दुर्गा दुर्गाकरक्षेत्रे .... स्मृता ।। 157

समोदिन्यग्निशैले त्वं कामठे त्वग्निसन्निभा ।
हेलावती कुरुक्षेत्रे सिद्धिदाऽऽयुष्यके शिवे ।। 158

वैद्यनाथे वेगवती कमले कमलावती ।
काकोदे नागभूषा त्वं वसाने वासिता स्मृता ।
गन्धर्वी गन्धशैले त्वं वरास्या त्वं हराचले ।। 159

तक्कोले कालशमनी रुद्राणी स्थानपीठके ।
आनर्ते त्वमिला देवी क्षमायांत्वं क्षमायिनी (?) ।। 160

नैमिशे निमिषा देवी कुणिभद्रे च कुब्जिका ।
विन्ध्ये त्वं कौशिकी देवी बन्धने बन्धमोचनी ।। 161

वटारण्ये सदा देवि सोमाद्रौ सोममस्तका ।
विजया विजयापुर्यां प्रतिष्ठाने च कन्यका ।। 162

वेगा त्वं वैनते शैले बृहती धातुशैलके ।
तुङ्गाचले तुङ्गकुचा विमनस्का विराजने (?) ।। 163

हलाहलेऽहलास्या त्वं कन्दर्पे दर्पनाशिनी ।
कुणिकुम्भे महादेवि(वी) भद्रदा कनकाचले ।। 164

कुरङ्गलोचना रङ्गे शताङ्गे शान्तिदायिनी ।
मेघमाला मेघगिरौ तौवरे बिन्दुरूपिणी ।। 165

उड्याणे चण्डिका देवी मौसले मुसलेस्वरी ।
तुलजा तुलजापुर्यां महादेवे च शाम्भवी ।। 166

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

भैरवी भैरवे पीठे त्रिकोणे त्वं त्रिकोणगा ।
ललिता ललितापुर्यां श्रीशैले भ्रमराम्बिका ।। 167

राजेश्वरी राजपीठे कौथुनी कुधुमैश्वरे (?)
वामना त्वं वेगिकायां महेन्द्रे चन्द्रपूजिता ।। 168

गतिदा तारणे प्रोक्ता शरणे शरणाम्बिका ।
कोसले सालमथना हिमशैले च गण्डिका ।। 169

नग्निका कोटिकायां तु करञ्जे करमर्दिनी ।
गर्भेश्वरे त्वं गर्भेशी कु .... नन्दिमोदिनी ।। 170

वायव्ये त्वं भगाक्षी च विशालाक्षी कहोलके ।
दध्यादने भीमका च वनवासी च वन्यका ।। 171

गोनर्देऽपर्णिका देवि कान्तीपुर्यां च कान्तिका ।
समासीना मेरुमौलौ कदम्बे बिम्बरूपिणी ।। 172

मन्दरे सुन्दरी त्वं च चित्रशेले त्रिशूलिका ।
क्रौञ्चारण्ये स्कन्दमाता गणमाता गणेश्वरे ।। 173

लोकिनी लोकमाता त्वं कोलापुर्यां च कोलिनी ।
पद्मगर्भे च पद्मा त्वं विरागा मास्यके शिवे ।। 174

कूर्मग्रीवा हयशिरे भेरुण्डे भण्डनाशिनी ।
उपाङ्गेऽपाङ्गिका देवि हस्तिशैले च हस्तिका ।। 175

गोकर्णे शितिकण्ठा त्वं काञ्च्यां त्वं कामकोटिका ।
हालास्ये श्यामला देवी विशाला गन्धमादने ।। 176

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मलयेशे भगवती विनाशे कालिका स्मृता ।
महेन्द्रे चारुचन्द्राङ्का कनके कमलेश्वरी ।। 177

एतानि दिव्यपीठानि तव सिद्धिप्रदानि च ।
चेरचोलेषु पाण्ड्येषु लिङ्गानि शृणुमेऽम्बिके ।। 178

सह्यजा ताम्रपर्णी च पम्पावेगवती तटे ।
आम्रासङ्गे मत्स्यवत्यास्तटे परमपावने ।। 179

सह्यमौलौ सह्यकेशः सिह्मेशे शितिकण्ठकः ।
तृणज्योतीश्वरश्चैव शिवे मरकताचले ।। 180

रत्नाद्रि शिखरेशानो मातृभूतेश्वरस्तथा ।
कम्पातटे तथा काञ्ची(ञ्च्यां) एकाम्रेशो महेश्वरः ।। 181

श्रीमद्दक्षिणकैलासे कालहस्तीश्वरस्तथा ।
चेरेषु च श्रीगिरिराट् श्रीशैलेशश्च तत्र हि ।। 182

शिखरेशः पनस्येशो(?) घण्टाकर्णेश्वरस्तथा ।
तीर्थशश्च महादेवि स्मरणान्मुक्तिदायकः ।। 183

त्र्यम्बकश्च महाशैलो यस्माद्गोदावरी नदी ।
शेषाचले कुमारेशो ह्यरुणाद्रौ नगेश्वरः ।। 184

वृद्धाचलेशो गोभद्रे गोपर्वतशिरोगतः ।
शिवमार्गसहायेशः श्रीमदभ्रसभेश्वरः ।। 185

मूलस्थानेश्वरस्तत्र दर्शनादेव मुक्तिदः ।
चेरेषु प्रथिता ह्येते शिवक्षेत्राण्यपि क्रमात् ।। 186

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

चोलेषु दिव्यलिङ्गानां अनुक्रम इहोच्यते ।
शिवे पञ्चापगेशाख्यो वटेशोऽथ द्रुतीश्वरः ।। 187

धृतीश्वरः पुष्पकेशस्तञ्जेशो वेदिकेश्वरः ।
श्रीप्रपाणीश्वरो देवि ऐरावतगजार्चितः ।। 188

क्षीरिणीशः सुन्दरेशः कुम्भेशश्चार्जुनेश्वरः ।
तेजिनीशः साक्षिनाथो बिल्वारण्येश्वरस्तथा ।। 189

दुर्गेश्वरो भीमकेशो वैद्येशो ब्रह्मकेश्वरः ।
घटेश्वरश्च श्वेतेशश्छायावनमहेश्वरः ।। 190

श्रीवाञ्छेशस्त्रिकूटी(टे)शो मङ्गलेशोऽग्निकेश्वरः ।
कमलालये वल्मीकेश आनन्देशश्च पार्वतः ।। 191

हाटकेशश्च सिद्धेशस्तत्र देव्यचलेश्वरः ।
तथा वेदवनेशश्च सेतौ रामेश्वरः शिवः ।। 192

चोलेषु प्रथितं ह्येतत्तथान्यदपि शङ्करि ।
सर्वलिङ्गालयश्चोलः सह्यजातीर सङ्गतः ।। 193

तौण्डीरे च शुचीन्द्रेशः पापनाशस्तथाम्बिके ।
अर्जुनेशश्च स्थाण्वीशो हस्तिशैलेश्वरस्तथा ।। 194

तथा वेगवतीतीरे पाण्ड्यो हालास्यशङ्करः ।
तथा वैशालिवाटीशः शिवे चाम्रातकेश्वरः ।। 195

शिवे दक्षिणगोवर्णो मत्स्येशो भरतेश्वरः ।
शिवे वातपुरेशश्च तथा रत्नसभेश्वरः ।। 196

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तथात्रित्र(?) सभेशश्च उग्रेशश्चामृतेश्वरः ।
एतत्प्राधान्यतः प्रोक्तं ताम्रपर्ण्यास्तटे शिवे ।। 197

एतेषु क्षेत्रवर्येषु स्थितो भस्मविभूषणः ।
देहान्ते शिवसायुज्यं भवत्येव महेश्वरि ।। 198

तरवः पशवः कीटा मृता यान्त्यपुनर्भवम् ।
वसन् पठेदिदं स्तोत्रं तेषु क्षेत्रेषु शैलजे ।। 199

ईश्वर उवाच -

कञ्जाक्षमब्ज परमासन जातशिक्षं
वाहीकृतोक्षमनलाक्षविषाद्यभक्षम् ।
सन्धुक्षितान्धकभगाक्षहरं सुदक्ष-
दीक्षापहं भजत भिक्षित मौनियक्षम् ।। 200

विश्वम्भराधरणभूषण मारकाल-
संशोषण प्रमनाथ सनाथयास्मान् ।
सर्गस्थिति प्रलयकारणतारणाद्य
शम्भो पदाब्जयुगलं शरणं प्रयामि ।। 201

विश्वोदयस्थितिविनाशन हेतुभूत
भूतादिकार्यकरणाधिप कारणेश ।
श्रीव्योमकेश हरिकेश महेश शम्भो
कोशावकाश परमेश नमो नमस्ते ।। 202

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अम्बां कदम्बसुमसन्निभचारुबिम्बां
बिम्बोपमाधरवरां सुबृहन्नितम्बाम् ।
रोलम्बराजितकचां प्रणताः स्म सर्वे
हेरम्बमुख्यजननीं धृतसत्कदम्बाम् ।। 203

देशेष्वेतेषु शैले प्रवरनदनदीसङ्गमे सिन्धुसन्धौ
जातान्यत्त्युत्तमानि प्रथितबहुफलान्येव दातुं स्थितानि ।
आलोकानां सुराणां मुनिजन सुकृतापारपुण्याङ्कुराणि
पश्याद्य प्रथितेक्षणेन मनसा धन्ये ह्यनन्यानि मे ।।204

जन्यानां फलमेव देहि गिरिजे मान्यो न चान्यो जनः ।

यत्र त्रिणेत्रपदपङ्कजमित्रभावो
भस्माक्तगात्र सुचरित्रपतत्रिवाहः ।
क्षेत्रेषु वासमभिरोचयते स तत्र
श्रीपत्रपूजनपरो मम दृष्टिपातः ।। 205

।। इति श्रीशिवरहस्ये एकादशाम्शे शिवगौरीसंवादे
सर्वक्षेत्र प्रभावकथनं नाम
एकोनपञ्चाशोऽध्यायः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

।। पञ्चाशोऽध्यायः ।।

शिव उवाच -

सर्वेषामेव वर्णानां शिवाश्रमनिषेविणाम् ।
शिवधर्मा मयैवोक्ता धर्मकामार्थमुक्तये ।। 1

ब्राह्मणः क्षत्रियो वैश्यः स्त्री शूद्रो वा शिवाश्रमी ।
ब्रह्मचारी गृहस्थो वा वनस्थो वाऽथ भिक्षुकः ।। 2

स्वाश्रमात्परतः कुर्यात्पुष्पारामं सुशोभनम् ।
आग्नेय्यामग्निकार्यार्थमैशान्यामीश्वरालयम् ।। 3

स्व(सु)देशासम्भवे कुर्याद्यत्रस्यात्सम्भवो भुवः ।
गृहस्य दक्षिणे कुर्यात् अतिथ्यभ्यागतालयम् ।। 4

नैर्ऋत्यां च विहारार्थं वारुण्यामुदकाश्रयम् ।
वायव्यां धान्यसदनं कौबेर्यां भाण्डकुण्डकम् ।। 5

त्रिसन्ध्यमर्चयेद्देवमग्निकार्यं च भक्तितः ।
द्विकालमेककालं वा पूजयेल्लिङ्गमैश्वरम् ।। 6

असम्पूज्य शिवं मोहात् न भुञ्जीयात्कदाचन ।
अन्यानि शिवकर्माणि यथाजोषं समाचरेत् ।। 7

शिवलिङ्गार्चनं श्रेष्ठं तेभ्यः सारमनुत्तमम् ।
एष एव परो धर्म एतदेव परं तपः ।। 8

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

एष एव महायज्ञः एतद्दानं परं मतम् ।
प्राणात्यये धनत्यागे मरणे गदपीडिते ।। 9

अनुकल्पा मयैवोक्ताः शिवाश्रमनिषेविणाम् ।
स्नानाशक्तस्तदा देवि भस्मस्नानं समन्त्रकम् ।। 10

कार्यं त्रिपुण्ड्ररुद्राक्षधारणं वा यथाबलम् ।
प्रदक्षिणाद्यशक्तोऽपि चिन्तयेच्छिवमव्ययम् ।। 11

पुत्रेण पूजयेल्लिङ्गं ततो भोजनमाचरेत् ।
कार्यातिपातसंरोधे राष्ट्रविक्षोभणादिषु ।। 12

मनसा पूजयेद्देवं वाचिकैर्वा जपादिभिः ।
शिवाश्रमाश्रितैरेव श्रमिभिश्च तदाम्बिके ।। 13

अयोगी पूजयेल्लिङ्गे योगी सर्वत्र भावयेत् ।
मनसा वा महादेवं ध्यायेत्साम्बं त्रिलोचनम् ।। 14

शिवार्थं पुष्पहिंसायां न भवेत्स तु हिंसकः ।
यज्ञार्थं पशुहिंसावन्न तद्दोषाय कल्पते ।। 15

यद्यल्पमन्यकार्यार्थे हिंसते स तु हिंसकः ।
शिवार्चनपरो नित्यं सर्वहिंसाविवर्जितः ।। 16

सर्वत्र ब्रह्मचर्येण शिवयोगी वसेत्सदा ।
देवतातिथिभैक्षार्थं पचेन्नैवात्मकारणात् ।। 17

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

आत्मार्थे यः पचेन्मोहान्नरकार्थं स जीवति ।
देवार्थं पचनं शम्भोः पूजार्थं पुष्पसञ्चयः ।। 18

स्वर्गार्थं धनधान्यादि नरकार्थं विपर्यये ।
यज्ञस्तृतीयभागेन कुर्वीतैवं शिवार्चनम् ।। 19

कुर्वीत धर्मेष्वेतेषु व्ययं जीवितमध्रुवम् ।
न्यायेनोपार्जितं वित्तं मद्‌भक्त्या सर्वसौख्यदम् ।। 20

दुखेनान्येन यद्वित्तं सम्पादितमधाय तत् ।
यः शिवब्रह्मचारी स्यान्नैष्ठिको वा जितेन्द्रियः ।। 21

विरजाहोमकृन्नित्यं तद्‌भस्मपरिधारकः ।
त्रिसन्ध्यं पूजयेल्लिङ्गं बिल्वपत्रैः सुमाक्षतैः ।। 22

भैक्षं निवेद्य देवाय सोऽश्नीयाद्‌भक्तिपूर्वकम् ।
निवृत्तः सर्वसङ्गेभ्यो यजेद्रुद्रमनन्यधीः ।। 23

स शिवब्रह्मचारी स्याद् गृहस्थो यः शिवार्चकः ।
आधायाग्नीन् यजेद्यज्ञैर्यज्ञेशं परमेश्वरम् ।। 24

पञ्चयज्ञपरो नित्यं पञ्चास्यध्यानतत्परः ।
अग्निरित्यादिभिर्मन्त्रैर्भस्मोद्धूलितविग्रहः ।। 25

त्रियायुषत्रिपुण्ड्राङ्को रुद्राक्षपरिमण्डितः ।
त्रिसन्ध्यमर्चयेल्लिङ्गं रुद्रपञ्चाक्षरादरः ।। 26

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

स्वाध्यायशीलः सततं संविभज्यातिथिप्रियः ।
एवं शिवग्रहस्थो यः शिवलोकं व्रजेत्स हि ।। 27

साङ्गान्वेदान्यथान्यायमधीत्य विधिपूर्वकम् ।
हुत्वा यज्ञैर्यथान्यायमग्निष्टोमादिभिः क्रमात् ।। 28

ततो विश्वजिदन्तैर्वा अग्निष्टुच्छान्तिमेव वा ।
पुत्रानुत्पाद्य सद्वृत्तान् सदारः साग्निको द्विजः ।। 29

वानप्रस्थाश्रमं गत्वा त्रिकालं स्नानभस्मधृक् ।
त्रिपुण्ड्रमण्डिततनुर्वन्यैश्च कुसुमैः फलैः ।। 30

पूजयेच्च महादेवं त्रिकालं कन्दमूलभुक् ।
चान्द्रायणादिभिर्दहं शोषयन् ब्रह्मचर्यवान् ।। 31

ब्रह्मविद्यामधीयानः सदा त्यक्तेषणो यतिः ।
आत्मन्यग्नीन् समारोप्य ज्ञानज्ञेयात्मविद्यतिः ।। 32

भवेत्स गुरुमासीनं समुपेत्याभितो व्रजेत् ।
तेनाऽऽज्ञातोऽनुतिष्ठेत धर्ममेनं शुचिव्रतः ।। 33

गुरौ शिवे विनाभावं न कुर्यान्मोहतोऽपि वा ।
कुर्यात्स्नानं त्रिषवणं यतिस्त्यक्तेषणः शिवम् ।। 34

पूजयेद्दलितैर्बिल्वैः श्रीरुद्रं प्रणवं जपेत् ।
त्रिपुण्ड्रभस्मरुद्राक्षकलितो दण्डकुण्डधृक् ।। 35

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

काषायवसनो मौनी सदोपनिषदर्थवित् ।
भैक्षं निवेद्य देवाय भुञ्जीयाद्ग्रासकाष्टकम् ।। 36

एवं वसन् वै नियतः शिवलोकं यतिर्व्रजेत् ।
शिवक्षेत्रे वसेन्नित्यमविमुक्तेऽपि वा मम ।। 37

तत्र मे तारकं प्राप्य प्रणवं मुच्यते यतिः ।
अत्याश्रमी भवेद्वापि सर्वसङ्गविवर्जितः ।। 38

आपादमस्तकं नित्यं भस्मनोद्धूल्य विग्रहम् ।
रुद्राक्षकण्ठाभरणः शिरस्येव जटाधरः ।। 39

त्रिपुण्ड्रफालः सततं श्रीरुद्रजपतत्परः ।
सर्वत्रैव महादेवमात्मानं परिचिन्तयेत् ।। 40

आत्मारामोऽभितिष्ठेत पुण्यपापविवर्जितः ।
लिङ्गं शिवाश्रमस्थानां भस्मना च त्रिपुण्ड्रकम् ।। 41

हस्ते मूर्ध्न्युपवीते च रुद्राक्षं धारयेत्ततः ।
अन्यवर्णेष्वाश्रमिभिरेवमेव यथाबलम् ।। 42

राज्ञोऽपि पालनं नित्यधर्मोयुद्धं च सन्मुखम् ।
मखादिकरणं चैव वर्णाद्याश्रमपालनम् ।। 43

ऊर्ध्वपुण्ड्रधराणां तु देशान्निःसारणं शिवे ।
एवं कुर्वञ्छिवाचारं नृपः शिवतनुर्भवेत् ।। 44

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

वैश्योऽपि कृषिगोरक्षावाणिज्येज्यादिभिर्युतः ।
भस्मत्रिपुण्ड्ररुद्राक्षलिङ्गार्चनपरः सदा ।। 45

धर्मवृध्याभिजीवेत अकुर्वन् लोकपीडनम् ।
एवं वैश्यः सदाचारः शिवलोके वसेच्छिवे ।। 46

शूद्रोऽपि सर्ववर्णानां शिशुश्रूषुर्भस्म भूषणः ।
विरक्तश्चेच्छिवागारे वसेत्काषायवस्त्रधृक् ।। 47

शिवकैङ्कर्ययुक्तात्मा शिवद्रव्याण्यसंस्पृशन् ।
भैक्षवृत्त्याऽभिजीवेत लिङ्गमभ्यर्चयञ्छिवे ।। 48

विरक्ता स्त्री यदि शिवे सर्ववर्णेष्वनुक्रमात् ।
काषायवसनोपेता जटिला भस्मभूषणा ।। 49

त्रिपुण्ड्ररुद्राक्षधरा शिवलिङ्गार्चनादर ।
भैक्षेणैवाभिवर्तेत यावद्देहान्तमीश्वरि ।। 50

शिवक्षेत्रे शिवागारे सम्मार्जनपरायणा ।
उपलेपन कर्त्री वा मालाकार्यथवा शिवे ।। 51

दीपोद्‌बोधकरी वापि पापैर्मुक्ता शिवं व्रजेत् ।
सङ्कीर्णा अन्त्यजाः सर्वे शिवालयविलोकनैः ।। 52

रथानां कर्षणाद्देवि विमुक्ता भस्मभूषिताः ।
रुद्रभक्तैः सदा धार्या रुद्रसङ्ख्या जटाः श्रुताः ।। 53

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

भस्म धार्यं प्रयत्नेन त्रिण्ड्रोद्धूलनात्मना ।
विधूय सर्वपापानि शिवलोके महीयते ।। 54

जलस्नानादसङ्ख्यातमाग्नेयस्नानजं फलम् ।
वारुणं मलनानाय भस्मनाऽज्ञाननाशनम् ।। 55

महापातकयुक्तो वा युक्तो वा सर्वपातकैः ।
तस्मात्स्नानाद्विशुद्धात्मा शिवलोकं स गच्छति ।। 56

सोऽपि यां गतिमाप्नोति न तां यज्ञशतैरपि ।
गन्धलेपविहीनोऽपि भावदुष्टो न शुध्यति ।। 57

भावशुध्या भवेत्पूतो यो वा कोवापि मानवः ।
स्नानं वारुणमाग्नेयं दिव्यं वायव्यमानसम् ।। 58

पञ्चस्नानानि सर्वेषां विहितानि विशुद्धये .
वारुणं यज्जले स्नानं आग्नेयं भस्मना भवेत् ।। 59

वृष्टया सातपया दिव्यं वायव्यं रजसा गवाम् ।
मानसं ध्यानमन्त्रादि विहितं शम्भुना शिवे । 60

उदकुम्भसहस्रेण मृढा नदशतेन वा ।
भावदुष्टो न शुध्येत शतहायनमप्युमे ।। 61

भावपूतं चरेच्छौचं वस्त्रपूतं जलं पिबेत् ।
दृष्टिपूतं न्यसेत्पादं सत्यपूतं वचो वदेत् ।। 62

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

जटी कपालपाणिः स्याद्भस्माङ्गो वीतरागवात् ।
यदेव सर्वधर्माणां फलं तत्स्याच्छिवाश्रमे ।। 63

शिखाजये जटी मुण्डी भिक्षाशी विगतस्पृहः ।
मौनी भूतानुकम्पी स्यात् यती शान्तमनाश्चरेत् ।। 64

माधूकं रचयन् भैक्षं एकान्नं परिवर्जयेत् ।
उपवासात्परं भैक्षं भैक्षान्नक्तमयाचितम् ।। 65

यतिस्तु नियतं भक्तो शिवक्षेत्रे वसेद्यतिः ।
यः सर्वसङअगनिर्मुक्तो मौनी शिवपरायणः ।। 66

योगनिष्ठोऽप्ययोगी वा शिवक्षेत्रे वसेत्सदा ।
योगी यां गतिमाप्नोति देहान्ते तां गतिं व्रजेत् ।। 67

वसेदायतने नित्यं सगणः शिवधर्मवित् ।
पुष्पारामैककर्ता च बिल्वारोपणकृन्नरः ।। 68

एकं वा बिल्वजतरुं स्थापयेत्तु शिवाश्रमे ।
यावत्तत्पत्रकुसुमबीजमूलफलानि च ।। 69

तावद्वर्षस सहस्राणि शिवलोकेमहीयते .
त्रिस्नानपूजासंयुक्तः कौपीनाच्छादनी तथा ।। 70

वसेदामरणं क्षेत्रे शिवलिङ्ग समीपतः ।
देहिनां तत्र पञ्चत्वं शिवसायुज्यदायकम् ।। 71

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शिवध्यानरताः शान्ताः शिवलिङ्गार्चनप्रियाः ।
ऋजवो मृदवः स्वच्छा अनुकूलाः प्रियंवदाः ।। 72

शिवाभिमानसम्पन्नास्ते शैवाः शिवसम्मताः ।
भस्मनिष्ठास्सदा तुष्टा नित्यं स्वागतवादिनः ।। 73

मैत्रायणाश्च भूतेषु शैवास्त्यक्तेषणाः शिवे ।
चापलानि न कुर्वन्ति स्त्रगादेरवशंगताः ।। 74

शिवभक्तिः सदा शान्तिरहिंसा समदर्शिता ।
सन्तोषः सत्यमस्तेयं ब्रह्मचर्यं तथाष्टमम् ।। 75

यथासम्भवपूजाभिः सदाशिवकथारतिः ।
कर्मणा मनसा वाचा लाभालाभेषु साम्यता ।। 76

शौचमार्जवसम्पत्तिर्भक्ते वै संविभागता ।
दयादाक्षिण्यसम्पत्तिर्निन्दामात्सर्यवर्जनम् ।। 77

हुङ्कारं तर्जनं चैव वर्जयेत्तु शिवाश्रमे ।
मद्भक्तेषु सदा प्रीतिरन्यपूजानुमोदनम् ।। 78

स्वयमभ्यर्चनं लिङ्गे पत्रपुष्पफलादिभिः ।
ममानुस्मरणं नित्यं नामभिश्च सदाम्बिके ।। 79

कथासु श्रूयमाणासु स्वरनेत्राश्रुपातनम् ।
एवं भक्तिः सदा कार्या शिवभक्तेष्वपि क्रमात् ।। 80

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

स्वदेहनिर्विशेषेण शिवभक्तांश्च पालयेत् ।
भयदारिद्र्यरोगेभ्यस्तेषु कुर्यात्प्रियाणि च ।। 81

तेषां कुटुम्बं संरक्षेत् स्वकुटुम्बं यथा तथा ।
शिवस्य परिपूर्णस्य किं नाम क्रियते नरैः ।। 82

शिवभक्तार्चनेनैव प्रसादः शाम्भवो भवेत् ।
यो वा को वाऽस्तु मनुजो भस्मरुद्राक्षदेहवान् ।। 83

धृतशङ्करचिह्नाङ्गः पूज्यो ब्राह्मणजन्मभिः ।
शाम्भवो ब्राह्मणो यः स्यात् भोजनैस्तं प्रसादयेत् ।। 84

इतरान् प्रश्नकथनैः स्नानदानैश्च तोषयेत् ।
यतिं वा शाम्भवं श्रान्तं भस्मपुण्ड्रादिमण्डितम् ।। 85

स्वागतासनपाद्यार्घ्यमधुपर्कनिवेदनैः ।
पूजयित्वा यथान्यायं कुर्यादप्यभिवादनम् ।। 86

भोजनाच्छादनैर्देवि तस्येष्टं यदकल्पितम् ।
कुर्यादेवाविचारेण शिवप्रीत्यै च शाम्भवैः ।। 87

शिवयोगिनमायान्तं प्रत्युत्थानाभिवादनैः ।
भोजनाच्छादनेनापि रम्यावसथवासनैः ।। 88

मठोपकरणादीनि दद्यात्प्रीत्यर्थमीशितुः ।
प्राप्ताय शिवभक्ताय श्रान्ताय क्षुधिताय च ।। 89

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तुष्टिं करोति यो नित्यं धनधान्यैश्च वाससा ।
गृहोपकरणैर्देवि शाम्भवं वासयेत्तु यः ।। 90

गोमहिष्यादि सम्भारैर्वासयेद्यो शिवेरतम् ।
वर्षकोटिसहस्राणि वासः कैलाससद्मनि ।। 91

शिवभक्ताय विप्राय पुराणज्ञाय सादरम् ।
दत्वा शैवपुराणानि यावदक्षरसङ्ख्यया ।। 92

तावद्वर्षसहस्राणि शिवलोके महीयते ।
दीनं भीतं तथैवार्तं श्रान्तं चोरैः प्रपीडितम् ।। 93

आश्वासयीत भक्तं मे शक्तो भक्तोऽथ मे प्रियः ।
दारिद्र्यार्णनिर्मग्नं भक्तं सीदत्कुटुम्बकम् ।। 94

समुद्धरेन्नृपो ज्ञात्वा स्वराज्ये वासयेच्च तम् ।
स नृपः स्वपितृन् मग्नान् [1]रज्जुकूपाद्घटं यथा ।। 95

[2]नरकाश्चोद्धरत्येव शिवभक्तजनार्दनात् ।
देयं त्रिपुण्ड्रफालेभ्यस्तद्दानं सात्विकं विदुः ।। 96

नाभ्यसूयेच्च तान् सर्वांस्त्रिपुण्ड्राङ्कान् द्विजोत्तमान् ।
यद्यासूयेच्च नरके पतेत्पूर्वपितामहैः ।। 97

---

1. रज्ज्वा कूपाद्घटं यथेति सुगमः पाठः ।
2. नरकाच्चोद्धारत्येव ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

त्रिपुण्ड्रधारिणे दत्तं दानं भवति चाक्षयम् ।
[1]दातृप्रतिग्रहीतॄणां नैव दोषो हि दानजः ।। 98

स्वशक्त्यैवभक्तेभ्यो दद्यात्किञ्चिदकुत्सयन् ।
कारुण्यात्सर्वभूतानां देयमन्नं स्वशक्तितः ।। 99

अभावे तृणभूम्यम्भःपत्रमूलफलानि च ।
दत्वाऽथ निर्धनो वापि प्रियं वा व्याहरेत्सदा ।। 100

[2]नहीद्दत्स्वर्गसोपानममलं यत्प्रियं वचः ।
प्रत्युत्थानाभिगमनमनुव्रज्य प्रियं वचः ।। 101

पूर्वाभिभाषी भक्तेषु भवेन्मत्प्रीतये शिवे ।
गमने चास्य वक्तव्यं पन्थानः सन्तु ते शिवाः ।। 102

शिवं भवतु युष्माकं श्ेषार्थं च प्रकाशकम् ।
आशीर्वादमिमं कुर्यात् सर्ववर्णेषु सर्वदा ।। 103

नमस्काराभिवादेषु स्वस्ति मङ्गलवादिने ।
शिवं भवतु युष्माकं प्रब्रूयात्सर्वकर्मसु ।। 104

त्रिपुण्ड्ररहिते दत्तं दानं तन्नरकावहम् ।
तस्मात्त्रिपुण्ड्ररहिते न देयं ग्राह्यमेव च ।। 105

---

1. दानप्रतिग्रहान्नृणां इति पाठः सुगम इति भाति ।
2. न हीदृक्स्वर्गसोपानम् अमलं इति पाठः युक्तो भाति ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

त्रिपुण्ड्रधूलने द्वेषो यस्य जायेत सर्वदा ।
सद्विजोऽप्यन्त्यजो ज्ञेयः स एव किल जारजः ।। 106

शिवयोगी शिवज्ञानी शिवधर्मरतश्च यः ।
इत्येत्त्रिविधं [1]ज्ञेयं पात्रं दानाय सर्वदा ।। 107

शिवमुद्दिश्य दातव्ये [2]ह्यनपेक्ष्यं गुणागुणम् ।
यत्तत्त्रिणेत्रपात्रं स्यात् सर्वपात्रवरं शिवे ।। 108

दत्तमीश्वरभक्तेषु दत्तं [3]तद्वर्धतेऽनिशम् ।
द्विजानां वेदविदुषां कोटिं [4]भोज्य तु यत्फलम् ।। 109

यतये वीतरागाय भिक्षादानेन तत्फलम् ।
सम्भोज्यैकं शाम्भवं वा शिवक्षेत्रे विशेषतः ।। 110

दशकोटिद्विजानां तु भोजने यत्फलं लभेत् ।
साज्यापूपघृतक्षीरसूपशाकादिपायसैः ।। 111

ग्रासं वा शम्भवे देवि दत्तं तेभ्यो विशिष्यते ।
बिल्वमूले शाम्भवाय क्षीरान्नं भोजयेन्नरः ।। 112

शिवभक्तो यदा भुङ्क्ते साक्षाद्भुङ्क्ते सदाशिवः ।
शिवभक्तान् द्विज श्रेष्ठान् यः श्राद्धादिषु भोजयेत् ।। 113

---

1. इत्येतत्त्रितयं ज्ञेयमिति पाठः साधुर्भाति ।
2. नावेक्षेत गुणागुणम् ।
3. यद्यत्तत् सर्धतेऽनिशम् । 4. यत्फलं कोटि भेजनात् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अपाङ्क्तेयान् यथान्यान् वै तारयन्त्येव देवताः ।
पितॄणामक्षया तृप्तिर्भवेद्वर्षसहस्रकम् ।। 114

तस्माच्छ्राद्धे श्रद्धयैव भोज्याः शाम्भवसत्तमाः ।
शिवमुद्दिश्य भोक्तव्याः शिवभक्ता हि पर्वणि ।। 115

असंयतः संयतो वा सर्वावस्थां गतोऽपि वा ।
यो वा को वा शिवे भक्तः शिववत्पूज्य एव सः ।। 116

तस्मान्मान्यश्च पूज्यश्च रक्षणीयश्च सर्वदा ।
सम्पर्कादथवा लोभात् यो वा लिङ्गं प्रपूजयेत् ।। 117

नाममात्र प्रपन्नोऽपि लिङ्गकण्ठोऽपि वा शिवे ।
स मुनिः स महायोगी स तपस्वी जितेन्द्रियः ।। 118

नास्याचारं परीक्षेत न कुलं न व्रतं तथा ।
विद्वानविद्वानथवा मलिनो वृद्धकः शिवः ।। 119

न शिवाश्रमिणो मौञ्जी न दण्डो न कमण्डलुः ।
न शिखा न जटा शाखा उपवीतमथापि वा ।। 120

बाह्याभ्यन्तरचिह्नैस्तं जानीयात्पूजयेत्तथा ।
भस्मत्रिपुण्ड्ररुद्राक्षपरिमण्डितविग्रहम् ।। 121

पूजयेत्सर्वभावेन मनसा वचसा शिवे ।
सर्वदेवादिभक्तेभ्यो मम भक्तो विशिष्यते ।।122

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मद्भक्ते यत्सदा दत्तं मयि दत्तं हि तद्ध्रुवम् ।
रुद्रास्त एव जगति रुद्राक्षवरकङ्कणाः ।। 123

ये रुद्राध्यायपारज्ञाः शिवनामार्थवेदिनः ।
त एव रुद्रा जगति भुवः पावनपावनाः ।। 124

ये पञ्चाक्षरपारीणाः पञ्चास्यध्यानमानसाः ।
पञ्चपातकनिर्मुक्तास्ते रुद्रा नात्र संशयः ।। 125

ये प्रदोषमहापूजा प्रवर्तनपरायणाः ।
बिल्वपत्रादिभिर्देवि पञ्चामृतनिषेचनैः ।। 126

त एव रुद्रा जगति नात्रकार्या विचारणा ।
ये सोमवारे नक्तेन भक्तै वर्तन्ति(?)नित्यशः ।। 127

त एव रुद्रा जगति नात्रकार्या विचारणा ।
ये चतुर्दशीपूजासु नियमान्नक्तभोजिनः ।। 128

त एव रुद्रा जगति नात्रकार्या विचारणा ।
ये वा कालाष्टमीष्वेवं शिवपूजापरायणाः ।। 129

त एव रुद्रा जगति नात्रकार्या विचारणा ।
ये पर्वपूजा निरताः शिवलिङ्गे शिवात्मके ।। 130

त एव रुद्रा जगति नात्र कार्या विचारणा ।
त्रिकालमप्रमादेन पूजयन्ति दृढव्रताः ।। 131

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शिवभक्तेषु नियतं दानाच्छादनभोजनैः ।
पूजयन्ति नरा ये वै ते वै रुद्रा नसंशयः ।। 132

अशेषपापनिर्मुक्तः शिवलोके महीयते ।
शिवक्षेत्रेषु नियतं ये वसन्ति द्विजादयः ।। 133

ते वै रुद्रा इति प्रोक्ताः सदा शर्वार्चने रताः ।
आस्वेदमतियत्नेन ये प्रणामकराः शिवे ।। 139

त एव रुद्रा जगति नात्र कार्या विचारणा ।
प्रदक्षिणपरा ये वै नमस्कारं पदे पदे ।। 140

त एव रुद्रा जगति नात्र कार्या विचारणा ।
लिङ्गाग्रवर्तनपरास्त्रिकालं सावधानतः ।। 141

त एव रुद्रा जगति नात्र कार्या विचारणा ।
सदाशिवकथासक्ता सर्वदा नियमाद्द्विजाः ।। 142

त एव रुद्रा जगति नात्र कार्या विचारणा ।
ये मन्नामजपासक्ताः सर्वदा सावधानतः ।। 143

त एव रुद्रा जगति नात्र कार्या विचारणा ।
निवसन्ति सदा ये वै अविमुक्ते महेश्वरि ।। 144

नियता नियमोपेतास्ते रुद्रा नात्र संशयः ।
यः सर्वसाक्षिणं साम्बं महादेवं सनातनम् ।। 145

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सर्वोत्कृष्टतया वेद स रुद्रो नात्र संशयः ।
पराशक्तिं महादेवीं सर्वमन्त्रमयीं शिवम् ।। 146

सर्वोत्कृष्टतया वेद ब्रह्मविष्ण्वोर्विमुक्तिदाम् ।
स एव सगणः श्रेष्ठः स एव द्विजसत्तमः ।। 147

यो वा ब्रह्मादि तुल्यं मां वेद चाब्राह्मणो हि सः ।
यो मां विष्ण्वादिभिस्तुल्यं वेद चाब्राह्मणो हि सः ।। 148

*स सर्वमोहं जनिता ब्रह्मविष्णुहरात्मना ।
यमशक्रानिलानां च वह्नेश्च जनिता शिवे ।। 149

योऽन्यतुल्यतया वेद सोऽन्त्यजो हि द्विजोऽपिसन् ।
यो मां विश्वाधिकं रुद्रं महादेवं सनातनम् ।। 150

योऽन्यतुल्यतया वेद सोऽन्त्यजो हि द्विजोऽपिसन् ।
मन्नैवेद्यसुधास्वादरहिता पापयोनिगाः ।। 151

भासुराचार निरता भूसुरा अपि रासभाः ।
नर्दन्ति निन्दयाऽन्योन्यं ते गार्दभवरोपमाः ।। 152

वितर्ककुशलाः सर्वपामरा जारजा हि ते ।
शिवधर्मोज्झिता ये वै जारजास्ते नरा इमे ।। 153

---

* स शिवः एकदा ब्रह्मरूपेण अन्यदा विष्णुरूपेण, कालान्तरे हररूपेण च भासमानः सन् सर्वान् मोहयेत् । वस्तुतः स शिवः एव यमशक्रादीनां जनयिता कारणभूतः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मूढा मृडार्चनाहीना हीनजातास्त एव हि ।
शिवज्ञानविहीनानां वृथा जन्म न संशयः ।।। 154

सर्वेषामपि तीर्थानां ज्ञानतीर्थं परं स्मृतम् ।
ज्ञानतीर्थात्परं तीर्थं यत्पुण्यं क्षान्तिवारिणा ।। 155

ज्ञानयोगस्तपो जप्ययज्ञदानादिसात्क्रियाः ।
क्रोधेन तु वृथा यस्मात् तस्मात्क्रोधं विवर्जयेत् ।। 156

मर्मास्थिप्राणहृदयं निर्दहेदप्रियं वचः ।
अवाच्यमप्रियं यस्माच्छिवभक्ते विशेषतः ।। 157

क्षमा दानं तपः सत्यं अहिंसा पैशुन्य वर्जनम् ।
निर्मलक्षान्तिसलिलैः शिवपूजाव्रतादिभिः ।। 158

इह सौख्यमवाप्नोति परत्र च शुभां गतिम् ।
सर्वशास्त्रैश्च यज्ञैश्च सर्ववेदैश्च यत्फलम् ।। 159

यो न हिंसति भूतानि तस्य पुण्यं ततोऽधिकम् ।
त्रैलोक्यं मयि यो दद्यादखिलं रत्नपूरितम् ।। 160

चरेत्तपांसि कृच्छ्राणि न तत्तुल्यमहिंसया ।
यथाकालोपपन्नेन तथा न्यायागतेन च ।। 161

उत्पन्नार्थेन यस्तोषः सन्तोषः स उदाहृतः ।
तेन सर्वमखेनेष्टं तेन सर्वमनुष्ठितम् ।। 162

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

येन तृष्णापदं त्यक्तं सन्तुष्टःस्वस्तिमान्भवेत् ।
परपीडादिनिर्मुक्ता दम्भालस्यविवर्जिताः ।। 163

ये शिवं शरणं प्राप्ता न ते दुःखस्य भाजनम् ।
ये वा देवं महादेवं स्मरन्ति परमार्थतः ।। 164

ते सर्व दुःखनिर्मुक्ता दुर्गाण्यति तरन्ति ते ।
अन्ये तु पशवः सर्वे शिवधर्मविवर्जिताः ।। 165

सत्यं सत्यं महादेवि न मुक्तेः पात्रमुत्तमम् ।
बह्वायासकरा धर्माः सर्वे शर्वार्चनोज्झिताः ।। 166

ते वै मूलाशनाः सर्वे भवन्ति नरकोषिताः ।
इति पञ्चप्रकारोऽयं शिवधर्मः प्रकीर्तितः ।। 167

अपालितो हि यद्यस्माच्छीघ्रमेव प्रयास्यति ।

ईश्वरः उवाच -

अयमंशोऽम्बिके साक्षात्सारात्सारःसमाहृतः ।। 168

मथित्वा शिवरत्नाब्धौ तद्देवि हृदि गोप्यताम् ।
नाऽभक्तायाप्रशान्ताय देयोऽयं शिवयोगिने ।। 169

भक्तेष्वेव प्रदातव्यो ह्यपात्रे नरकं लभेत् ।
महादेवाख्यया प्रोक्तो मुक्तये सर्वदेहिनाम् ।। 170

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

श्रवणादस्य पापानि नश्यन्ति विविधानि च ।
यान् यान् प्रार्थयते कामान् मद्भक्तो लभतेऽचिरात् ।।171

बहुनात्र किमुक्तेन श्रवणान्मोक्षमाप्नुयात् ।
तस्माद्भक्तैः सदा श्राव्यः शाम्भवादेव केवलम् ।। 172

सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु ।
सर्वः सुगतिमाप्नोतु सर्वस्यापि भवेच्छिवम् ।। 173

स्कन्द उवाच -

प्रणमत बत दुःखं नास्ति वः पापभीता-
स्तरुणशशिललामं सोममाशु प्रयात ।
शरणमरुणपादं कारणं तारणं वः
प्रथितभववराब्धेर्दारणं पातकानाम् ।। 174

अंशो महेशकथितः शशि(श)धामचूड-
लिङ्गाभिषेकमहिमा स्वतुलःकिलायम् ।
ख्यातो महादेव इति प्रसिद्धः
सिद्धान्तराद्धान्तितवाक्यजालः ।। 175

नत्वा स्तुत्वा महेशं निगमसुगमसद्वाक्यसारप्रकृष्टं
श्रुत्वा कृत्वा गुरुं तं श्रुतिशिखरमहावाक्य सरार्थविद्यम् ।
बुध्वा भक्तिपरेण चेतासि परं ध्यात्वा शिवं पातकं
त्यक्त्वा मानुषमध्रुवं जनुरहो यात्येव शम्भोः पदम् ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तारानाथ सहोदरापतिकृतपादाविन्दार्चन-
द्वारा तुष्टहृदन्तरं पुरहरं विश्वेश्वरं शङ्करहम् ।
भास्वद्भास्करकोटिसन्निभसहस्रारप्रदं विष्णवे
दैत्यौघप्रहरं हरं त्वघहरं तेतो भजस्वान्तरम् ।।

।। इति श्रीशिवरहस्ये एकादशाम्शे शिवगौरीसंवादे
भक्तिमहिमा नाम
पञ्चाशोऽध्यायः ।।

।। शिवरहस्यैकादशांशः समाप्तः ।।

।। साम्बसदाशिवाय नमः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)